श्रीः

श्रीमतेरामानुजाय नमः

श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

षड्विंशः परिच्छेदः

दीक्षा विधिः

अथ तावत् दीक्षाविधिः उच्यते।

दीक्षामण्डपं प्रतिष्ठामण्डपवत् समध्यवेदिकं कल्पयित्वा। वेदिकायाः पश्चिमे तालत्रयात् बहिः, ब्राह्मणस्यचेत् दीक्षा तालद्वय सम्मित चतुरश्रंकुण्डं, क्षत्रियस्य यदि गोकर्णयुग्मेन वृत्तं, यदिवैश्यस्य वितस्तिभ्यां चतुरश्राकारं, पादजस्य प्रादेशद्वयेन त्रिकोणं च कुण्डं कल्पयित्वा । स्रुक्स्रुवौ च एवमेव वर्णानुपूर्वेण, एवं अन्यानि पात्राणि समिदादीन् यागसंभारान् च दशंयां संपाद्य।तदनु एकादश्यां सायाह्ने दीक्षाचार्यः मण्डपे सर्वालङ्कारयुते पूर्ववत् द्वारतोरण कुम्भादीन् संस्थाप्य.पूर्ववत् अङ्कुरावापनं कृत्वा।पुण्याहजलेन मध्यवेदिकां प्रोक्ष्य। प्राणायामपूर्वकं तस्यां चन्दनार्द्राणि सूत्राणि प्रागायतानि सप्तदश तावन्ति उदगायतानि च निपात्य । तेषु षड्यञ्चाशदुत्तरद्विशतपदेषु मध्ये षड्विंशत् कोष्टानि संमृज्य।तन्मध्ये शङ्कुं संस्थाप्य । वृत्तानि समानि पञ्चबिंबानि यथा स्युः तथा भ्रामयित्वा। तेषु प्रथमं बिम्बं कर्णिकाक्षेत्रं। द्वितीयं त्रेधा विभज्य। तथा कृतेषु प्रथमं केसरान्तवलयं, द्वितीयं दलान्तवलयं, तृतीयं नाभिमण्डलं ।

तन्नाभिमण्डलमपि त्रेधा विभज्य। तद्बहिः शिष्टेषु बिंबेषु अरक्षेत्रं द्वाभ्यां । तद्बहिः एकेन नेमिमण्डलं च कल्पयित्वा । तद्बहिः अष्टाविंशति पदैः **पीठिकां**, तद्बहिः पङ्क्तिद्वयेन अशीतिपदैः वीथिकां च कल्पयेत्। तद्बहिः पङ्क्तिद्वितयेन द्वादशाधिकशतपदैः द्वयोः पङ्क्तयोः चतुरश्रं कृत्वा। तन्मध्ये पूर्वादि उत्तरान्तं चतुश्चतुष्पदैः चतुर्द्वाराणि आग्नेयादिषु कोणेषु अपि तथैव च कृत्वा। द्वारपार्श्वयोः बाह्यरथ्यायां द्वे द्वे अवान्तररथ्यायां एकैकं च परिमार्जयेत्। एवं चेत् अर्धशोभाः भवन्ति। अर्धशोभयोः मध्ये बहिः पङ्क्तौ एकैकं आन्तर पङ्क्तौ त्रीणि च एवं चतुर्भिः पदैःशोभाः भवन्ति। एवं चतसृषुदिक्षु शोभानां अष्टकं, अर्धशोभानां षोडशकं च कृत्वा। ततः वर्णकलापपरिपूरणं कुर्यात्।

पञ्चरत्नैः धातुभिः वा तेषां चूर्णैः वा पञ्चवर्णैः पुष्पैः वा मण्डलपदानां परिपूरणंकुर्यात्।सितस्य शाल्यादि तण्डुलपिष्टं, कृष्णस्य पुटदग्धं श्यामस्य क्षुण्णशुष्कपत्रचूर्णं, रक्तस्यकौसुम्भं, पीतस्य हरिद्राचूर्णं, सर्वत्र वर्णानां इति अनुषङ्गाः। पीतेनकर्णिकां, शुक्लैः बिन्दून् । कर्णिकारेखाः पाटलैः

केसरावलिं द्विधाकृत्वा । श्वेतेन पूर्वभागं, उत्तरं पीतेन, केसराणि शुक्लेन, बिन्दून् रक्तेन, अष्टदलानि श्वेतेन। दलान्तानिरक्तैः दलान्तवलयं रक्तेनश्वेतेन वा नाभिमण्डलत्रयं श्यामेन, पीतेन, रक्तेन, अरान्त वलयं कृष्णेन, द्वादशाराणि रक्तेन, नेम्यन्तमेदिनीं सितेन, नेमिं द्वेधा कृत्वा। कृष्णेनपूर्वभागं, उत्तरंसितेन, अन्तरालानि श्यामेन।कृष्णेन पूर्वभागं, उत्तरं सितेन, अन्तरालानि श्यामेन कृष्णेन वा तद्बहिः पीठं पीतेन पाटलेन श्वेतेन वा, तद्बहिः वीथिकां सितेन लतावितानयुतां, शोभाष्टकं रक्तेन, अर्धशोभाः षोडश पीतेन, उत्तरादि द्वार चतुष्टयं क्रमेण शुक्ल. रक्त. पीत. कृष्णैः, कोणान् कृष्णेन च वर्णेन, सर्वत्र अन्तरालानि कृष्णेन श्यामेन वा वर्णेन आपूर्य। चतुर्षुकोणेषु श्वेतेन शङ्खान् कृत्वा।ततः मण्डलाराधनं कुर्यात्।

कर्णिकायां मन्त्राध्वानं अर्चयेत्।तत्सवरूपं तु द्वादशाक्षर अष्टाक्षर बलमन्त्र, विष्णुगायत्री, सुदर्शनमन्त्र, पवित्रन्त्र, चतुर्मूर्तिमन्त्र, नृसिंहमन्त्र, राममन्त्र, कृष्णमन्त्र, वराहमन्त्रान् उच्चार्य अर्चयेत्।

केसरेषु तत्वाध्वा अर्चनम्-जीवप्राणमनोबुद्धि-अहङ्कार शब्दस्पर्श रूप रस गन्ध श्रोत्र त्वक्कक्षु जिह्वा घ्राण वाक्पाणिपादपायूपस्थ पृथिव्यप्तेजो वाय्वाकाशरूपाणि जीवतत्वानि धातृ विधातृ मित्रावरुण भग विवस्वत्पूष सवितृ रवि त्वष्टृ विष्णु वीरभद्र , शंभु गिरीशशर्वोमापतीशान हरस्थाणु भव शिव शूल्यादि रूपतत्वानि च प्रणवादि चतुर्थ्यन्तानि अर्चयेत्।

दलेष्वर्णाध्वाऽर्चनम्- ओं कं नमः पराय इत्यारभ्य क्षं नमं पराय इत्यन्तेन नाभिभागे पदाध्वाऽर्चनम्। तत्र केशवादीन् सप्तऋषीन् च, प्राच्यादिषु आदिवराह नारसिंह श्रीधर हयवक्त्र भार्गवराम राघव वामनवासुदेवान् च, कुमुदादिसुप्रतिष्ठान्तांश्च, जयविजय चण्डप्रचण्ड भद्र सुभद्र धातृ विधातृ सूर्यचन्द्र काम ब्रह्म विनायक षण्मुख दुर्गा कुबेर शंकरान्, च,विमलोत्कर्षणी, ज्ञान, क्रिया, योगि प्रह्वी, सत्या, ईशाना अनुग्रहशक्तीश्च, आदित्यादिकेत्वन्तान् च, लक्ष्मी सरस्वती रति शान्ति तुष्टि पुष्टि क्रिया कीर्ति वाराहीश्च, प्रणवादिचतुर्थ्यन्तं अर्चयेत्।

अरेषु कलाध्वापूजनं तत्र अकारादि स्वरार्चनं कुर्यात्। नेमिभागे भुवनाध्वाऽर्चनं; तत्प्रकारस्तु अतल वितल,सुतल, नितल महातल, रसातल, तलातल, पाताल, भूर्भुवस्सुवर्महर्जनस्तपस्सत्यलोक गन्धर्वलोक, यक्षलोक, अप्सरलोक, किन्नरलोक, यमलोक, निऋतिलोक वरुणलोक, रुद्रलोक, देवलोक, ब्रह्मलोक, शिवलोक, विष्णुलोक, सदाविष्णुलोक, कुम्भीपाक, महारौरव, क्षुराल, सन्निमाल, शीतल उष्णजल सन्तपन तप्तलोह शाल्मलीरूपधीयन्त्रधनुर्भिन्न, शुद्धनिरयान्, प्रणवादि चतुर्थ्यन्तं अर्चयेत्।

बिन्दुषु द्वादशाक्षराणि कर्णिकायां परमात्मानं केसरेषु श्री सरस्वति रति शान्ति प्रीति कीर्ति पुष्टि तुष्टीः दलभूमिषु श्रीवत्सादि द्वादशशक्तीः दलस्य परितः व्याप्त्याद्याः, प्रथमनाभौ विष्णुं, द्वितीये ब्रह्माणं, तृतीयेरुद्रं, द्वादशारेषुविष्ण्वादीन् द्वादश अरान्तवलये मत्स्यादि दशमूर्तीः, प्रथम नेमिवलये शंखादीन्, आग्नेयादि पीठकोणचतुष्के अनन्त,वराह नारसिंह हयग्रीवान् लतावीथिकायां इन्द्रादिलोकपालान्, द्वारचतुष्के चण्डादिद्वन्द्वं,वीथ्यां ईशाने विष्वक्सेनं, पूर्वद्वारबाह्ये वैनतेयं, दक्षिणे पद्मं, पश्चिमे गदां, उत्तरे शंखं च प्रणवादिं चतुर्थ्यन्तैः स्वस्व मन्त्रैः अर्चयेत्।

तदनु हेमादिमयं कुम्भं तादृशं करकं च मृण्मयं चेत् सूत्रवेष्टितं तद्युगलं गालितोदकेन आपूर्य। न्यस्तरत्नसुवर्ण स्रवचन्दन परिष्कृतं अहतवास युग्मसंवेष्टितं कृत्वा। करकं अस्त्रमन्त्रेण शतवारं अभिमन्त्र्य। अविच्छिन्नधारया वेदिकां परितः प्रादक्षिण्येन करकं तस्याः पृष्टतः कुम्भं च नीत्वा। चक्रपद्मस्य ईशान कोणे धान्यराशौ दक्षिणे कलशं वामे करकं च सम्स्थाप्य। (करके षडक्षरेण सुदर्शनं,अथ) कुम्भे मूलमन्त्रेण हरिं पीठकल्पनपूर्वकं आवाह्य अभ्यर्च्य। मण्डले सांगं सपरिवारं परमात्मानं यथाविधि समभ्यर्च्य। तदनु अष्टाक्षरेण अग्निं मथित्वा। कुण्डमध्ये निधाय । तत्र श्रृतं चरुं चतुर्धा विभज्य। भागमेकं मण्डलस्थाय हरये,कुम्भस्थाया अंशंएकं च निवेद्य।अग्नौ एकंअंशं हुत्वा। गुरुः स्वयं एकं अंशं उपयुञ्जीत।तत्र अग्नौ समिधां अष्टोत्तरशतं आज्याहुतीनां अपि तथा मूलमन्त्रेण चरुं पुरुष सूक्तेन हुत्वा। पूर्णाहुतिं कुर्यात्। तदनु आचार्यः स्नातं जितक्रोधं मदादिरहितं शुचिं अहतक्षौमवसनं सोत्तरीयं अलंकृतं शिष्यं आहूय नवेन वाससा नेत्रे स्वमन्त्रेण बद्धा तं आत्मनः दक्षिणपार्श्वे प्राङ्मुखं विनिवेश्य। तेन दर्भैः संस्पृष्टः सन् द्वादशाक्षरेण आज्य, चरु, समित्पुष्पतिलैः, द्वादशाहुतीः जुहुयात्। ततः गुरुः शिष्यस्य मूर्धानं प्रसृतिमुद्रया त्रिः प्रादक्षिण्येन अष्टाक्षरेन स्पृशन् भस्मना पाण्डरेण मूलमनुना शिरः स्पृष्ट्वा,शिष्यस्य ऊर्ध्वपुण्ड्रं विधाय। अस्त्रमन्त्रेण प्रतिसरं बद्धा । शिष्यं पञ्चगव्यं चरुं च प्रणवेन प्राशयित्वा। दन्तान् धावयित्वा । दन्तकाष्ठं भूमौ निपात्य अवलोकयेत्।

नैऋत वारुणयाम्येषु यद्यग्रं अशुभं भवति। तदा नृसिंहमन्त्रेण तिलैः अष्टोत्तरशतं आहुतीनां जुहुयात्। ततःगुरुःशिष्यं आचान्तं करे गृहीत्वा देवेशं प्रणम्य।

संसार पाश बद्धानां पशूनां पाशमोक्षणे।
त्वमेव शरणं देव गतिरन्या न विद्यते।
पाशमोक्षणहेतुर्यः त्वत्समाराधनात्मकः।

तेनेमान् जन्मपाशेन पाशितान् पशु जन्मनः।
विपाशयामि देवेश तदनुज्ञातुमर्हसि।

इति इमां गाथां उदीर्य. शुक्ल,कृष्णरक्तवर्णं तन्तुं त्रिगुणीकृत्य.पुनश्च त्रिगुणीकृतेन तेन मायासूत्रेण शिष्यस्य शिखां उपक्रम्य।

पादान्तं पञ्चविंशति संख्यया मूलमन्त्रेण वेष्टयित्वा। तेनैव मन्त्रेण सर्पिषा अष्टोत्तरशतं आहुतीश्च हुत्वा ।माषोदनेन भूतेभ्यः बलिं दत्वा।शिष्य नेत्रबन्धं देहबन्धं च विमोच्य । मायासूत्रं अन्यस्मिन्शरावे निधाय अन्येन पिधाय । कुम्भपार्श्वे निधाय।दर्भान् भूमौ संस्तीर्य । तत्रशिष्यं शाययेत् । तदा मण्डल कुण्डाग्निस्थ देवान् न उद्वासयेत्।

प्रभाते शिष्यस्य सुस्वप्नदर्शने सद्य एव दीक्षेत । दुस्वप्नदर्शने तु सद्यःगुरुः स्नात्वा यागमण्डपं समासाद्य । दुस्वप्न दोषशान्त्यर्थं शान्ति होमंकरिष्ये इति संकल्प्य. पूर्ववत् शान्तिहोमंकृत्वा । पूर्ववत् तोरण, ध्वज कुम्भपूजनं कृत्वा । मन्डलस्थं कुम्भस्थं च देवं अभ्यर्च्य । चतुर्विधं अन्नं निवेद्य । नत्वा प्रदक्षिणीकृत्य। शिष्यस्य नेत्रे पूर्ववत् बद्धा । तं आत्मनः दक्षिणे पार्श्वं प्रापय्य.समिदादिभिः मूलमन्त्रेण प्रत्येकं अष्टोत्तरशतं आहुतीनां हुत्वा। ततः मायासूत्रं पञ्चविंशतिधा छित्वा । तेन प्रत्येकं अष्टोत्तरशतं अष्टकृत्वा । प्रकृत्यादीनि हुत्वा । गुरुः स्वहृत्पद्मे परमपुरुषं ध्यायन् । तस्मिन् शिष्यजीवं संहारक्रमेणसंहृत्य । तस्य शोषणादि कृत्वा । तदनु तत्व सृष्टिहोमपूर्वकं शिष्यस्य स्थूलशरीरंसृष्ट्वा । स्वहृदयस्थं मण्डले विचिन्त्य । मण्डलस्थं शिष्ये ध्यात्वा । शिष्यं सजीवं ध्यात्वा । मूलमन्त्रेण कुम्भजलेन प्रोक्ष्य । शिष्यस्य नेत्रबन्धं उन्मुच्य। मूलमन्त्रेण अन्यत् वासः परिधाप्य । तस्य पादप्रक्षाळनं आचमनान्तं कारयित्वा । अन्येन वाससा शिष्यस्य नेत्रे बद्धा । गुरुः तं अन्तिके प्राङ्मुखं उपवेश्य । षडध्वनः शोधयित्वा । महाव्याहृतिमन्त्रेण आज्येन अष्टोत्तरशतमाहुतीनां हुत्वा। हुतशेषेण शिष्यस्य पादौ तिलैः तावतीः तन्मन्त्रेण हुत्वा । हुतशेषेण शिष्यस्यनाभिं, कुशेशयैः तावतीः पूर्वोक्त विद्यया हुत्वा ।हुतशेषेण शिष्यस्य हृदयं, पूर्वोक्तेन मनुना चरुणापूर्वोक्त संख्यया हुत्वा। हुतशेषेण शिष्यस्य मूर्धानं च संस्पृश्य।होमान्ते गुरुः शिष्यं दक्षिणे करे गृहीत्वा ।कुम्भं मण्डलं च प्रदक्षिणं प्रक्रमय्य।मण्डलस्य चतुर्णां द्वाराणां मध्ये यस्मिन् कस्मिंश्चित् द्वारि तिष्ठन् गुरुः शिष्याञ्जलिं मणिभिः मुक्ताभिः प्रवालैः केवलैः पुष्पैः वा पूरयेत्।

तदनु सदस्यनुज्ञया गुरुणा अभ्यनुज्ञातः तस्मिन् मण्डले पूर्वं अञ्जलिपूरितं पुष्पादि शिष्यो विकिरेत्।तदुत्करः यत्र पतति तद्भागाधिपमूर्तीनां नामानि केशवादीनि तदन्ते भागवतः इति भट्टारकः

इति वा गुरुः शिष्यस्य विनिर्दिशेत् । क्षत्रियस्य तु देवान्तं नाम, वैश्यस्य पालशब्दान्तं, शूद्रस्य दासान्तं । तदनुगुरुः शिष्यस्य नेत्रबन्धं विमुच्य । चक्राब्जमण्डलं प्रदर्श्य । तेन सह आचार्यःदेवं नारायणं ध्यात्वा । शिष्यस्य कर्णे सप्रणवं, सऋषिछन्दोदैवतं, सांगं द्वादशाक्षरं, तदनु अष्टाक्षरं, पश्चात्मूर्तिमन्त्रान् च यथाविधि अध्यापयेत् । क्षत्रि यवैश्योश्च एवं । शूद्राणां,स्त्रीणां अनुलोमजानां च नमःप्रणव हुंफट् स्वाहाकार वर्जितं केवलं केशवादिकं वैष्णवं नाम अध्यापयेत्।

तदनु कुम्भस्थं मण्डलस्थं च हरिं अर्चयित्वा।ध्यात्वा गुरुः स्वहस्ते चक्राब्जमण्डलं ध्यात्वा।विष्णुहस्तंकृत्वा।स्थितस्य प्राञ्जलेः शिष्यस्य मूर्ध्नि निधाय।देशिकः तत्र अग्निसन्निधौ शिष्यस्य आचारान्नियमान् च सर्वान् बोधयेत्।यथा

मंत्रः परस्य नाख्येयः नाक्षसूत्रं प्रदर्शयेत्।
न च मुद्रां नापि सिद्धिमन्त्रस्य कथयेत् स्वयम्।
आचार्यं नाम न वदेत् नियोगं नास्य लंघयेत्।
न गुरून् दूषयेत् वाचा नाचरेत् तस्य विप्रियम्।
शयनादींश्च न गुरोः आक्रमेत् न च लंघयेत्.
गुरुवत् गुरु दारेषु वर्तितव्यमसन्निधौ।
आचार्यं अच्युतं शास्त्रं त्रयं सम्मानयेत् सदा।
नास्तिकान् भिन्नमर्यादान् वेदब्राह्मण निन्दकान्।
न स्पृशेत् नैव तैस्सार्धं संवसेत् दुर्दशास्वपि।
प्रसारयेत् नैव पादौ गुरुदेवाग्निसन्निधौ।
वेदितव्यं जगत्सर्वं वासुदेवमयं सदा।
अनर्चयित्वा देवेशं नात्मपोषणमाचरेत्.
जपस्तोत्रप्रणामादीन् सन्ध्याकाले समाचरेत्।
भगवध्यानतत्कर्म कर्तव्येषु सदा रमेत्।
वैष्णवान् च यतीन् चैव दृष्ट्वा तान् प्रणमेत् क्षितौ।
पुत्रदारा गृहक्षेत्रपश्वादि धनमात्मनः।
व्यपदेश्यमशेषेण नाम्ना भगवतो वदेत्।

समस्सर्वेषु भूतेषु कामक्रोधविवर्जितः.
शनैश्शनैरिन्द्रियाणि विषयेभ्यो निवारयेत्.
संसारविमुखैःसार्धं शास्त्राभ्यासं समाचरेत्.
श्रौतस्मार्तानि कर्माणि सदासेवेत नेतरत्।
स्वसूत्रोक्तेनविधिना निषेकादिक्रिया भवेत्.
गुह्यं नाम च गोत्रं च प्राकृतं नान्यदिष्यते।
आसीनो वा शयानो वा गच्छन् भुञ्जान एव वा।
कीर्तयेत् सम्स्मरेत् चैव वासुदेवं सनातनम्।

इति गुरुः शिष्याय नियमान् संबोध्य।ततः पूर्णाहुत्यन्तं शान्तिहोमं अखिलं च कृत्वा।अग्निं विसृज्य।कुम्भस्थं मण्डलस्थं च देवं उद्वास्य।शिष्याय आशिषःवाचयेत्। तदनु शिष्यश्च गुरवे गोभूहिरण्यभूषण यान दासीदासादि यथावित्तानुसारतःवितीर्य। ब्राह्मणान् भोजयित्वा। तेभ्यश्च दक्षिणां वितीर्य।तत्रैव हुतशेषं भुक्त्वा। अहश्शेषं उषित्वा।रवौ अस्तंगते सर्वाऽलंकार युतः गुरुणा अनुज्ञातः बन्धुभिःसह अलंकृतं स्वगृहं प्रविशेत्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां
दीक्षा विधिः नाम षड्विंशः परिच्छेदः

****

सप्तविंशः परिच्छेदः

समाराधन विधिः

अथ समाराधन विधिः उच्यते-

देशिकः वारुण, दिव्य, आग्नेय, वायव्य, पार्थिव, मान्त्र,मानसाभिधेषु सप्तविधेषुस्नानेषु एकतमेन स्नात्वा । शुक्लोपवीतोत्तरीय चन्दना द्यनुलेपन श्वेतमृत्स्नाकृतोर्ध्वपुण्ड्राद्यलंकृतः नित्यं स्वकृत्यां, निर्वृत्य।आजानुपादौ आमणिबन्धनात् हस्तौ च प्रक्षाळ्य। आचम्य। आलयं द्विः प्रदक्षिणी कृत्य। द्वारपार्श्वं समासाद्य।आचक्रायेत्यादि मन्त्रैः षडङ्गन्यासं कृत्वा। अधिवलजंस्थितः। हस्ताभ्यां ताळत्रयं कृत्वा।स्वयमेव उत्तमत्रय गेहकवाटत्रयं ओं क्षं तार्क्ष्याय नमः। इति मन्त्रेण मध्यमत्रयगेहकवाटत्रयं ओं शान्ताय नमः। इति मन्त्रेण। अधमत्रय गेह कवाट त्रयं ओं यं वायवे नमः इति मन्त्रेण च

उद्घाट्य। अन्यानि कवाटानि ओं मुक्ताय नमः।इति परिचारकैः अन्यैः, ब्राह्मणैः वा उद्घाटयित्वा।'अधि पाता इ इति सामपठन् दक्षिणाङ्घ्रिणा गर्भगृहद्वार ब्रह्मसूत्रदक्षिणेन अन्तः प्रविश्य।द्वादशाक्षरमनुना शिरसा देवं प्रणम्य।दीपान् प्रज्वाल्य। स्रक् पुष्पादीनि विसृज्य। वेदिकापात्र बिंबार्चनं चण्डप्रचण्डौ आरभ्य महाबलि पीठान्तं प्रतिष्ठोक्त विधानेन प्रणवादि नमोन्तैः तत्तन्मन्त्रैः शिष्येण वा परिचारकेण वा यथा विधि कारयेत्।

सर्वालंकार संयुतः,आचार्यः अन्तः प्रविश्य देवे पूर्वपश्चिमाभिमुखे स्वयं उदङ्मुखः दक्षिणोत्तराभिमुखे प्राङ्मुखः सन् देव पार्श्वे तालमात्रसमुत्सेधे तालद्वयसमायतेकूर्मासने उपविश्य, भूत शुद्धिं कुर्यात्।

अपक्रमान्तु भूतानि पिशाचप्रेतगुह्यकाः।
सर्वेषां अविरोधेन विष्णोः कर्म समारभे।।
उत्क्रामन्तु पिशाचाः ये भूताः भूमिभागगाः।
ये भूताः विघ्नकर्तारः ते गच्छन्त्वाज्ञया हरेः।।

कूर्मादीन् दिव्यलोकं तदनु मणिमयं मण्डपं तत्र शेषं।
तस्मिन् धर्मादिपीठं तदुपरि कमलं चामरग्राहिणीश्च।।
विष्णुं देवीं विभूषायुधगणमुरगं पादुके वैनतेयं।
सेनेशंद्वारपालान् कुमुदमुखगणान् विष्णुभक्तान् प्रपद्ये।

इति उच्चार्य, बहिः तूर्यघोषे प्रवर्तिते यवनिकया गर्भगृह द्वारं निश्छिद्रं आच्छाद्य। घण्टायां ''ओं ब्रह्मणे नमः''। मुकुले ''ओं चक्राय नमः''। सूत्रेषु ''ओं महानागेभ्यो नमः''। जिह्वायां ''ओं सरस्वत्यै नमः''। नादे ओं प्रजापतये नमः''।इत्यावाह्य अभ्यर्च्य घण्टां चालयेत्।

भूतशुद्धिः

आसनमन्त्रस्य मेरुपृष्ठ ऋषिः, अतलं छन्दः श्रीकूर्मः देवता, आसने विनियोगः।पृथिव्याः कूर्मऋषिः। सत्यम् छन्दः। ब्रह्मा देवता। आसनेविनियोगः। ब्रह्मणे नमः। ओं ह्रीं ओं श्रीमदनन्तासनायनमः, ओंकमलासनाय नमः, ओं विमलासनाय नमः, ओं योगासनाय नमः, ओं वीरासनाय नमः, ओं कूर्मासनाय नमः इति आसनं अभ्यर्च्य,

पृथ्वी त्वया धृताः लोकाः देवी त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।

मां च पूतं कुरु धनैरेनतोस्मि त्वां सुरेश्वरीम् ।

इति प्रार्थ्य। पद्मं वा स्वस्तिकं वा आसनं बद्ध्वा। अस्मद्गुरुभ्यो नमः। अस्मत्परम गुरुभ्यो नमः अस्मत्परमेष्टि गुरुभ्यो नमः. इति गुरुपरंपरां ध्यात्वा। तदनु शोषणादि कुर्यात्।

शरीरस्य आत्मा ऋषिः, प्रकृति पुरुषौ छन्दसि, सत्यः देवता, आसने विनियोगः, ओं आत्म मन्त्रस्य आत्मा ऋषिः, पुरुषप्रकृति छन्दसि, सत्यः देवता, ओं ब्रह्मणे नमः, ओं विष्णवे नमः,ओं ईश्वराय नमः,ओं भूं भूम्यै नमः,ओं करतलकरपृष्ठाभ्यां नमः,ओं अङ्गुष्टाभ्यां नमः,ओं तर्जनीभ्यां स्वाहा,ओं मध्यमाभ्यां वषट् ,ओं अनामिकाभ्यां हुं, ओं कनिष्टिकाभ्यां फट्, ओं नखमुखेभ्यः वौषट् , ओं चक्र मन्त्रस्य शंभु ऋषिः, गायत्रि छन्दः, श्री सुदर्शनः देवता, रेफं बीजं, ह्रीं शक्तिः, रक्तो वर्णः दिग्बन्धनार्थे विनियोगः। आचक्राय हृदयाय नमः, ओं विचक्रायशिरसे स्वाहा, ओं सुचक्राय शिखायै वषट्, सूर्यचक्राय कवचाय हुं, ज्वालाचक्राय नेत्राभ्यां वौषट्, सुदर्शन चक्राय अस्त्राय फट्।

चक्रं शङ्खं च चापं परशुमसिमिषुं शूलपाशाङ्कुशास्त्रम्।
बिभ्राणं वज्रखेटे हलमुसल गदा कुन्तमत्युग्रदंष्ट्रं।।
ज्वालाकेशं त्रिनेत्रं ज्वलदलन वहं हारकेयूरभूषम्।
ध्यायेत् षड्कोण संस्थं सकलरिपुजन प्राण संहारिचक्रम्।

ओं रं कालवैश्वानरात्मने नमः, अग्निप्राकारमुद्रायै नमः, ओं सशराय सशार्ङ्गाय सनाराचाय हुंफट् सुदर्शनाय स्वाहा", आकाशे चक्रमुद्रायै नमः इति चक्रमुद्रां न्यस्य। श्री भगवतः वासुदेवस्य आज्ञा भगवत्भक्तियोग प्रतिबन्धकसमस्ताऽविद्याकर्मकृत पापक्षयार्थं भगवत्समाराधनार्थं भूतशुद्धिं करिष्ये इति संकल्प्य ।

प्रणवस्य ऋषिः ब्रह्मा देवी गायत्री छन्दः परमात्मा देवता। अं बीजं। उं शक्तिः। मं कीलकं। शुक्लो वर्णः।प्राणायामार्थे विनियोगः।

नारायणाय हृदयाय नमः। विभवे शिरसे स्वाहा। शान्ताय शिखायै वषट्। प्रणवार्थ प्रकाशकाय कवचाय हुं। श्री भूमिसहिताय नेत्राभ्यां वौषट्। आनंदाय अस्त्राय फट्।

नारायणं विभुं शान्तं प्रणवार्थप्रकाशकम्।
श्री भूमि सहितानन्दं हृत्पद्मे सततं भजे।।

ततः रेचकपूरककुंभकरेचकैः प्राणायामत्रयकरणम्। ओं योग मुद्रायै नमः। वायु बीजस्य किष्किन्ध ऋषिः। जगती छन्दः। महाभूत रूपि वायुः देवता। अस्मन् मनोवाक्काय कर्म कृत समस्त पाप शोषणार्थे विनियोगः।

आवातवाहिभेषजं विवातवाहि यद्रपः।
त्वं हि विश्वभेषजो देवानां दूत ईयसे।
द्वाविमौ वातौवात आसिन्धोरापरावतः।
दक्षं मे अन्य आवातु परान्यो वातु यद्रपः।

नाभि कन्दे ओं यं वायवे नमः। वेद्याकारेण धूम्र वर्णेन महावातात्मना अस्मच्छरीरस्थितं समस्त पापं शोषयामि। अग्नि बीजस्य काश्यप ऋषिः। त्रुष्टुप्छंदः।वैश्वानराग्निःदेवता। अस्मन्मनोवाक्कायकर्मसमस्त पाप दहनार्थे विनियोगः। अग्निरक्षांसिसेधति.....शुचिव्रत।

हृदये-ओं वैश्वानराग्नये नमः।त्रिकोणेन रक्तवर्णेन वैश्वानराग्निना अस्मच्छरीरस्थितं समस्तपापं दहामि। पृथ्वी बीजस्य।ब्रह्मा ऋषिः। गायत्रीछन्दः।वराहरूपि विष्णुः देवता। उत्थितस्य अग्नेः कण्ठे स्तंभनार्थे विनियोगः।

स्थोनापृथिवी.....शर्म सप्रथाः।ओं लं पृथ्वी बीजेन स्पर्शनेन सहोत्थितं अग्निं कण्ठे स्तंभयामि। अमृतबीजस्य ब्रह्माऋषिः गायत्री छन्दः। सोमोदेवता। तादृशास्मत् शरीरस्य अमृतप्लावनार्थे विनियोगः।

यदतोवातते गृहे..... आयुगुंषितार्षत्। ओं वं वरुणायस्वाहा। वृत्तात् स्फटिक वर्णात् वरुणबीजात् उत्थिताभिः अमृत दाराभिः अस्मच्छरीरं आपादतलमस्तकं प्लावयामि।

तत्व संहारमुद्रायै नमः। इति तत्वसंहारमुद्रां प्रदर्श्य।पृथ्वी बीजस्य ब्रह्मा ऋषिः। गायत्री छन्दः। श्री वराह रूपि नारायणो देवता।ओं लं लं लं चतुरश्रां पीतवर्णां घ्राणोपस्थेन्द्रिययुतां शब्दस्पर्श रूप रस गन्धगुणयुतां पृथ्वीं बाह्यात् पूरकेण मम शरीरं पादादि जानुपर्यन्तं संपूरयामि।तन्मध्ये ओं ह्रां भं लं ह्रीं सकलरां पृथ्वी अधिपतये विष्णवे सद्योजाताय नारायणाय निवृत्तिकलात्मने हुंफट्। इति पृथ्वी मन्त्रं ध्यायन् कुम्भेन पार्थिवं सर्वं तन्मन्त्रे संहरामि। ओ तं नमः पराय सितवर्णाय गन्धतन्मात्रात्मनेनमः। पृथ्वी मन्त्रं गन्धतन्मात्रायां संहरामि। तां गन्धतन्मात्रां रेचकेण तोयाख्ये महाधारे निक्षिपामि।

ओं श्लां श्लां श्लां पार्थिवांशं पादादिजानुपर्यन्तात् चतुरश्रात् पार्थिव मण्डलात् आप्यांशे सापेक्षं लीनो भव।

अपां बीजस्य सिन्धुद्वीपऋषिः।गायत्री छन्दः।वरुणो देवता। ओं वं वं वं रसना पाय्विन्द्रिययुताः अर्धचन्द्राकृतिः श्वेताः शब्दस्पर्शरूपरस गुणयुताः अपः बाह्यात् पूरकेण जान्वादि कटिपर्यन्तं मम शरीरे संपूरयामि। तन्मध्ये ओं ह्रीं षं रीं सकलरीं अंभोधिपतये ब्रह्मणे वामदेवाय धनुर्धराय प्रतिष्ठाकलात्मने हुं फट् इति मन्त्रं ध्यायन्, अं मयं सर्वंकुम्भकेन शनैश्शनैः तन्मन्त्रे संहरामि। ओं घं नमः पराय पाण्डरवर्णाय रसतन्मात्रात्मने नमः।अपां मन्त्रं रसतन्मात्रायां सम्हरामि। तां रसतन्मात्रां गन्धतन्मात्रयासह रेचकेन अग्नौ संयोजयामि। ह्रां ह्रां ह्रां आप्यंश जान्वादिकटिपर्यन्तात् आप्यात् अष्टदल पद्मात् तैजसांशे सापेक्षं लीनो भव।

अग्निबीजस्य काश्यप ऋषिः।त्रिष्टुप्छन्दः।अग्निः देवता। ओं रं रं रं त्र्यश्रं पाटलवर्णं दृष्टिचरणेन्द्रिययुतं शब्दस्पर्श रूपगुणं अग्निं बाह्यात् पूरकेण गुह्यादि आनाभि मम शरीरेसंपूरयामि। तन्मध्ये ओं ह्रूं ह्रीं ण्यं ह्रीं सकलरूं अग्न्यधिपतये रुद्राय घोराय प्रद्युम्नाय विद्याकलात्मने हुं फट् इति मन्त्रं ध्यायन्, तैजसं सर्वं कुम्भकेन शनैश्शनैः तन्मन्त्रे संहरामि। ओं दं नमःपराय ज्योतिर्वर्णाय रूप तन्मात्रात्मनेनमः ज्योतिर्मन्त्रं रूपतन्मात्रायां संहरामि। तां रूपतन्मात्रां गन्धरसशक्तिभ्यांसह रेचकेन वायौ संयोजयामि। ह्रां ह्रां ह्रां तैजसांश गुह्यादि आनाभि त्रिकोणाग्नि मण्डलात्वाय्वांशे सापेक्षं लीनो भव।

वायु बीजस्य किष्किन्ध ऋषिः।जगती छन्दः।वायुर्देवता। ओं यं यं यं धूम्रं वृत्तं त्वक्करेन्द्रिययुतं शब्दस्पर्शगुणं वायुं बाह्यात् पूरकेण नाभ्यादि नासिकान्तं मम शरीरे संपूरयामि। तन्मध्ये ओं ह्रैं णं सकलरैं वाय्वधिपतये ईश्वराय तत्पुरुषाय संकर्षणाय शान्तिकलात्मने हुं फट् इति मन्त्रं ध्यायन्, वायव्यं सर्वं कुम्भकेण शनैश्शनैः तन्मन्त्रे संहरामि। ओं धं नमः पराय लोहितवर्णाय स्पर्शतन्मात्रात्मने नमः।वायुमन्त्रंस्पर्शतन्मात्रायां सम्हरामि। तां स्पर्शतन्मात्रायां गन्धरस रूपतन्मात्राभिः सह रेचकेन आकाशे संयोजयामि। स्यां स्यां स्यां वाय्वांश नाभ्यादि नासिकान्तात् षड्बिंदु लाञ्छितात् वायुमण्डलात् नाभसांशे सापेक्षं लीनो भव।

आकाशबीजस्य ब्रह्मा ऋषिः गायत्री छन्धः। परमहंसः देवता। ओं हं हं हं नीलोत्पलदलनिभं वाक् श्रोत्रेन्द्रिययुतं शब्दगुणं आकाशं बाह्यात् पूरकेण नासादिमूर्धान्तं मम शरीरे संपूरयामि।तन्मध्ये ओं ह्रौं ह्रीं ह्रीं सकलरौं आकाशाधिपतये सदाशिवाय ईशानाय वासुदेवाय शान्त्यादिकलात्मने हुं फट् इति

मन्त्रं ध्यायन् नाभसं सर्वं कुम्भकेन शनैश्शनैः तन्मन्त्रे संहरामि। ओं नं नमः पराय शुक्लवर्णाय शब्दतन्मात्रात्मने नमः,आकाशतन्मात्रं शब्दतन्मात्रायां सम्हरामि। तां शब्दतन्मात्रां गन्धरसरूपस्पर्शतन्मात्राभिः सह रेचकेन स्वान्ते संहरामि। क्षमां क्षमां क्षमां नाभसांश नासिकादि मूर्धान्तात् वृत्तद्वयात्मकात् नाभसात् मण्डलात् स्वान्ते सापेक्षं लीनो भव।

ओं पं नमःपराय सितासित वर्णाय मनस्तत्वात्मने नमः, स्वान्तं अहंकृतौ सम्हरामि। ओं फं नमःपराय पाटल वर्णाय अहंकारात्मने नमः,अहंकारं बुद्धौ सम्हरामि। ओं बं नमःपराय स्फटिकाभासाय बुद्धि तत्वात्मनेनमः, बुद्धिं प्रकृतौ सम्हरामि। ओं भं नमः परायसित वर्णाय प्रकृत्यात्मने नमः,प्रकृतिं जीवे सम्हरामि। ओं मं नमःपराय स्फटिकाभासाय जीवतत्वात्मने नमः। सुसूक्ष्मं भास्कराभं वासनाविवशं जीवं नाभिचक्रस्थितं पद्मसूत्र सुसूक्ष्मया सुषुम्नयानाड्या कुम्भकेन वायुना अन्तर्देहे उपरि आरोप्य, ब्रह्मरन्ध्रं भित्वा देहात् बहिः निर्गत्य सूर्यमण्डलं प्रविश्य उपरि सहस्त्रदलयुते श्वेतपद्मे संस्थितं परब्रह्मणि संयोजयामि। ओं मं हंसः हे जीव नाभिचक्रात् सुषुम्ना वर्त्मना परमात्मनि सापेक्षं लीनो भव। पादादिमूर्धान्तं। ओं ह्रीं योनिमुद्रायै नमः। इति मुद्रां प्रदर्श्य। ओं लां नमः पराय सर्वात्मने श्रीमतेनारायणाय नमः। ओं वां नमः पराय निवृत्यात्मने अनिरुद्धाय नमः। ओं रां नमःपराय विश्वात्मने प्रद्युंनाय नमः। ओं यां नमःपराय पुरुषात्मने संकर्षणाय नमः। ओं षौं नमःपराय परमेष्ठ्यात्मने वासुदेवाय नमः।

ब्रह्महत्याशिरस्कन्धं स्वर्णस्तेयं भुजद्वयम्।
सुरापानहृदायुक्तं गुरुतल्प कटिद्वयम्।
तत्संयोगि पदद्वन्द्वं रक्तश्मश्रु विलोचनम्।
उपपातकरोमाणमंगप्रत्यंग संयुतम् ।
खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिन्तयेत्।

इतिरीत्या ध्यात्वा। पादाग्रे रक्तवर्णाय त्रिकोणायाग्नये नमः। तज्ज्वालया देहमापादतलमस्तकं दहामि। ओं लं लं लं उत्थितमग्निं स्तंभयामि। आकाशे ओं वं वं वं अमृतबीजं ध्यायामि। तदुत्थामृतधारया तद्भस्मं प्लावयामि। ओं पृथ्वी बीजस्य मेरुपृष्ठ ऋषिः। अतलं छन्दः। श्री कूर्मो देवता। प्लावितभस्म पिण्डीकरणार्थेविनियोगः।

''ओं भूमिर्भूम्ना'' इत्यारभ्य ''पितरंच प्रयन्त्स्तुवः''। इत्यन्तं जप्त्वा। ओं लं लं लं श्यामवर्णाय पृथिव्यात्मने नमः। प्लावित भस्मकूटं पिण्डीकरोमि। ''आकाश शरीरं ब्रह्मा'' इत्यारभ्य

''योग्योपास्व'' ओं श्रीं ह्रीं शक्तिबीजेन सर्ववर्णेन सर्वात्मना शरीरं सकरचरणाद्यवयवं करोमि। ओं सृष्टिमुद्रायै नमः। आकाशे 'ओं वां नमः पराय निवृत्यात्मने नमःइत्यमृत बीजं ध्यायामि।तस्मात् ओं पीयूषनिधये नमः। इति ध्यायन् तस्मिन् ओं श्वेतायाव्यक्त पंकजाय नमः। इति पद्मं ध्यात्वा। तस्मिन् परब्रह्मणः सकाशात् जीवमुत्पन्नं स्मरामि। ओं मं नमः पराय स्फटिकाभासाय जीवतत्वात्मने नमः। आं ह्रीं क्रों यरलवशष सह ओं मं हं सः हे जीव परब्रह्मणस्संकाशात् एतस्मिन् श्वेतपंकजे सापेक्षमागच्छ। ओं मं जीव मुद्रायै नमः।तर्जन्यंगुष्ट पर्वनिवेशो जीवमुद्रा। तां प्रदर्श्य। ओं भं नमः पराय सितवर्णाय प्रकृत्यात्मने नमः। जीवात् ओं श्रीं ह्रीं नमः त्रिगुणात्मिकां प्रकृतिं सृजामि। ओं भं नमः पराय स्फटिकाभासाय बुद्धितत्वात्मने नमः। प्रकृतेः वाण्यात्मिकां बुद्धिंसृजामि। ओं फं नमः पराय पाटलवर्णाय अहंकारात्मने नमः बुद्धेःअहंकृतिं सृजामि। ओं पं नमः पराय सितासित वर्णाय मनस्तत्वात्मने नमः अहंकारात् मनस्तत्वं सृजामि। ओं नं नमः पराय शुक्लवर्णाय शब्दतन्मात्रात्मने नमः। मनसः शब्दतन्मात्रां सृजामि। शब्दतन्मात्रायाः ओं ह्रौं ह्रीं ह्रीं सकलरौं आकाशाधिपतये सदाशिवाय ईशानाय वासुदेवाय शांत्यादिकलात्मने हुंफट् भिन्नाञ्जनवर्णं वाक्श्रोत्रेन्द्रिययुतं शब्दगुणं ओं कं नमः पराय आकाशतत्वं सृजामि। ओं धं नमः पराय लोहितवर्णाय स्पर्शतन्मात्रात्मने नमः स्पर्शतन्मात्रां सृजामि। स्पर्शतन्मात्रायाः ओं ह्रैं णं सकलरैं वाय्वाधिपतये ईश्वराय तत्पुरुषाय संकर्षणाय शांतिकलात्मने हुं फ़ट् धूम्रं वृत्तं त्वक्करेन्द्रिययुतं शब्दस्पर्शगुणं ओं खं नमः पराय वायुतत्वं सृजामि। वायोः ओं दं नमः पराय ज्योतिर्वर्णाय रूपतन्मात्रात्मने नमः रूपतन्मात्रां सृजामि।रूपतन्मात्रायाः ओं ह्रूं ण्यं ह्रीं सकलरूं अग्न्याधिपतये रुद्राय घोराय प्रद्युंनाय विद्याकलात्मने हुं फट् शब्दस्पर्श रूपगुणसहितं दृष्टिचरणेन्द्रिययुतं पाटलवर्णं त्रिकोणं ओं गं नमः पराय अग्नितत्वं सृजामि। अग्नेः ओं थं नमःपराय पाण्डरवर्णाय रसतन्मात्रात्मने नमः रसतन्मात्रां सृजामि। रसतन्मात्रायाः ओं ह्रीं षं ह्रीं सकलरीं अंबोधिपतये ब्रह्मणे वामदेवाय धनुर्धराय प्रतिष्ठाकलात्मने हुंफट् रसनापाय्विन्द्रियसहितं शब्दस्पर्श रूप रस गुणयुतं श्वेतवर्णं अर्धचन्द्राकृतिं ओं घं नमःपराय अप्तत्वं सृजामि। अप्तत्वात् ओं तं नमःपराय सितवर्णाय गन्धतन्मात्रात्मने नमः। गन्धतन्मात्रां सृजामि. गन्धतन्मात्रायाःओं ह्रां झं लं ह्रीं सकलरां पृथिव्यधिपतये विष्णवे सद्योजाताय नारायणाय निवृत्तिकलात्मने हुं फट् पीताभं चतुरश्रं घ्राणोपस्थेन्द्रिययुतं शब्दस्पर्शरूपरसगन्धगुणं ओं ङं नमः पराय पृथिवीतत्वं सृजामि। एवं पाञ्चभौतिकं सप्तधातुमयं षण्णवत्यङ्गुलायतं दिव्यं शरीरं कल्पयामि। ओं षौं नमःपराय परमेष्ठ्यात्मने वासुदेवाय नमः। ओं यां नमःपराय पुरुषात्मने संकर्षणाय नमः।ओं

रां नमःपराय विश्वात्मने प्रद्युंनाय नमः । ओं वां नमःपराय निवृत्यात्मने अनिरुद्धाय नमः। ओं लां नमःपराय सर्वात्मने श्रीमतेनारायणाय नमः। ओं मं नमः पराय स्फटिकाभासाय जीवतत्वात्मने नमः ओं ह्रीं क्रों यरलवशष सह ओं मं हं सह हे जीव श्वेतपङ्कजात् मम हृत्कमले सापेक्षमागच्छ। उपरि ओं प्रबुद्धाय पंकजाय नमः । तदुत्पन्नामृतपूरितैर्हैमकुम्भै दिव्यनारीकरधृतैरात्मानं अभिर्षिचामि। हरेराराधनयोग्यं शुद्धं अनघं ममशरीरं अर्चयामि। ओं अस्मत् गुरुभ्यो नमः।

<u>मातृका न्यास</u> मंत्रस्य। ब्रह्मा ऋषिः। देवीगायत्री छंदः।मातृका सरस्वती देवता । हलो बीजानि। स्वराः शक्तयः। सकलमंत्रोपब्रह्मणार्थे विनियोगः । ओं अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः । ओं इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा। ओं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट् । ओं एं तं थं दं धं नं ऐं अनामिकाभ्यां हुं। ओं पं फं बं भं मं औं कनिष्टिकाभ्यां वौषट् । ओं अं यं रं लं वं शं षं सं हं ळं क्षं अः नखमुखेभ्यः फट् । एवं षडङ्गन्यासश्च।

पञ्चाशद्वर्णभेदैर्विहित वदनदोःपादहृत् कुक्षिवक्षो।
देहांभास्वत् कपर्दा कलितशशिकलां इंदुकुन्दावदाताम्।
अक्षसृक्कुंभचिह्नां लिखितवरकरां त्रीक्षणां पद्मसंस्थां।
इच्छाकल्पां अतुच्छस्तनजघनभरां भारतीं तां नमामि।

अथ केशवादि मातृकान्यासः। ओं अं केशवकीर्तिभ्यां नमः ललाटे। ओं आं नारायण कांतिभ्यां नमः मुखे । ओं इं माधवतुष्टिभ्यां नमः । ओं ईं गोविंद पुष्टिभ्यां नमःनेत्रयोः। ओं उं विष्णुधृतिभ्यां नमः। ओं ऊं मधुसूदनशान्तिभ्यां नमः श्रोत्रयोः । ओं ऋं त्रिविक्रमक्रियाभ्यां नमः । ओं ॠं वामनदयाभ्यां नमः नासापुटयोः ओं ऌं श्रीधरमेधाभ्यां नमः। ओं ॡं हृषीकेश हर्षाभ्यां नमः गण्डयोः। ओं एं पद्मनाभ श्रद्धाभ्यां नमः. ओं ऐं दामोदरलज्जाभ्यां नमः । दन्तपङ्क्तयोः । ओं ओं वासुदेव लक्ष्मीभ्यां नमः। ओं औं संकर्षण सरस्वतीभ्यां नमः ओष्टयोः। ओं अं प्रद्युम्न प्रीतिभ्यां नमः रसनाग्रे । ओं अः अनिरुद्ध रतिभ्यां नमः मुखमण्डले।ओं कं शंखि छायाभ्यां नमः। ओं खं चक्रि जायाभ्यां नमः । ओं गं गदि दुर्गाभ्यां नमः । ओं घं खड्गि सत्याभ्यां नमः।ओं ङं शार्ङ्गि प्रभाभ्यां नमः । दक्षिणबाह्वौ पञ्चविभागशः।

ओं चं हलिवाणिभ्यां नमः । ओं छं मुसलिविलासिनीभ्यां नमः । ओं जं शूलिलयाभ्यां नमः । ओं झं पाशिविनताभ्यां नमः । ओं ञं अंकुशविश्वाभ्यां नमः वामबाहौ पञ्चविभागशः।

ओं टं मुकुंदविमदाभ्यां नमः । ओं ठं नन्द सुनंदाभ्यां नमः। ओं डं नंदिस्मृतिभ्यां नमः । ओं ढं नरजङ्घिभ्यां नमः। ओं णं नरकजित् समृद्धिभ्यां नमःतथा दक्षिणपादे।

ओं तं हरिशुद्धिभ्यां नमः। ओं थं कृष्णबुद्धिभ्यां नमः। ओं दं सत्यभुक्तिभ्यां नमः। ओं धं सत्वमतिभ्यां नमः। ओं नं शौरि क्षमाभ्यां नमः तथा वामपादे।

ओं पं शूररमाभ्यां नमः । ओं फं जनार्दनोमाभ्यां नमः । कुक्षिपार्श्वयोः। ओं बं भूधरक्लेदिनीभ्यां नमः पृष्ठे। ओं भं वैकुण्ठ वसुधाभ्यां नमः पायौ। ओं मं विश्वमूर्ति संक्लिन्नाभ्यां नमःमेहने ।

ओं यं पुरुषोत्तमप्रथाभ्यां नमःनाभौ । ओं रं बलापराभ्यां नमः कुक्षौ । ओं लं बलानुजधारणाभ्यां नमःहृदये । ओं वं बालसूक्ष्माभ्यां नमःकण्ठे । ओं शं विषघ्नसन्धिभ्यां नमः ओं षं वृषप्रज्ञाभ्यां नमःस्तनयोः । ओं सं हंसप्रभाभ्यां नमः, ओं हं वराहनिशाभ्यां नमः भुजयोः। ओं क्षं ओं श्रीं ह्रीं क्लीं क्ष्रौं ओं नमोनारायणाय क्षं नृसिंहमोहाभ्यां नमःमुखे।

अस्य **श्रीमदष्टाक्षर** महामन्त्रस्य । अन्तर्यामी नारायणऋषिः, देवीगायत्री छन्दः, परमात्मा नारायणःदेवता,अम् बीजम्, ह्रीं शक्तिः,मम् कीलकम्, परमव्योमक्षेत्रम्, बुद्धिःतत्वम्, शुक्लादिवर्णः, उदात्तादिःस्वरः, भगवत्समाराधनार्थे विनियोगः।

करन्यासः

ओम् ओम् ओम्	ओम् यम् ओम्
ओम् नम् ओम्	ओम् णाम् ओम्
ओम् मोम् ओम्	ओम् यम् ओम्
ओम् नाम् ओम्	ओम् राम् ओम्
दक्षिण तर्जनीम् आरभ्य	वाम तर्जनीम् आरभ्य
कनिष्टान्तम् पर्वसु।	कनिष्टान्तम् पर्वसु।

ओम् राम् ओम् अङ्गुष्ट कनिष्टिकाभ्याम् नाभौ ।
ओम् यम् ओम् अङ्गुष्टम् विना सर्वाभिर्मेहने ।
ओम् णाम् ओम् तथैव जानुनि ।
ओम् यम् ओम् समस्ताङ्गुलीभिःचरणयोः।
ओम् ओम् ओम् मध्यमया मूर्ध्निमध्ये।

ओम् नम् ओम् तर्जनी मध्यमाभ्याम् नेत्रयो: ।
ओम् मोम् ओम् अङ्गुष्टानामिकाभ्याम् मुखे ।
ओम् नाम् ओम् अङ्गुष्ट तर्जनीभ्याम् हृदये ।

ओम् क्रुद्धोल्काय स्वाहा ज्ञानाय हृदयाय नम: ।
ओम् महोल्काय स्वाहा ऐश्वर्याय शिरसे स्वाहा ।
ओम् वीरोल्काय स्वाहा शक्त्यै शिखायै वषट् ।
ओम् विद्युल्काय स्वाहा बलाय कवचाय हुम् ।
ओम् सहस्त्रोल्काय स्वाहा वीर्यायअस्त्राय फट् ।
ओम् तेजोल्काय स्वाहा तेजसे नेत्राभ्यांवौषट्।
(ओम् किरीट मुद्रायै नम: शिरसि ओम् श्रीवत्स मुद्रायै नम: दक्षिणोरसि
ओम् कौस्तुभ मुद्रायै नम: वामोरसि ओम् वनमाल मुद्रायै नम: कण्ठे
ओम् चक्र मुद्रायैनम:,ओम् पद्म मुद्रायै नम:दक्षिण भागे।
ओम् शंखमुद्रायै नम:, ओम् गदा मुद्रायै नम: वाम भागे:,गरुड मुद्रायै नमः पादाग्रे)

ध्यानम्

चतुर्भुज मुदाराङ्गम् चक्राद्यायुध सेवितम्।
काळमेघ प्रतीकाशम् पद्मपत्रायतेक्षणम् ।।
पीतांबरधरम्सौम्यम् प्रसन्नेन्दुनिभाननम्।
चारुहासम् सुताम्रोष्टं रत्नोज्वलितकुण्डलम्।।
सुभ्रुललाटमकुटं घनकुञ्चितमूर्धजम्।
ललाटतिलकं सौम्यं दीपवत् श्वेतमृत्स्नया।।
स्फुरत्कटककेयुर हारकौस्तुभभूषितम्।
स्फुरत्भास्वरवर्णाभं शोभितं वनमलया।
प्रद्योतनसहस्त्राभं भूषणैरपि मण्डितम्।
दिव्यचंदनलिप्ताङ्गं दिव्यमाला विभूषितम्।
श्रीभूमिभ्याम् सुखासीनम् स्वर्ण सिंहासनेशुभे।

ध्यात्वैवम् देवदेवेशम् मन्त्रजापपरो भवेत् ।।

शुक्लम् हिरण्मयम् कृष्णम् रक्तम् कुङ्कुम सन्निभम्।

पद्मकिञ्जल्क सदृशम् सर्ववर्णकमष्टकम्। इति ध्यायन् मन्त्रं जपेत्।

द्वादशाक्षर विधि:

अस्य श्री द्वादशाक्षर महामन्त्रस्य.श्रीवासुदेवः ऋषि: देवी गायत्री छंदः

परमात्मा वासुदेवोदेवता.अंबीजम् ,क्रोम् शक्ति:श्वेतो वर्ण: बुद्धि:तत्वम्

परमव्योमक्षेत्रम्,भगवत्समाराधनार्थे जपेविनियोग:

कर न्यासः

ओम् ओम् ओम्	**ओम् यम् ओं**
ओम् नम् ओम्	**ओम् वाम् ओं**
ओम् मोम् ओम्	**ओम् दें ओं**
ओम् भम् ओम्	**ओम् सुं ओं**
ओम् गम् ओम्	**ओम् वाम् ओं**
ओम् वम् ओम्	**ओम् तेम् ओम्**
दक्षतल मारभ्य कनिष्टान्तम्	**वामतल मारभ्य कनिष्टान्तम्**

देह न्यास:

ओम् सुम् ओम् अङ्गुष्टकनिष्टिकाभ्याम् नाभौ।.

ओम् देम् ओम् अङ्गुष्ट तर्जनीभ्याम् गुह्ये।

ओम् वाम् ओम् अङ्गुष्टम् विना जान्वो:।

ओम् यम् ओम् सर्वाङ्गुलीभि: चरणयो:।

ओम् ओम् ओम् अङ्गुष्टेन शिरस:पूर्वभागे

ओम् नम् ओम् तर्जन्या शिरस:दक्षिणे।

ओम् मोम् ओम् अनामिकयापश्चिमे।

ओम् भम् ओम् कनिष्टिकयाउत्तरे।

ओम् गम् ओम् मध्यमया मूर्ध्निमध्ये।
ओम् वम् ओम् तर्जनीमध्यमाभ्यां नेत्रयो:।
ओम् तेम् ओम् अङ्गुष्ट अनामिकाभ्यां मुखे।
ओम् वाम् ओम् अङ्गुष्टतर्जनीभ्यां हृदये।
ओम् ओम् ओम् ज्ञानाय हृदयाय नम:।
ओम् नम् ओम् ऐश्वर्याय शिरसे स्वाहा ।
ओम् मोम् ओम् शक्त्यै शिखायै वषट् ।
ओम् भम् ओम् बलाय कवचाय हुम् ।
ओम् गम् ओम् तेजसे नेत्राभ्याम् वौषट् ।
ओम् वम् ओम् वीर्याय अस्त्राय फट् ।
ओम् तेम् ओम् उदराय नम:।
ओम् वाम् ओम् पृष्टाभ्याम् नम: ।
ओम् सुम् ओम् बाहुभ्याम् नम: ।
ओम् देम् ओम् ऊरुभ्यां नम: ।
ओम् वाम् ओम् जानुभ्याम् नम: ।
ओम् यम् ओम् पादाभ्याम् नम: ।
ओम् किरीट मुद्रायै नम: शिरसि ।
ओम् श्रीवत्स मुद्रायै नम: दक्षिणोरसि ।
ओम् कौस्तुभ मुद्रायै नम: वामोरसि ।
ओम् वनमाल मुद्रायै नम: कण्ठे ।
ओम् चक्र मुद्रायै नम:। ओम् पद्ममुद्रायै नम: दक्षिण भागे।
ओम् शंख मुद्रायै नम: । ओम् गदा मुद्रायै नम: वाम भागे।
ओम् गरुड मुद्रायै नम: ।पादाग्रे।

ध्यानम्

चतुर्बाहुमुदाराङ्गं सर्व लक्षणलक्षितम्।
शुद्ध स्पटिक वर्णाभम् अयुतेन्दु समप्रभम्।

चारुहासम् सुताम्रोष्टम् कर्णान्तायतलोचनम्।
निर्धूत पद्मरागाभम् दन्तछविसुशोभितम्।
महोरस्कम् महाबाहुम् प्रसन्नेन्दुनिभाननम्।
सुभ्रू ललाटम्सुमुखम् घनकुञ्चित मूर्धजम्।
तटिछत सहस्त्राभम् पीतनिर्मलवाससम्।
पाणिपादतलांभोजम् पुण्डरीकायतेक्षणम्।
श्रीवत्साङ्गम् किरीटादि सर्वाभरण भूषितम्।
पद्म चक्र गदा शंखधारिणम् कौस्तुभोरसम्।
दिव्यगन्धविलिप्ताङ्गम् दिव्यमालाविभूषितम्।
शेषाहिभोगे विपुले सुखासीनम् चतुर्मुख।
श्रीभूमि सहितम् देवम् ललाटेश्वेतमृत्स्नया।
कृतोर्ध्व पुण्ड्रतिलकैः मण्डितम् चण्ड भानुभिः।
नियुतै रयुतैश्चन्द्रैः विद्युत्कालाग्निकोटिभिः।
समवेतैरिवैकत्र तेज:पुञ्जै: विसर्पिभिः।
भ्राजमानं दुरालोकम् देहमण्डल निर्गतै:।
भासयन्तंजगत्सर्वम् ध्यायेत् प्रक्षीण कल्मष:।
सितम् कृष्णंच धूम्राभम् श्यामंतारानिभं तथा।।
स्पटिकाभंच शङ्काभम् रक्तम् शुक्लं च लोहितम्।।
तमोरूपम् पीतवर्णम् ध्यायेन् मन्त्रद्विषाक्षरम्। इति ध्यात्वा ।

षडङ्गस्य

रूपाणिषण्णां कुमुदं बंधूकं असितोत्पलम्।
अब्जकेसरमंभोजंअतसीसून संपदम्। इति।
आत्मानं दिव्यायुध वस्त्रमाल्यानुलेपन कौस्तुभ वनमाला श्रीवत्स दिव्यलक्षण धरं साक्षात् परमेश्वरं ध्यायामि इति ध्यात्वा। न्यस्त बीजानि गन्धादिभिः अभ्यर्च्य । तदनु हृदयकमलमध्यं अध्यासीनं भगवन्तं मानसोपचारैः होमान्तैः वक्ष्यमाणविधिना. अर्चयेत्।

मानसयाग विधिः उच्यते

अत्र तु हृत्कर्णिकाधारे वा यत्र कुत्र वा भगवन्मूर्तौ वा मूलमन्त्रशरीरस्थपरिवार यजनेन कृतोलययागः। कर्णिकामध्ये मन्त्रराजस्य केसरेषु लक्ष्म्यादीनां च यजनं भोगाभिधः।
कमलादीनां पृथक्त्वेन यजनं अधिकाराभिधः । एवं लयभोगाधिकारान् ज्ञात्वा नादावसान गगनस्थं हृदयकमलमध्ये भोगाभिधयागविधिना आवाह्य । वक्ष्यमाणेन वर्त्मना यजेत् । पद्मासनादि कमलासनं बद्धा। नाभौ ब्रह्माञ्जलिं कृत्वा। ऋजुकायः नासाग्रन्यस्थनयनः दन्तैः दन्तान् असंस्पृश्य। तालुनिजिह्वां विन्यस्य. किञ्चित् कुञ्चितशिराः श्लथबाहुद्वयः आचार्यः बाह्येन्द्रियाणि मनसि उपरितानि कृत्वा।मनः बुद्धौ, बुद्धि ज्ञानगोचरां विधाय ज्ञानभावनया पारमार्थिकं कर्म कुर्यात्।

नाभिमेढ्रान्तरे चतुर्धाभाजितेषु पदेषु क्रमात् आधारादीन् स्मरेत्. ओं अस्मद्गुरुभ्यः नमः । नाभिमेढ्रान्तरे ओं ह्रीं ङं घं गं खं कं पृथिव्यप्तेजोवय्वाकाश पञ्चभूतमयाय स्वसत्वविभवान्तस्थाय **आधाराय** नमः । शान्तं उज्झितचेष्टं सितं अन्तर्मुखस्मितं आधायोल्लिङ्गिताकारं आधारंस्मरामि ।
उपरि ज्ञौं घ्रूं ज्वालौघ विभवांतस्थाय नं धं दं थं तं शब्दस्पर्शरूपरस गन्धगुणयुताय **कालाग्निरूपाय कूर्माय** नमः । कूर्ममुद्रान्वितं कूर्मवक्त्रं निष्टप्तकाञ्चननिभं शङ्खचक्रधरं स्वस्तिकेन स्थितं कूर्मं ध्यायामि। उपरि ओं अं स्वभोगविभवान्तस्थाय ञं झं जं छं चं वाक्पाणिपादपायूपस्थयुताय **अनन्ताय** नमः । अनन्तसशिसंकाशं सहस्रफणालङ्कृतं सहस्रभुजं स्वपाणिसंपुटेन भुवं दधानं सितारविन्द शंखाक्षसूत्राऽभयकरं **अनन्तं** ध्यायामि. उपरि ओं भूं काञ्चन विभवान्तस्थायै णं ढं डं ठं टं श्रोत्र त्वक्चक्षुर्जिह्वाघ्राणयुतायै **भूम्यै** नमः । निश्शेषरत्नहेमाङ्गां प्रावृट्टिच्छ्रयमिवोज्ज्वलां पद्मासनोपविष्टां पद्माञ्जलिधरां **भुवं** ध्यायामि।नाभौ ओं वं अमृतसार विभवान्तस्थाय पं मनस्तत्वयुताय **क्षीरार्णवाय** नमः। फुल्लकुन्दावदातं सितस्निग्धजटाधरं शंखं ध्मायमानं मुक्तादामविराजितं विस्तीर्ण सर्वावयवं विक्षिप्तोरुद्वयं स्थितं विक्षिप्तजानुपादं क्षीरार्णवं ध्यायामि. उपरि ओं फं अहंकारतत्वयुताय स्वबीजकोश किसलयदल विभवान्तस्थाय **अनन्तदलपद्माय** नमः । सुपक्काम्रफलश्यामपाणिपदतलोज्ज्वलं रक्ताक्षं विप्रकीर्णकेशं स्मिताननं पद्मासनस्थितं अलिमालावृतं सुदीर्घचरणं पद्ममुद्रान्वितं पद्मं ध्यायामि। तस्मिन् आग्नेये ओं वं बुद्धितत्वयुताय विवेकविभवान्तस्थाय धर्माय नमः। तुहिनवर्णम् मृगेन्द्रवदनं **धर्ममूर्तिं ध्यायामि** । नैऋते ओं वं बुद्धितत्वयुताय विवेकविभवान्तस्थाय ज्ञानमूर्तयेनमः।**अच्छोपलवर्णं मृगेन्द्रवदनं ज्ञानमूर्तिं** ध्यायामि।वायव्ये ओं बं बुद्धितत्त्वयुताय

विवेकविभवान्तस्थाय वैराग्याय नमः । मुक्ताफलरुचिं मृगेन्द्रवदनं वैराग्यमूर्तिं ध्यायामि । ऐशाने ओं बं बुद्धितत्वयुताय अविद्याविभवान्तस्थाय ऐश्वर्याय नमः । शशिवर्णं मृगेन्द्रवदनं ऐश्वर्यमूर्तिं ध्यायामि । पूर्वेओं बं बुद्धितत्त्वयुताय अविद्याविभवान्तस्थाय अधर्मायनमः । पद्मरागवर्णं मृगेन्द्रवदनं अधर्ममूर्तिंध्यायामि । दक्षिणेओं बं बुद्धितत्त्वयुताय अविद्याविभवान्तस्थाय अज्ञानाय नमः।प्रवालवर्णं मृगेन्द्रवदनं अज्ञानमूर्तिं ध्यायामि।पश्चिमे ओं बं बुद्धितत्त्व युताय अविद्या विभवान्तस्थाय अवैराग्याय नमः।अग्निवर्णं मृगेन्द्रवदनं अज्ञानमूर्तिंध्यायामि।उत्तरे ओं बं बुद्धितत्त्वयुताय अविद्याविभवान्तस्थाय अनैश्वर्याय नमः। **दाडिमफलवर्णं मृगेन्द्रवदनं अज्ञानमूर्तिं** ध्यायामि।

प्रागीशानदिङ्मध्ये- ओं बं बुद्धितत्त्वयुताय वाक्प्रपञ्चविभवान्तस्थाय ऋग्वेदाय नमः।हेमवर्णं वाजिवक्त्रं ऋग्वेदं ध्यायामि।प्रागाग्नेयदिगंतरे ओं यं बुद्धितत्वायुताय वाक्प्रपञ्च विभवान्तस्थाय यजुर्वेदाय नमः । चंपकवर्णं वाजिवक्त्रं यजुर्वेदं ध्यायामि।

निऋतिवरुण मध्ये ओं बं बुद्धितत्वयुताय वाक्प्रपञ्च विभवान्तस्थाय सामवेदाय नमः । खद्योतवर्णं वाजिवक्त्रं सामवेदं ध्यायामि।

वायव्य वरुणान्तरे- ओं बं बुद्धितत्वयुताय वाक्प्रपञ्च विभवान्तस्थाय अथर्वणवेदाय नमः । हरितालवर्णं वाजिवक्त्रं अथर्वणवेदं ध्यायामि।ईशानसोमदिङ्मध्ये- ओं बं बुद्धितत्वयुताय त्रुट्याद्याकल्प विभवान्तस्थाय कृतयुगाय नमः । वृषेन्द्रवदनं सुपक्वाम्रफलवर्णं कृतयुगं ध्यायामि । अन्तकाऽग्न्यन्तरे- ओं बं बुद्धितत्वयुताय त्रुट्याद्याकल्प विभवान्तस्थाय त्रेतायुगाय नमः। अतसीपुष्पनिभं वृषेन्द्रवदनं त्रेतायुगं ध्यायामि।याम्यराक्षसमध्ये- ओं बं बुद्धितत्वयुताय त्रुट्याद्याकल्प विभवान्तस्थाय द्वापरयुगाय नमः। वृषेन्द्रवदनं नीलाब्जवर्णं द्वापरयुगं ध्यायामि । सोमसामीरणान्तरे- ओं बं बुद्धितत्वयुताय त्रुट्याद्याकल्प विभवान्तस्थाय कलियुगाय नमः। वृषेन्द्रवदनं शुक्लवर्णं कलियुगं ध्यायामि।एतान् संपूर्णनर लक्षणान् सद्वस्त्र सत्पुष्पसदलङ्करणान्वितान् शंख पद्म वराभयकरान् आधेयचक्रविन्यस्तमस्तकान् स्वात्मसिद्धये परस्मिन् मन्त्राकरणे समर्पितान्तः करणान् षोडशवार्षिकान् ध्यायामि।

उपरि ओं रं वं हं धामत्रयाश्रयाय ह्रीं भ्रमन्मायाविभवान्तस्थाय कालचक्राय नमः. युगान्तार्काग्निसंकाशं स्वगोमण्डलमध्यगं स्वमुद्राव्यग्रपार्णिं वल्गन्तं हेतिराजं ध्यायामि । उपरि ओं भं प्रकृति तत्वयुताय गौणिवृत्तविभवान्तस्थाय अव्यक्तपद्माय नमः। हिमहेमाग्निभास्वरं

वायव्योद्भूतनालं शान्तं अष्टभुजं स्वस्तिकेनस्थितं सौम्यं ऊर्ध्वमुखं विकाराधारसुस्थितं हृत्पुण्डरीकरूपं अव्यक्तपद्मं ध्यायामि। उपरि ओं मं चिदादित्यस्वरूपाय विमलादिकलाजाल विभवान्तस्थाय जीवात्मने नमः। स्फटिकोपलकान्ति चिद्घनं ध्रुवं अव्यक्तं सर्वशक्तिनिधिं अमूर्तं चित्प्रभाकारं जीवं ध्यायामि।

देहमध्ये- ओं सुषुम्नानाडिकायै नमः। नाभिकन्दात् ब्रह्मरन्ध्रेण सूर्यपथात् परगतां पायुद्वारेण पातालं भित्वा स्वगोचरं यातां सूत्रे मणिगणवत् स्वप्रतिष्ठित सर्वसंकल्पविषयां त्रिदीप्तिभास्वरां सुषुम्नाभिधां मध्यनाडिकां ध्यायामि। जीवात्मनः उपरि- ओं ह्रीं ऐं क्लीं सौः नानामन्त्रगणरूपिण्यै शब्दब्रह्मशक्त्यै नमः । सर्वमन्त्र जननीं आकारादि हान्तं धारासंतानरूपं वर्णजं नादं नदन्तीं परां वाक्भ्रमरीं शब्दब्रह्मेदिविश्रुतां शान्तात्मनां शक्तिं ध्यायामि। उपरि नादावसानगगने-ओंनमोभगवतेवासुदेवाय । शान्तं सनातनं संवित्स्वरूपं नित्यतृप्तनिरञ्जनं सर्वाकारं अमूर्तं भक्तानुग्रहकाम्ययामूर्ततांगतं अनुपमं सहस्त्रविवह्नींदु लक्षकोटिसमप्रभं देवं ध्यायामि । इति ध्यात्वा। तदनु ओं अस्मद्गुरुभ्यः नमः इति ध्यायेत् । हृत्कमलदळेषु पूर्वादिषु-ओं उत्कर्षिण्यै नमः।ओं ज्ञानायै नमः । ओं क्रियायै नमः।ओं योगिन्यै नमः । ओं प्रह्वयै नमः । ओं सत्यायै नमः। ओं ईशान्यै नमः । कर्णिकायां ओं अनुग्रहायै नमः ।

ओं सहस्त्रशीर्षापुरुषः । सहस्त्राक्षस्सहस्त्रपात् । स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम् । ओं नमोभगवतेवासुदेवाय, अव्यक्तपङ्कज कर्णिकामध्ये आगच्छागच्छ।

पुरुषएवेदँसर्वं यद्भूतं यच्छभव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। आसनं समर्पयामि।

स्वागतं देवदेवेश सन्निधिं भज मेऽच्युत।
गृहाणमानसीं पूजां यथार्थं परिभावितम्।

ओं आवाहनमुद्रायै नमः। ओं स्थापन मुद्रायै नमः।ओं सन्निधान मुद्रायै नमः।ओं सन्निरोध मुद्रायै नमः। ओं सांमुख्यमुद्रायै नमः। ओं प्रार्थनामुद्रायै नमः। शिरसः उपरि- ओं पद्मान्तराकाशस्थितायै गंगायै नमः। सुषुम्नावर्त्मना भगवन्मूर्ध्निच्युतां अमृतमयीं गंगां ध्यायामि. इति ध्यात्वा । तज्जलेन अमृतमयेन अर्घ्यादिदानं स्मरेत् ।

एतावानस्य महिमा । अतो ज्यायाश्च पूरुषः। पादोस्यविश्वा भूतानि । त्रिपादस्यामृतं दिवि । पाद्यं समर्पयामि।

त्रिपादूर्ध्व उदैत्पुरुषः। पादोस्येहा भवात् पुनः। ततो विष्वङ् व्यक्रामत् । साशना नशने अभि। अर्घ्यं समर्पयामि।

तस्माद्विराडजायत। विराजो अधिपूरुषः।स जातो अत्यरिच्यत। पश्चात् भूमिमधो पुरः। आचमनं समर्पयामि।

ओं नमोभगवतेवासुदेवाय मन्त्रासनं कल्पयामि। देवस्य दक्षिणकेसरेषु-ओं श्रीं श्रियै नमः आगच्छागच्छा शब्दब्रह्मस्वरूपिणीं सर्वशक्तिमयीं श्रियं ध्यायामि। ओं श्रियै नमः पद्मासनं समर्पयामि। अमृतमयं पाद्यं समर्पयामि।अर्घ्यं समर्पयामि। आचमनीयं समर्पयामि।मन्त्रासनं कल्पयामि। श्री देवी मंत्रस्य।मंकणऋषिः। गायत्रीछन्दः। श्रीर्देवता।श्रीं बीजं।ह्रीं शक्तिः।क्लीं कीलकं। समाराधनार्थे विनियोगः।

ओम् श्रां हृदयाय नमः ।

ओम् श्रीं शिरसे स्वाहा ।

ओम् श्रूं शिखायै वषट् ।

ओम् श्रैं कवचाय हुम् ।

ओम् श्रौं नेत्राभ्यांवौषट्।

ओम् श्रः अस्त्राय फट् ।ओम् कमल मुद्रायै नमः ।

देवस्य वामे-ओं भूं भूम्यै नमः आगच्छागच्छा, सर्वशक्तिमयीं भूमिं ध्यायामि । ओं भूम्यै नमः कल्पयामि । अमृतमयं पाद्यं समर्पयामि।अर्घ्यं समर्पयामि।आचमनीयं समर्पयामि । मन्त्रासनं कल्पयामि । भूदेवी मंत्रस्य। कण्वऋषिः। गायत्रीछन्दः । भूर्देवता।ह्रीं बीजं। श्रीं शक्तिः। क्लीं कीलकं। समाराधनार्थे विनियोगः।

ओम् ह्रां हृदयाय नमः ।

ओम् ह्रीं शिरसे स्वाहा ।

ओम् ह्रूं शिखायै वषट् ।

ओम् ह्रैं कवचाय हुम् ।

ओम् ह्रौं नेत्राभ्यांवौषट्।

ओम् ह्रः अस्त्राय फट् । ओम् कमल मुद्रायै नमः ।परिवारकल्पनं करिष्ये । योगासनाब्जपत्रेषु, पूर्वादिषु, द्वादश दळेषु.

ओम् श्रीवत्साय नमः , ओम् वनमालायै नमः ,
ओम् योगमायायै नमः, ओं वैष्णव्यै नमः ,
ओम् विमलायै नमः , ओम् सृष्ट्यै नमः,
ओम् उत्कर्षिण्यै नमः , ओम् प्रज्ञायै नमः ,
ओम् सत्यायै नमः , ओम् ऐशान्यै नमः ,
ओम् अनुकम्पायै नमः , ओम् पितामह्यै नमः ।
एताः पुष्पाञ्जलि धरम् ध्यात्वा ।
ओम् व्याप्त्यै नमः , ओम् कांत्यै नमः ,ओम् तृप्त्यै नमः , ओम् श्रद्धायै नमः
ओम् विद्यायै नमः, ओम् जयायै नमः, ओम् क्षमायै नमः, ओम् शांत्यै नमः तत्परितः - द्वितीया वरणे ओम् शंखिने नमः, ओम् चक्रिणे नमः, ओम् गदिने नमः, ओम् शार्ङ्गिणे नमः, ओम् पाशिने नमः,ओम् अङ्कुशिने नमः ।
ओं इंद्राय नमः, ओम् अग्नये नमः, ओम् यमाय नमः, ओम् नैऋतये नमः,
ओं वरुणाय नमः, ओम् वायवे नमः, ओम् सोमाय नमः, ओम् ईशानाय नमः ।
त्रितीयावरणाद्बहिः भगवतः प्रति मुखे ओम् क्षम् वैनतेयाय नमः ।
ईशानदिशि ओम् विष्वक्सेनाय नमः । एताः भगवदभिमुखान् प्राञ्जलीन् ध्यायामि ।

ओं नमोभगवतेवासुदेवाय श्रीभूसहिताय स्नानासनं कल्पयामि । यत्पुरुषेणहविषा.....ग्रीष्म इद्मश्शरद्धविः। स्नानं समर्पयामि । ओं अलंकारासनं कल्पयामि। सप्तास्यासन् परिधयः.....पुरुषं पशुम्।
ओं वस्त्रं समर्पयामि। तं यज्ञं.....ऋषयश्च ये । उपवीतं समर्पयामि। तस्माद्यज्ञात्सर्वहुतः.....ग्राम्याश्च ये । ओं गन्धं समर्पयामि। तस्माद्यज्ञात्सर्वहुतः.....यजुस्तस्मादजायत । ओं पुष्पं समर्पयामि। तस्मादश्वा अजायंत.....अजावयः। ओं धूपं समर्पयामि । यत्पुरुषं व्यदधुः.....ओं दीपं समर्पयामि। ओं नमोभगवतेवासुदेवाय श्रीभूसहिताय भोज्यासनं कल्पयामि । ब्राह्मणोस्यमुखमासीत्.....पद्भ्यां शूद्रो अजायत । ओं अमृतमयं नैवेद्यं समर्पयामि । चन्द्रमामनसो जायत.....प्राणाद्वायुरजायत । ओं ताम्बूलं समर्पयामि।

ओं नमोभगवतेवासुदेवाय श्रीभूसहिताय आवाहनादि ताम्बूलान्तै स्संकल्प जनितैः पवित्रैरक्षयैश्शुभैः सांस्पर्शिक औपचारिकाभ्यवहारिकरूपैः सप्तलोकसमुद्भवैः यथोदितैः उत्कृष्टतर लक्षणैरमृतमयैर्भोगैः श्रीभूमिभ्यां सह संतुष्टोभव।ओं नमोभगवतेवासुदेवाय श्रीभूसहिताय सर्वालंकार संयुतानि धेनुयानानि समर्पयामि।

नाभ्या आसीद्.....तथालोकां अकल्पयन् । ओं श्रीभूसहितवासुदेवाय चरणौ शरणं प्रपद्ये । आनंदाश्रु परिप्लुतस्सन्नात्मानं सपुत्र पौत्रदारं भगवते समर्पयामि । ओं क्षं सर्वाभीष्टप्रदायिन्यै धेनुमुद्रायै नमः सुरभिमुद्रां प्रदर्श्य। तज्जातैरमृतमयैर्वस्तुभिःसंतुष्टो भव।अञ्जलिं सुवर्णपुष्पसंपूर्णं ध्यायामि । इति अञ्जलिं कृत्वा।तस्मिन् रेचकपूरककुम्भकैः प्रत्येकं मूलमंत्रमुच्छार्य, तस्मिन्-ओं नमो नारायणाय आगच्छ आगच्छ इति वह्नयर्केन्दुनिभं ध्यात्वा । सन्निरुद्ध्य । तं देवं मूर्ध्नि क्षिप्त्वा। भूयोप्यर्घ्यं पुष्पाञ्जलिं च वितीर्य। मूलमुद्रां प्रदर्श्य। लक्ष्म्यादीनां तत्तन्मुद्राश्च दर्शयित्वा। यथाशक्ति मूलमनुं जप्त्वा।स्तोत्रैः स्तुत्वा। श्रीभूमिसहितं वासुदेवं प्रसादयेत्।

मानसाग्निकार्य विधिः

अथ मानसाग्निकार्यविधिः उच्यते । नाभि चक्रमध्ये ओं गं भं ह्रीं त्रिगुणावृत्ताय त्रिकोणाय ओं रं प्रधानाग्नियुताय वह्निगृहाय नमः। नाभिचक्रे त्रिकोणकुण्डस्थं अग्निं ध्यायामि। ध्यानारणि मन्थनेन चिदग्निमुत्पादयामि । वासुदेवात्मकं शुद्धं संस्कृतं दीप्तं ऊर्ध्वशिखंचाग्निं ध्यायामि । इति ध्यात्वा। 'अदितेनुमन्यस्व' इत्यारभ्य 'देवसवितःप्रसुव' इत्यंतेनाऽमृतैः परिषेचनं ध्यात्वा

तज्ज्वालाग्रे ओंनमोभगवतेवासुदेवाय आगच्छागच्छेति मंत्रविग्रह मावाह्य । सन्निरुद्ध्य। पूर्ववदमृतेनार्घ्यादि स्मृत्वा । वितीर्य। अमृतमाज्यमुपरिष्टात् पद्मात् सुवर्णपात्रे सुषुम्नावर्त्मना परिच्युतं ध्यात्वा । तेनाज्येन नाभिचक्र त्रिकोण कुण्डस्थं चिदग्निज्वालाग्रा वस्थितं मंत्रविग्रहं मूलमंत्रेण स्वाहान्तेन संतर्प्य। 'अदितेन्वमग्गुस्थाः" इत्यारभ्य ' देवसवितः प्रासावीः"इत्यन्तेन परिषेचनं ध्यात्वा। अमृतमयं निवेदनं ध्यात्वा।पुनश्च हृदयकमलमध्ये नाभिचक्रे चिदग्निज्वालाग्रावस्थितं पूर्ववदावाह्य।तत्र स्थितं ध्यात्वा।ततः दक्षिणतः करकं तोयपुष्पाक्षतैः पूर्णं भावयित्वा। तन्मध्ये ओं नमोभगवते वासुदेवाय इति संस्मृत्य।तन्मध्ये ओं श्रीं श्रियै नमः। यागोक्तां भूसंपत्तिं लक्ष्मीरूपां ध्यायामि।इति ध्यात्वा। तन्मध्ये पुनरपि पूर्ववत् मूलमंत्रं स्मृत्वा। सशीर्षे जानुनी भूमौ कृत्वा। विष्णोर्निवेद्य। तं प्रसादाभिमुखं परितुष्टं विचिन्त्य

नमस्ते सर्वलोकेश भगवन् मंत्र विग्रह।

आराधयामि त्वां बिम्बे तावन्निवस मे हृदि।

इत्युक्त्वा । ततो बाह्यपूजां वक्ष्यमाणेन विधिना कुर्यात्।

अथ मंत्र शुद्धिः

ओं यं वायवे नमः मंत्रबीजानि शोषयामि।

ओं रं अग्नये नमः मंत्रबीजानि दहामि। ओं लं पृथ्व्यै नमः। अमृतधारया प्लावयामि। ओं हं मंत्रबीजानि शोधयामि। इति शोधनं कृत्वा। शुद्धमंत्रं अक्षमालया अष्टोत्तरशतं वा अष्टाविंशतिर्वा,बीजाद्यन्त संपुटितं जपेत्।

द्वयं मंत्र शुद्धिः।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

भूतशुद्धि मंत्रन्यासान्तर्याग, मानसाग्निकार्य,मन्त्रशुद्धिविधिःनाम सप्तविंशः परिच्छेदः

****

अष्टाविंशः परिच्छेदः

अथ सर्वाणिद्रव्याणि प्रक्षाळ्य । दक्षिणे च गळंतिकां प्रक्षाळ्य। अंबुपूरितां कृत्वा । वामे च पार्श्वे विन्यस्य। ओं वर्धन्याद्यर्चनपात्राधिदैवताय ओं वरुणाय नमः इत्यभ्यर्च्य । विष्णुगायत्र्याऽर्घ्यदिपात्राणि प्रक्षाळ्य। देवस्यात्मनो वाऽग्रे त्रिपादुकां विन्यस्य । तस्यां ओं रं त्रिपादुकाधिदैवताय ओं त्रेताग्नये नमः। इत्यावाह्याऽभ्यर्च्य। तदुपरि पात्राधारस्थालिकां विन्यस्य। तस्यां ओं लं पृथ्व्यै नमः इत्यावाह्याभ्यर्च्य । तदुपरि मध्य दक्षिण वामेषु पाद्यार्घ्यचमनीय पात्राणि निधाय । गालितोदकैरापूर्य। प्रणवेन स्पृष्ट्वा।कुशाग्राक्षत पुष्प फलचन्दन तिलसिद्धार्थ यवानर्घ्य पात्रे। तिल दूर्वाविष्णुपर्णी श्यामाक पद्माक्षताणिपाद्य पात्रे । एलालवंग कर्पूर जातीतक्कोल चंदनान्याचमनीयपात्रे च निक्षिप्य। दक्षिणहस्ते ओं रं द्वादशाराय चक्राय नमः तन्मध्ये ओं हं सूर्याय नमः इति ध्यात्वा। दीप्तैस्तद्रश्मिभिः द्रव्याणिदग्दानि ध्यात्वा । वामहस्ते षोडशदळयुताय

विकस्वराय श्वेतपद्माय नमः, तन्मध्ये ओं वं षोडशकलायुतायऽमृतमयाय चंद्रमसे नमः इति ध्यात्वा। तस्मादुत्थैः अमृतांबुभिर्द्रव्याणि सिक्तानि ध्यात्वा । तानि यागयोग्यानि विचिंत्य । हस्तयोरुभयोः ओं नमोनारायणायेति देवं ध्यात्वा । ताभ्यां द्रव्याणि संस्पृश्य । विष्णुगायत्र्याऽभिमंत्र्य । ओं सुरभिमुद्रायै नमः इति सुरभि मुद्रां प्रदर्श्य।तदुत्थेनामृतानि च पूरितानिपात्राणि विचिंत्य।

ओं अर्घ्यं कल्पयामि, ओं पाद्यं कल्पयामि, ओं आचमनं कल्पयामि इत्युच्छरन् तानि स्पृष्ट्वा । अर्घ्यापात्रात् किञ्चिज्जलं अन्यस्मिन् पात्रे गृहीत्वा । आधार स्तळिकोपरि विन्यस्य ।

अर्घ्यापात्रे ओम् विष्णवे नमः, पाद्य पात्रे ओम् मधुसूदनाय नमः, आचमनीय पात्रे ओम् त्रिविक्रमाय नमः इत्यावाह्य अभ्यर्च्य । पात्रान्तरस्तमर्घ्यजलम् वाम हस्ते संस्थाप्य । मूलमंत्रेण सप्तवारं अभिमन्त्रिय । तज्जलेन ओं सहस्त्रारहुम्फट्; इति द्रव्याण्यात्मानञ्च प्रोक्ष्य।

<u>देवस्य योगपीठं कल्पयेत्</u>

ओम् पृं ढृं आधार शक्त्यै नमः

ओम् ह्रं काल पावक कूर्मायनमः

ओम् हां सहस्त्र फणाधृत चतुरश्रभूमण्डलायअनन्ताय नमः

ओम् भूम् भूम्यै नमः .

तदुपरि आग्नेयादि कोणेषु.

ओम् धर्माय नमः , ओम् ज्ञानाय नमः ,ओम् वैराग्याय नमः , ओम् ऐश्वर्याय नमः ,

एतान् योगासनाङ्घ्रिरूपान् पुरुषाकृतीं चतुर्भुज़ान् सिंहवक्त्रान् स्थितान् ध्यायामि ।

ओम् अधर्माय नमः, ओम् अज्ञानाय नमः, ओम् अवैराग्याय नमः,

ओम् अनैश्वर्याय नमः, मध्ये ओम् सदाशिवाय नमः ।

एतान् अरुणवर्णान् पूर्वसदृशान् ध्यायामि । योगासनाङ्घ्रि अन्तरान्तर प्रागादिषु,ओम् ऋग्वेदाय नमः,

ओम् यजुर्वेदाय नमः,

ओम् सामवेदाय नमः, ओम् अथर्ववेदाय नमः,

ओम् कृतयुगाय नमः , ओं त्रेतायुगाय नमः , ओम् द्वापरयुगाय नमः,

ओम् कलियुगाय नमः एतानीषारूपेन ध्यायामि।

ओम् वैकारिक अहंकाराय नमः, ओम् तैजसिक अहंकाराय नमः,

ओम् भौतिक अहंकाराय नमः, एतान् पाशरूपेणयुतान् ध्यायामि.
ओम् सत्वगुणाय नमः, ओम् रजोगुणाय नमः, ओम् तमो गुणाय नमः,
एतान् गुणरूपेन ध्यायामि ।

ओम् ङं घं गं खं कं तूलिकारूपेभ्यो पृथिव्यप्तेजोवाय्वाकाशात्मने नमः । ओम् मं आस्तरण रूपाय जीवात्मने नमः ।तदुपरि ओम् रं अग्निमण्डलाय नमः । ओम् वं सोममण्डलाय नमः ।
ओम् हं सूर्य मण्डलाय नमः ।उपरि ओम् श्वेताय द्वादशदळयुताय विपुलकर्णिकाकेसरयुताय गुणत्रयात्मकाय अव्यक्तपद्माय नमः ओम् भद्रासनायनमः
इत्यासनान्तस्थदेवताश्च आवाह्य गन्धादि चतुर्भिरभ्यर्च्य.

पीठस्य दक्षिणेपार्श्वे ओम् ब्रह्मणे नमः, ओं विष्णवे नमः, ओम् ईश्वराय नमः इत्यभ्यर्च्य । उत्तरे ओं सनत्कुमाराय नमः, ओं सनकाय नमः, ओं सनन्ताय नमः इत्यभ्यर्च्य।
पश्चिमे ओं दुर्गायै नमः, ओम् विघ्नेशाय नमः, ओम् नारदाय नमः इत्यभ्यर्च्य।
अग्रे ओम् अस्मद्गुरुभ्यो नमः ,ओं अस्मत्परम गुरुभ्यो नमः ओम् अस्मत्सर्व गुरुभ्यो नमः ।
इति ध्यात्वा । तदन्वावाहनं कुर्यात् । एकभेरविधाने तु नावाहयेत्। सुरसिद्धावतारिते हरौ च तत्र तु हृदयस्थं बिंबे ध्यात्वा। **आभिमुख्यकरणमेवावाहनम्** । न परिवार कल्पनं च। अन्यत्र प्रतिमादौ चेत्।आवाहनपात्रमद्भिः प्रक्षाळ्य । मूलमन्त्रेणाऽद्भिरापूर्य ।
हस्ताभ्यामाललाटमुद्धृत्य। तस्मिन् ओं नमोनारायणाय आगच्छागच्छा इति वा ओं नमोभगवते वासुदेवायागच्छागच्छा इति वा बिंबानुगुणं चतुर्वारं जप्त्वा हृदयस्थमावाह्य । कूर्चेन तत्तोयं प्रतिमामूर्ध्नि सेचयित्वा । पात्रस्थं प्रतिमायां विचिंत्य । आवाहनमुद्रां प्रदर्श्य । किंचिदुत्थाय प्रणम्य। स्वागतमुक्त्वा । तन्मुद्रां प्रदर्श्य । प्रतिमामुद्रां च प्रदर्श्य । सन्निधिं कल्पयित्वा । मुद्रां प्रदर्श्य । तत्र हरेः स्थितिं यागावसानिकं प्रार्थ्य । प्रार्थनामुद्रां च प्रदर्श्य । ओं नमोभगवतेवासुदेवाय सन्मुखोभव इति साम्मुख्य मुद्रां प्रदर्शयेत् । एकबेर विषये मूलात् यथाविधुक्त वर्त्मनाऽऽवाह्य । आवाहन स्थापन सन्निदान सन्निरोध साम्मुख्य प्रार्थनामुद्राः प्रदर्श्य । मूलेन सपर्यासनं दत्वा । हस्तन्यासं विना देवदेहे मंत्रन्यासं कृत्वा । किरीट श्रीवत्स कौस्तुभ वनमाला चक्र शंख गदापद्म गरुड मुद्राश्च प्रदर्श्य ।

विभो सकल लोकेश विष्णोजिष्णो प्रभो हरे.
त्वाम् भक्त्या पूजयांयद्य भोगैरर्घ्यादिभिःक्रमात्.

दिव्येनाऽर्घ्योपचारेण यथाशक्ति यथाविधि.

अर्चयिष्यामि समये भगवन्तम् जनार्दनम्. इति देवेशं विज्ञाप्य।

ओम् तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धीयो योन: प्रचोदयात्

अर्घ्यं समर्पयामि । इति देवस्य मूर्ध्नि अर्घ्यं समर्प्य ।

ओम् त्रीणिपदा विचक्रमेविष्णुर्गोपाऽथाभ्य: ततोधर्मानि धारय़न्

पादयो: पाद्यं समर्पयामि । इति द्विवारं ।

ओम् आप: पुनन्तु पृथ्वीं पृथ्वी पूता पुनातुमा पुनन्तु ब्रह्मणस्पति: ।

ब्रह्म पूता पुनातुमाम् । इति मुखेचाचमनम् समर्प्य ।

मधुक्षीरं च दध्याज्यम् मधुपर्कमिति स्मृतम् ।

एकाङ्गं वा समस्तम् वा मधुपर्कम् न लोपयेत् ।

इत्युक्तवत् ओम् नमोभगवतेवासुदेवाय मधुपर्कम् निवेद्य ।

हस्ताभ्यां शिरसापद्भ्यां मनसा च धिया तथा ।

अहंकारेनचात्मानं निपात्य धरणी तले.

इत्यष्टाङ्ग प्रणिपातेन देवं प्रणिपत्य।

दासोहम् ते जगन्नाथ सपुत्रादि परिग्रह:

प्रेष्यम् प्रसादिकर्तव्ये माम् नियुङ्क्ष्व हि ते सदा। इति देवेशं विज्ञाप्य.

परिवार कल्पनं कुर्यात्

योगासनाब्जपत्रेषु, पूर्वादिषु, द्वादशसु । ओम् श्रीवत्साय नम:,

ओम् वनमालायै नम:, ओम् योगमायायै नम:, ओं वैष्णव्यै नम:,

ओम् विमलायै नम: । ओम् सृष्ट्यै नम:, ओम् उत्कर्षिण्यै नम:,

ओम् प्रज्ञायै नम:, ओम् सत्यायै नम:, ओम् ऐशान्यै नम:,

ओम् अनुकम्पायै नम: ,ओम् पितामह्यै नम:

पीठस्य परितः प्रथमावरणे प्रागादिषु

ओम् व्याप्त्यै नम:, ओम् कांत्यै नम:, ओम् तृप्त्यै नम:, ओम् श्रद्धायै नम:,

ओम् विद्यायै नम:, ओम् जयायै नम:, ओम् क्षमायै नम:, ओम् शांत्यै नम: इति चामरधारिणीश्च,

द्वितीयावरणे ओम् शंखिणे नमः, ओम् चक्रिणे नमः, ओम् गदिने नमः, ओम् खड्गिणे नमः, ओम् पद्मिने नमः, ओम् मुसलिने नमः,

ओम् शार्ङ्गिणे नमः , ओम् वनमालिने नमः इति च .

त्रितीयावरणे

ओं इंद्राय नमः, ओम् अग्नये नमः, ओम् यमाय नमः, ओम् नैऋतये नमः, ओं वरुणाय नमः , ओम् वायवे नमः, ओम् सोमाय नमः,

ओम् ईशानाय नमः ।

त्रितीयावरणाद्बहिः भगवत्प्रतिमुखं वैनतेयं च । ऐशान्याम् ओम् विष्वक्सेनाय नमः इत्यभ्यर्च्य।

स्नानासनं कल्पयामि

ओम् पादुकाधि दैवताय ओम् अम् अनन्ताय नमः । इति पादुकामभ्यर्च्य इदं विष्णुः, त्रीणिपदा इति देवस्य पादुकारोहणं स्मृत्वा । अभिषेचनम् । 'उत्तिष्ठ' इति देवम् उत्थितम्स्मृत्वा । भद्रम् कर्णेभिः इति स्नानासन वेदिकायाम् निविष्टम् विचिन्त्य. तदनु अस्य देवदेवस्य नित्यस्नपनं करिष्ये इति सङ्कल्प्य।तदङ्गं शुद्धि पुण्याहवाचनं कृत्वा।

(**नवकलशस्नपन विधिः**)

कुम्भान् स्नपनद्रव्याणि च प्रोक्ष्य। सुवर्णादि लोहजान् मृण्मयान् वा सूत्रवेष्टितान् नव कुम्भान् प्रक्षाळ्य । अर्धमण्डप मध्ये धान्य राशौ प्रागुदक् सूत्राणिषण्णिपात्य । तेषु ब्रह्मादीशानांतं कलशान् संस्थाप्य. तान् घृत पाद्य दध्यर्घ्यक्षीराचमन मधु पंचगव्य फलैरापूर्य।तान् सवस्त्र रत्न कूर्चाश्वत्थ पल्लवापिधानान् कृत्वा।तेषु घृतादि फलावसानेषुक्रमेण परवासुदेव विष्णु श्रीधर मधुसूदन हृषीकेश त्रिविक्रम पद्मनाभ वामन दामोदरानावाह्य, अभ्यर्च्य। दर्भैराच्छाद्य। चक्रमुद्रां प्रदर्श्य । स्नानासनस्थ देवं पूर्ववदर्घ्यादिभिरभ्यर्च्य ।ओम् तद्विष्णोः इति दन्तधावनम्, विष्णु गायत्र्या जिह्वा निर्लेखनम्, ओं विष्णोर्नुकम् इति आमलकं च दत्वा, 'न ते विष्णो, 'आपोहिष्ठा" इति अभिषेचनम् , ओम् अतोदेवा अवन्त्विति कनक कङ्कतेन केश शोधनम् कृत्वा।तदनु स्थापित कलशौ पाद्यादि घृतांतैः स्नापयेत्। विष्णु गायत्र्या पाद्येन, दधिक्राविण्ण इति दध्ना, पयोव्रत साम्ना पयसा,न ते विष्णु इति आचमनेन, मधुवातेति मधुना, विष्णोःकर्माणीति पंचगव्येन, याःफलिनीरिति फलवारिणा,घृतस्नातेति घृतेन च

प्रतिद्रव्य घटमुपस्नान प्लोतवस्त्रोत्तरीय अर्घ्यापाद्याचमनगंध पुष्पधूप दीपदानपुरस्सरमभिषिच्य।ओम् हिरण्य वर्णाम् हरिणीमिति हरिद्रयालिप्य।

ओम् हिरण्य वर्णाःशुचय: इति चतसृभिः ऋग्भिः संक्षाल्य। गंधद्वारेतिगंधांबुना च विष्णु गायत्र्या कुङ्कुमेनाऽऽलिप्य। पावमानीभिः, ब्रह्मजिज्ञानं, कयानश्चित्र, इत्यभिषिच्य । ओम् तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धीयोयोन: प्रचोदयात् । इति देवम् परिषिच्य.ओं सहस्त्र धाराधि दैवताय ओं पूर्णचन्द्राय नम: इत्यभ्यर्च्य । नृसूक्तेन सहस्त्रधारया कुंभेनाभिषिच्य।ओं शंखाधि दैवताय ओं जलेशाय नम: ओं पद्म धाराधि दैवताय ओं पुष्ट्यै नम: इत्यभ्यर्च्य। अभिषिच्य। अग्निर्मूर्धा इति प्लोत वस्त्रेण अङ्गांबु निर्हृतं कृत्वा. विष्णुगायत्र्या वस्त्रं ओम् इति यज्ञोपवीतम् ,उत्तरीयं च समर्प्य . अर्घ्या पाद्यादिभिः अभ्यर्च्य। <u>अलंकारासनार्थं</u> पूर्ववत् पादुके दत्वा।

<u>अलंकारासनं</u>

अलंकारासनं विचिंत्य।।पूर्ववदर्घ्यादिभिरभ्यर्च्य।

ओं मूर्धानम् दिवं इति आर्द्रान् केशान् अगरुधूपेन संशोष्य। चन्दनेन च गंधद्वारेति मंत्रेण गंधेनाऽनुलिप्य।ओम् तद्विष्णो: इति मन्त्रेण दिव्य परिमळ पुष्पाणि समर्पयामि । जितन्त इति मन्त्रेण सर्वाभरणान् समर्पयामि । विष्णु गायत्र्या अञ्जनम् समर्प्य । दर्पणाधि दैवतायै ओं श्री महालक्ष्म्यै नम: इत्यावाह्य व्याहृत्या दर्पणं समर्प्य । ओं धूपपात्राधिदैवताय ओं पावकाय नमः। इत्यभ्यर्च्य। धूपमुद्रां प्रदर्श्य। जितन्त इति देवस्य नासिकायां धूपं च, दीपाधि दैवताय भास्कराय नम:दीपमुद्रां प्रदर्श्य। देवस्य नेत्रयोः ओम् उद्दीप्यस्व इति दीपं च प्रदर्श्य।

तिलं वस्त्रम् तथा हेमम् तांबूलम् तण्डुलं तथा ।
फलानि गव्यमाघारम् गाश्च धान्यम् यथा वसु ।
गोग्रासम् देशिकायैव दद्याद्देवस्यसन्निधौ ।

इतिवत् मात्रादानम् कृत्वा । तिरस्करिणीमपोह्य । वाद्यान्याघोष्य । वेदपाठान् स्तोत्रपाठांश्च पाठयित्वा । देवस्य नीराजनम् । ओं नीराजनाधि दैवताय ओम् स्वधायैनमः । इत्यभ्यर्च्य दत्वा ।

<u>भोज्यासनम्</u>

देवस्य भोज्यासनाय पूर्ववत् पादुके दत्वा। भोज्यासनस्थं विचिन्त्य। पूर्ववदर्घ्यादिभिः अभ्यर्च्य।मधुपर्कं निवेद्य। प्रणवेन तांबूलं च दत्वा।

हविर्निवेदयेत्सिद्धं भोज्य भक्ष्यादि संयुतम्।

मधुरादि रसोपेतं विध्युक्तं सुसमाहितम्।
असंस्कृतैश्च निष्पन्नं युक्तमन्यैः फलादिभिः।
अपक्वैरतिपक्वैश्च यथायोगं प्रकल्पयेत्।

इति नैवेद्यद्रव्याण्यस्त्रमंत्रेण प्रोक्ष्य। सर्वमंत्रेण परिषिच्य।

शीतळोदक सम्पूर्णम् एला कर्पूर सम्युतम् ।
मंदोष्णम् वासनायुक्तम् अर्हणांबु इति स्मृतम् ।

इत्युक्तवत् ओम् इति अर्हणंदत्वा । नैवेद्यस्य दाहनाप्यायने कृत्वा । सुरभि मुद्रां प्रदर्श्य । अर्घ्यात् पुष्पमादाय । विष्णुहस्ते समर्प्य । दक्षिणजानुं भूमिस्पृष्टं कृत्वा । वामजानुमुन्नम्य । अन्वारब्धस्सव्येन दक्षिण करेण दर्शित ग्रासमुद्रया ''देवस्यत्वे''ति मंत्रेण यथोदितं नैवेद्यं देवस्य दक्षिणहस्ते निर्वपेत्। ततः पानकं पानीयं च निवेद्य,आचमनम् दत्वा । तांबूलं च निवेदयेत् । कर्मार्चायां च ध्रुवभेरादौ यद्युदीरितं तत्सर्वमाचरेत् । बहुभेरे तु श्री भूम्योश्च । श्रीं श्रियै नमः इति श्रियं, भूं भूम्यै नमः इति भुवं च आवाह्य। पद्मासनं दत्वा । स्वस्वमन्त्रेण षडङ्गन्यासं कृत्वा । कमल मुद्रां प्रदर्श्य । अन्यत् सर्वं अर्घ्यादि नैवेद्यान्तं स्वस्व मन्त्रेण समर्पयेत् । तदनु देवं स्तुत्वा । द्वादशाक्षरं अन्यं वा मन्त्रं यथोदीरितसंख्यया जप्त्वा । तदनु वक्ष्यमाणेन विधिना अग्नौदेवं संपूज्य । भूतेभ्यः बलिदानं नित्योत्सवं च कृत्वा । देवेशं विज्ञाप्य प्रणम्य च । पूजकः स्वयमाददीतावशिष्टानि पूजावस्तूनि आदाय। देवप्रीत्यर्थं तैः आत्मपूजनं कुर्यात्।

इति श्री वराहगुरुणा विरचितायां
क्रियाकैरवचन्द्रिकायां अष्टाविंशःपरिच्छेदः

****

एकोन त्रिंशः परिच्छेदः

अग्निकार्यविधिः

अथ अग्निकार्य विधिः उच्यते । आचार्यः अग्नयागारद्वारे ओं श्रों चण्डाय नमः प्रिं प्रचण्डाय नमः। । मध्ये ओं क्षं गरुडाय नमः इत्यभ्यर्च्य । अन्तःप्रविश्य। अग्नि कुण्डस्य पश्चिमे भागे प्राङ्मुखमासने उपविश्य । ओं असुरान्त चक्रायस्वाहा अस्त्राय फट् ; इति कुण्डस्य संमार्जनालेपने कृत्वा।

प्राच्यां शिरस्समाख्यातं बाहु युग्मं व्यवस्थितम्।
ऐशान्याग्नेय कोणेतु जङ्घे वायव्य नैऋते।
उदरं कुण्ड मित्युक्तं योनिर्योनिर्विधीयते।

कुण्डं एवं ध्यात्वा । होमम् करिष्ये । इति सङ्कल्प्य । पुण्याहं वाचयित्वा । तज्जलेन ओं भूर्भुवस्सुवः इति प्रोक्षणा अवोक्षणा अभ्युक्षणानि कृत्व। आत्मनो दक्षिणे पार्श्वे पुष्पभाजनं वामे च । अन्यानि निक्षिप्य। ओं आचक्रायस्वाहा इति स्वस्व मन्त्र न्यासं कृत्वा । प्रागग्रान् षड्दर्भान् आस्तीर्य। तेषु १. आज्य पात्रं २. चरु स्थालि ३. प्रोक्षणी ४. प्रणीता ५. समित् ६. कुश ७. तण्डुल ८.परिधि ९. स्रुक्१०. स्रुव ११. दर्वी १२. अग्नेर्विहरण १३.व्यजन १४. मेक्षण १५. शुष्ककाष्ठ १६.घण्ट १७. अक्षत १८. गन्ध द्रव्याणि यथासंभवम् न्यंचि निधाय।

कुण्ड मध्ये ओं नमोनारायणाय इति तिस्रो रेखाः दक्षिणमारभ्य उत्तरान्तं प्रागायताः पश्चिमादि पूर्वान्तं उदगायताः तावतीःलिखित्वा । तच्छकलं विसृज्य। दर्भ मुष्टिभिः कुण्डस्य पर्यग्नि करणं कृत्वा। कुण्ड मध्ये भद्रासनं कल्पयित्वा। ओं भद्रासनाय नमः ओं विमलासनाय नमः । इत्यभ्यर्च्य । तस्मिन्

कुण्ड मध्ये तथा लक्ष्मीं सर्वाभरण भूषितां ।
सर्वावयव सम्पूर्णां ऋतुस्नातां विचिन्तयेत्।
देवं नारायणं ध्यात्वा सर्व लक्षण लक्षितं ।
चतुर्बाहुं विशालाक्षं कोमलं पीतवाससम्।
शंखचक्रगदापद्मैः चतुर्भिः कृतलक्षणम्।
कंजपार्णिं तथापादं श्रीवत्सांकितवक्षसम्।
कालमेघनिभं शान्तं चन्द्रबिंबनिभाननम्।
हार केयूर सम्युक्तं किरटेनोप शोभितम् । एवं ध्यात्वा ।

तत्र तयोः संगमं विचिन्त्य।तस्मात् उत्पन्नमग्निं ध्यात्वा। अरणेः, सूर्यकान्ताश्मनोवा, अग्निद्वादशाक्षरेण मथित्वा। श्रोत्रियागाराद्वा समाहृत्य। भूर्भुवस्सुवःइति प्रोक्ष्य। अग्नि बीजस्य।काश्यप ऋषिः। त्रिष्टुप्छन्दः।अग्निर्देवता।होमार्थे विनियोगः।इति दिव्याग्निं ध्यात्वा । ओं रां इत्यादि षडङ्गन्यासं कृत्वा। ओं रम् अग्नये नमः । ओं असुरान्त चक्रायस्वाहेति इन्धनानि अग्नौ निक्षिप्य। वायु बीजस्य । किष्किन्धऋषिः जगतीछन्दः । वायुर्देवता।अग्नि उद्दीपनार्थे विनियोगः

।ओं यं वायवे नमः । इति अग्निमुद्दीप्य । अस्त्रमन्त्रेण अद्भिः परिसमूह्य । ओं आचक्राय स्वाहेति षडङ्गन्यासं कृत्वा । त्रिभिः पञ्चभिः सप्तभिः नवभिः एकादशभिः वा पञ्चविंशतिनिष्ठान्तैः दर्भैः ओं वासुदेवाय नमः । ओं सङ्कर्षणाय नमः । ओं प्रद्युम्नाय नमः । ओं अनिरुद्धाय नमः प्रागुदग्रं प्रागाद्युत्तरान्तं प्रादक्षिण्येन परिस्तीर्य। तत्र द्रव्याग्नि मध्ये पूर्वाग्रान् दर्भान् आस्तीर्य । तदुपरि प्रणीतान्निधाय । अद्भिःआपूर्य । अक्षतैः अभ्यर्च्य । दर्भयुग्म निर्मितं प्रादेशसम्मितं कूर्चं तस्यां विन्यस्य। त्रिभिःर्दर्भैः पवित्रैः आच्छाद्य। प्रोक्षणीं आत्मनः अग्रे विन्यस्य । प्रणीताजलं कूर्चेन सह प्रोक्षण्यां आवाप्य । तत्कूर्चं हस्तयोः अङ्गुष्टाऽनामिकाभ्यां मूलेन पुनः आघारं त्रिःउत्पूर्य । तत्कूर्चेन प्रोक्षणीं होमद्रव्याणि सर्वाणि च प्रोक्ष्य । तेन नामादेशं यथायथं स्पृष्ट्वा । तानिपात्राणि उत्तानानि कृत्वा।पुनः प्रोक्ष्य । तानि प्रोक्षणीजलेन ''सत्यंत्वर्तेनपरिषिञ्चामि इति प्रादक्षिण्येन स्त्रावयित्वा । प्रणीतां पुनःअद्भिः सम्पूर्य।तस्मिन् ओं कौमोदकी शंखचक्रपद्मधराय वासुदेवाय नमः। इति आवाह्य । गन्धादिभिः अभ्यर्च्य । अग्नेः ऐशान्यां दर्भ विष्टरे तां संस्थाप्य।अग्नेःदक्षिणतःदर्भेषु द्वादश दर्भ कृत कूर्चं पूर्वाग्रं विन्यस्य।तस्मिन्

चतुर्मुखं भुज द्वन्द्वं साक्ष माला कमण्डलम्।

हेमाभं शक्ति सहितं ब्रह्माणं तु विचिन्तयेत् । इति ध्यात्वा ।

ओं कम् ब्रह्मणे नमः । इतिकूर्चे समावाह्य ध्यात्वा अभ्यर्च्य । विष्णुगायत्र्या स्थालीं प्रक्षाळ्य । तण्डुलान् आडकप्रमाणान् ओं आचक्राय स्वाहा इति तस्यां निक्षिप्य । 'ओं विचक्राय स्वाहा इति शुद्धजलैः संक्षाल्य । 'ओं सुचक्राय स्वाहा इति संशोध्य । 'ओं सूर्यचक्राय स्वाहा इति अग्नौ आरोप्य । 'ओं ज्वालाचक्राय स्वाहा इति अग्निं उद्दीप्य । 'ओं महासुदर्शनचक्राय स्वाहा इति श्रपयित्वा । एवं महानसे चुल्यां वा केवलान्न मुद्गान्न पायसान्न गुडान्नादि चतुर्विधमन्नं श्रपयित्वा । अग्नेः उत्तरतो निक्षिप्य । आज्यपात्रं आत्मनः पुरतः संस्थाप्य । द्रावितं गाळितं आज्यं। आज्यपात्रे ओं अं विष्णवे नमः '' ओंआप्यायस्वसमेतुते । विश्वतस्सोमवृष्णियम्।भवावाजस्य सङ्गते। इति मन्त्रेण निषिच्य । कुण्डस्य उत्तरे पूर्वाग्रान् दर्भान् आस्तीर्य । तेषु अङ्गारान् निरूह्य।तेषु आज्यपात्रं निधाय । दर्भान् आदीप्य दर्शयित्वा विसृज्य । त्रिभिर्दर्भैः आछाद्य । दर्भ युग्म निर्मितं प्रादेशसम्मितं कूर्चम् निधाय । दर्भानादीप्य दर्शयित्व । श्रीमन्नारायण चरणौ शरणं प्रपद्ये । श्रीमते नारायणाय नमः । इति वा मूलेन वा द्वेदर्भाग्रे तत्र प्रत्यस्य, ज्वलता दर्भस्तम्बेन त्रि पर्यग्निकृत्वा,विसृज्य। दर्भकाण्डद्वयेन नीराजनं कृत्वा । आज्यस्थालीं उदगुद्वास्य । अङ्गारान् अग्निनासंयोज्य । आज्यस्थालीं पुरतः कृत्वा,

उदगग्राभ्यां पवित्राभ्यां अङ्गुष्ठानामिकाभ्यां मूलेन त्रिः उत्पूय । पवित्रग्रन्थि विस्रस्य। अपः स्पृष्ट्वा । अग्नौ प्रहृत्य।आज्यं सुरभि मुद्रया अमृती कृत्य। चक्र मुद्रां प्रदर्श्य । दर्भैः आछाद्य। अग्नेः अष्टसु दिक्षु इन्द्रादीन् आवाह्य । सम्पूज्य च । उष्णोदकेन स्रुक्स्रुवौ प्रक्षाळ्य । दर्भ पञ्च कृत कूर्चेन स्रुक् स्रुवयोः मूलं मूलेन मध्यं मध्येन अग्रं अग्रेण अस्त्रमन्त्रेण संमृज्य।अग्नौ निष्टप्य।अद्भिःसंप्रोक्ष्य । आत्मनः उदीच्यां स्रुक्स्रुवौ निधाय । कूर्च ग्रन्थि विसृज्य तं अग्नौ प्रहृत्य। स्रुवेण आज्यमादाय।होम द्रव्येषु सम्सिच्य ।

कुण्डस्य पश्चिमे कुण्डायाम सदृशं अङ्गुष्ट नहनं ;
दक्षिणे तस्मात् अङ्गुलि हीनं मध्यमाङ्गुलिनहनं;
उत्तरे तस्मात् अङ्गुलि हीनं कनिष्ठानाहकं परिधि त्रयम्

क्रमेण श्रीधर , नृसिंह, हयग्रीव मन्त्रैः संस्थाप्य । मध्यमं परिधीं प्रणवेन उपस्पृश्य । अग्नेयैशान कोणयोः आघार समिधौ च अग्नेशानमन्त्राभ्यां संस्थाप्य । ओं अदितेनुमन्यस्व । अनुमतेनुमन्यस्व । ओं सरस्वतेनुमन्यस्व । देवसवितःप्रसुव"इत्यन्तेन दक्षिणाद्युत्तरान्तं समन्ततः परिषिच्य । अनुयाजसमिधं प्रणीतांमुखे निधाय।पञ्चदशैकतः गो घृताक्ता समिधः मुष्टिमुद्रया प्रजापतिं मनसा ध्यायन् सकृदेवमूलेन हुत्वा । कुश कूर्च वेष्टिते वामकरतले घृत पात्रं निधाय । ओं प्रजापतये इदं न मम इति प्रथमं नैऋत्यादि ईशानान्तं । ओं इन्द्राय इदं न मम इति द्वितीयं वायव्यात् आग्नेयान्तं । आघारं हुत्वा। ततः अग्नौ उत्तरे ओं अग्नये स्वाहा अग्नये इदं न मम। दक्षिणे ओं सोमाय स्वाहा। सोमाय इदं न मम। मध्ये भूरादि व्याहृतिभिश्च हुत्वा । तदनु अग्निं संस्मरेत्।

द्वि शीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकं।
वरदं शक्ति पाणिं च बिभ्राणं स्रुक्स्रुवौ तथा।
अभीतिदं चर्मधरं वामेचाज्यधरं करे।
काळी कराळी सुमना लोहिता धूम्रयेव हि।
स्फुलिंगिनी विश्वरूपा सप्तजिह्वाःप्रकीर्तिताः।
काल्यास्तु मध्यमंस्थानं करालयाः पूर्वदिग्भवेत्।
मनोजवायाश्चाग्नेयां लोहितायास्तु वारुणे।
सुधूम्रासोमनिलया स्फुलिङ्गिन्यनिलाश्रया।

ऐशान्यं विश्वरूपी तु एवं स्थानं स्मरेत् क्रमात्।
जिह्वायां दक्षिणे वक्रे धूम्रायां मारणादिकम्।
लोहितायां वशीकारः काल्यां कर्म च शान्तिकम्।
सर्वसिद्धिः स्फुलिङ्गिन्यां आनने दक्षिणेतरे।
विश्वरूपरसज्ञायां अणिमादिमहाफलम्।
करालिका विजयदा पुष्टिदा च मनोजवा।
काष्ण्यं लौहित्यमेतासां वर्णश्यामलमेव च।
स्फुलिङ्गरूपं च ततः वर्णः स्फटिकसन्निभः।
तपनीयनिभः प्रोक्तः जिह्वानामानुपूर्वशः।एवं **बालाग्निं** ध्यात्वा।

<u>उत्सवाग्निः</u>

त्रिनेत्रं पञ्चवक्त्राढ्यं रक्त वर्णं दिशा भुजम्.
त्रिमेखलं त्रिपादं च सप्तजिह्वा समन्वितम्।
उपवीतसमायुक्तं जटामकुटमण्डितम्।
चक्रंपरशुखड्गं च वज्रं चाऽभयदक्षिणे।
टंकं पाशाब्जचक्रं(शङ्खं ?) च वरदं वह्निवामके।
स्वाहादक्षिणपार्श्वे तु स्वधा वामे तथैव च।
हिरण्याकनकाऽऽकारा कृष्णा चैव तु सुप्रभा।
अतिरिक्तो बहुरूपासप्तजिह्वाः प्रकीर्तिताः।
मेषारूढं यौवनाग्निं ध्यायेदुत्सव कर्मणि।एवं **उत्सवाग्निं** ध्यात्वा।

<u>नित्याग्निः</u>

चतुर्भुजं त्रिनेत्रं च एकवक्त्रं जटाधरम्।
शूलं परशुहस्तं च अभयं वरदान्वितम्।
सप्तजिह्वान्वितं शक्ति उपवीतोत्तरीयकम्।
मेषासीनं सितं नित्ये शिवं वृद्धाग्निमारभेत्।

(नित्याग्निः वृद्ध इत्युक्तः उत्सवाग्निर्युवाभवेत्)

दीक्षाशान्तिप्रतिष्ठाग्निः बाल इत्यभिधीयते।

एवं तत्तत्कर्मानुगुणं अग्निं ध्यात्वा । इत्यभ्यर्च्य । तदनु अग्नेर्जातदोषशान्तये तिलान् आघार सम्मिश्रान् द्वादशाक्षरेण अष्टोत्तरशतसंख्यया हुनेत् । आसां मध्ये काल्यां अग्निं ''गर्भाधानादिकर्मणा संस्करिष्ये इति सङ्कल्प्य। अदितेनुमन्यस्व इत्यादिना परिषिच्य । एवं गर्भादान, पुम्सवन, सीमन्तोन्नयन, जातकर्म, नामकरण, अन्नप्राशन, चौळ, उपनयन,प्राजापत्य, सौम्यक, वैष्णव, शुक्रीय, गोदान, उपनिषक्रमण, समावर्तन, विवाहान् प्रतिकर्मसंकल्पपूर्वकं परिषेचन संपुटितं हुत्वा । काळ्यां समिधः मूल मंत्रेण । मनोजवायां प्रणवेन आज्यं। सुलोहितायां वासुदेव मन्त्रेण अन्नं । सुधूम्रायां सङ्कर्षण मंत्रेण लाजं । स्फुलिङ्गिन्यां प्रद्युम्न मंत्रेणतिलं । विश्वरूपायांअनिरुद्ध मन्त्रेण मुद्गं च,एवं प्रत्येकं षोडश आहुतिर्हुत्वा । तदनु अग्नि मध्ये योगपीठं सङ्कल्प्य । आधारादि पद्मान्तं सकृदाज्येन स्वाहान्तैः तत्तन्मन्त्रैः हुत्वा । तत्र चिद्रूपं परमेश्वरं हृदयादवतार्य ध्यात्वा। अर्घ्यादि नैवेद्यान्तं तत्तन्मत्रैः सकृत् सकृत् आज्येन हुत्वा। जपार्थां च सकृत् हुत्वा।समित्दळ पुष्प बीज फलैश्च परिवार मन्त्रैश्च सकृत् आज्येन जुहुयात् । एतदग्नौ आराधनम् । अन्यत्र प्रतिमादौ चेत् अनन्तरं वक्ष्यमाणेन वर्त्मना समिदाज्यैःजुहुयात्।

आयामः समिधान्तालः कनिष्टानहनं क्रमात्।

चर्महीने विनाशः स्यात् भेदे क्षीणं कुलं भवेत्।

आर्द्रासु बन्धुनाशः स्यात् पुत्रनाशः पुरातने।

क्षतासु भार्यामरणं कलहाय च शाखिनि।

उद्वेगाय भवेत् स्थूला ह्रस्वा अवग्रहकारिणी।

दीर्घा अतिवृष्टि जननी त्याज्यादोषयुता समित्।

एतादृशेन समिधां शतेन तदर्धेन पादेन अष्टाभिः चतसृभिः वा समिद्भिः घृताक्ताभिः मूलमन्त्रेण, आज्यावसिक्तं चरुं ग्रासमुद्रया प्रत्यर्धं नृसूक्तेन पालाशपत्रेण हस्तेन वा षोडश आहुतीः, स्रुवेण आज्येन समित्सङ्ख्या जुहुयात्।

यज्ञ वृक्षोद्भवैः शान्तिः सौभाग्यं कुसुमैर्भवेत्।

धूपद्रव्यैः सदा आरोग्यं पुष्टिर्दध्ना पयः शुचिः।

अन्नेनविविधान् कामान् आज्येन आयुष्मतीः प्रजाः।
श्वेतपद्मैस्तु जुहुयादिच्छन् ब्रह्मश्रियं नरः।
लक्ष्मीपुष्पैस्तु जुहुयात् लक्ष्मीकामोऽथवारुणैः।
पद्मबिल्वसमिद्भिः वा ज्ञानकामस्तु सर्पिषा।
कन्यकामोहुनेत् लाजैःगोकामो गोमयैः पुनः।
आयुष्कामस्तु दूर्वाभिः भूमिकामस्तु मृत्स्नया।
यवैः च इन्द्रियकामस्तु तिलैः सर्वजनप्रियः।
बृह्मवर्चस कामस्तु ब्रह्मवृक्ष समुद्भवैः।
वेणुभिश्च यवैश्चैव नीवारैः शालिभिः तथा।
सर्वे कामाः प्रसिध्यन्ति होतुर्बीजै यथोदितैः।
लाजहोमेन सिध्यन्ति सर्वे कामा न संशयः।
अन्नेन अन्नाद्यकामस्तु पुत्रकामस्तु पायसैः।
निंबपुष्पैः हिरण्यार्थी सर्वेसिध्यन्ति सर्पिषा।

होमे सर्पिर्मधुक्षीरधाराः स्युः चतुरङ्गुलाः।
शुक्तिः दध्याहुतिः ग्रासं पायसाज्याहुतिर्भवेत्।
भक्ष्याहुतिः तदर्धेन फलैः पुष्पैः अखण्डितैः।
निष्पावबीजमानेन धूपद्रव्याहुतिः भवेत्।
तिलव्रीहि यवाद्यैस्तु मुष्ट्यर्धार्धाहुतिः क्रमात्।
अष्टाङ्गुलातदर्धा वा समिद्दूर्वा षडङ्गुला।
मृद्वीकाक्षप्रमाणेन गोमयाहुतिरिष्यते।
पूर्णाहुतिः घृतस्यस्यात् कुडुपेन चतुर्मुख।
न्यूनाधिकप्रमाणेन हव्यकव्याहुतीः क्रमात्।
भुञ्जन्ति दानवाः दैत्याः निष्फलाय च कल्पते।

तदनु अग्नौ परमपुरुषं ध्यात्वा । अर्घ्यादिभिःअभ्यर्च्य । कुक्कुटाण्डप्रमाणं घृताप्लुतं चरोः पिण्डं स्रुगावर्ते निक्षिप्य । स्रुवेणाभिघार्य । समिद्दर्भ कुसुमानि आनासिकं उद्धृत्य। मूलमन्त्रेण हुत्वा । पञ्चोपनिषण्मन्त्रैःआज्येन यथाशक्ति शान्ति होमं च कृत्वा।

ओं षौं नमःपराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा।

ओं यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा।

ओं रां नमःपराय विश्वात्मने प्रद्युम्नाय स्वाहा।

ओं वां नमः पराय निवृत्यात्मने अनिरुद्धाय स्वाहा।

ओं लां नमः पराय सर्वात्मने श्रीमतेनारायणाय स्वाहा।

स्रुवं आज्येन संपूर्य । सदर्भं समित्कुसुमं स्रुवेण पिधाय । नासिकाग्रान्तं उद्धृत्य । मूलमन्त्रेण हुत्वा। तदनु आत्मनः अग्रे स्रुवं, तस्याः याम्ये च आज्यस्थालीं स्रुगुत्तरे स्रुवं च निधाय । उपयुक्त कुशान् सर्वान् हस्ताभ्यां उदगग्रं गृहीत्वा । आज्य पात्रे मूलं, स्रुचोमध्ये मध्यं, स्रुचो(स्रुक्?) गर्ते अग्रं, यथाक्रमं स्पर्शयित्वा । एवं त्रिःकृत्वा।दर्भान् अग्नौ निक्षिप्य । अनूयाजपरिध्यूर्ध्वं समिधश्च क्रमेण हुत्वा अदितेन्वमँस्थाः। इति परिषिच्य । आत्मनः अग्रे प्रणीतां संस्थाप्य।प्रोक्षणीजलं तस्यां संयोज्य । पूर्वादिसोमान्तं जलेन संसिच्य । पश्चिमायां निक्षिप्य । स्वात्मानं संप्रोक्ष्य । ब्रह्माणं उद्वास्य,परिषिच्य । अग्नि मध्यस्थं देवं स्वहृदये समर्प्य । स्रुवं जलेन संपूर्य। कुण्डात् बहिः प्रादक्षिण्येन सेचयित्वा । शेषेण आत्मानं संप्रोक्ष्य।शिरसि भस्मना तिलकं कृत्वा । धाम्नि देवं अर्घ्यादिभिः अभ्यर्च्य।

ओं भक्त्या यत् अग्नौ विहितं यथाशक्ति यथाविधि ।

आराधनं तवै वेदम् गृहाण परमेश्वर। इति देवस्यपादयोः हवनं समर्पयेत्।

नित्यहोमेषु परिधीन् बहिर्दिक्षु न दापयेत्। एवं पूर्वं हवनं कृत्वा। तदनु नित्योत्सवं कुर्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

अग्नि कार्यविधिः नाम **एकोनत्रिंशः** परिच्छेदः

****

त्रिंशः परिच्छेदः

<u>अथ नित्योत्सव</u> विधिः

अथ नित्योत्सव विधिःउच्यते । अग्निपूजानन्तरं सौवर्णं राजतं ताम्रं वा पात्रं तण्डुलैः शुद्धैः आपूर्य । पद्मं द्वादशदलं आलिख्य । कर्मार्चाऽग्रे निधाय । मूलात् भगवन्तं मूलेनतस्मिन् समावाह्य । तद्दलेषु श्रीवत्सादि द्वादशशक्तीः तदनु विष्ण्वादिमूर्तीश्च प्रागादिक्रमेण आवाह्य दिने प्रातरायतं परिक्रमेत् । मध्याह्ने तु अन्नेन एवं कृत्वा । तेन सायाह्ने कुसुमसंघातैः एवं कृत्वा । तेन परिक्रमेत् ।एवं त्रिसन्ध्यं

तण्डुलान्नपिष्टेषु देवं आवाह्य। त्रिभिः बलिं कल्पयेत् ।अथवा त्रिसन्ध्यं बिम्बेन वा द्विकालं एककालं वा हरेः नित्योत्सवं अन्नेन कुर्यात्।

मध्यंदिने वा सर्वार्थं परिक्रम्य बलिं क्षिपेत्।
यद्वोत्सव प्रतिकृतेः अन्वग्रे वा बलिर्भवेत्।

त्रिसन्ध्यं छत्रचामरादिसम्युतं केवलं तण्डुलादिकं अन्नं वा पूर्ववत् कृत्वा । तेन सह पञ्चावरणके धाम्नि पञ्चसु आवरणेषु बलिं दत्वा । गेयवाद्य पुरस्सरं पर्यटनं उत्कृष्टोत्सवः । एककालहीनः मध्यमः । कालद्वयहीनः अधमः । कालत्रयहीनः क्षुद्रः।

विना बलिप्रदानेन न उत्सवः अभ्युदयावहः।
महावातादिसंक्षोभे न नित्योत्सवं आचरेत्।

चण्डप्रचण्डयोरेव वा केवलं बलिं दत्वा । तत्रैव ''सर्वेभ्यः श्रीविष्णु पार्षदेभ्यो नमः इति बलिं क्षिपेत् । शुक्लांबरधरं शुचिं सर्वालंकार संयुतं गरुडात्मनाभावितं परिचारकं आहूय । पूर्वोक्तविधिना वाहितं पात्रं स्तुति ध्वज चामर चक्रवाहन संयुतं तन्मूर्ध्नि निक्षिप्य । सर्ववाद्य गीत नृत्तपुरस्सरं, चण्डादीनां गीतताल नृत्तपुरस्सरं बलिं यथाविधि दद्यात् । 'ओं च्रों चण्डाय नमःबलिं ददामि,'ओं पूं प्रचण्डाय नमःबलिं ददामि। प्रथमावरणे चण्डप्रचण्डौ आरभ्य पञ्चमावरणपर्यन्तं स्थितानां सर्वेषां द्वारपालानां गन्धपुष्पधूपदीप बलिप्रदानानन्तरं मल्लताल ऋषभस्वर वैजयन्ती नृतानि दर्शयेत् ।
गोपुरोत्तरसाले ओं सूर्याय चन्द्रमसे च बलिं दत्वा. दैवत स्वरं, भद्रतालं, सर्वमङ्गल नृत्तं, सालाश्रितानां सर्वेषां बलिप्रदानानन्तरं, प्रथमावरणदेवतासु कामाय, सर्वमङ्गलनृत्तं, धैवत स्वरं भद्रतालं, याम्यायां 'ओं ब्रह्मणे सदेवीवाहनपरिवाराय नमः बलिं ददामि, इति दत्वा । ब्रह्मतालं मध्यमस्वरं, मेघरञ्जनी रागं, सर्वमङ्गल नृत्तं, नैऋते 'ओं गजाननाय,भद्रतालं पञ्चमस्वरं, वराटि रागं हस्तिनृत्तं, वारुण्यां ओं षण्मुखाय भद्रतालं धैवत स्वरं, सर्वमङ्गल नृत्तं, वायौ दुर्गायां तथैव सौम्यायां ओं धनाधिपतये भद्रतालं निषधस्वरं, तक्केशि रागं, पृष्टकुट्टिमनृत्तं ऐशाने ओं ईशाय ढक्करीतालं धैवतस्वरं शालापाणिरागं, वामजानूर्ध्व नृत्तं, गरुडस्य मध्यमस्वरं, गरुडगान्धारिरागं, गरुडतालं, विष्णुक्रान्त नृत्तं, विष्वक्सेनस्य बलितालं, ऋषभस्वरं, वराटि रागं, स्वस्तिक नृत्तम् । इदं एकावरणमात्रविषयम्।

अन्तर्हारोपेते धाम्नि तु अन्तर्मण्डलनाम्नि प्रथमावरणे गोपुरोत्तरसाले ओं पुरुषाय, दक्षिणे ओं अच्युताय, तालादीनि पूर्वोक्तानि।आग्नेये ओं हयग्रीवाय बद्धावतालं ऋषभ स्वरं कोल्लिळरागं सर्वतोभद्र नृत्तं । याम्यां ओं संकर्षणाय गान्धारस्वरं कौशिकरागं भृङ्गिणीतालं भेटक नृत्तं । नैऋते ओं वराहाय मध्यमस्वरं नट्टभाषारागं जयतालं, चक्रमण्डलनृत्तं । वारुण्यां ओं प्रद्युम्नाय पञ्चमस्वरं , श्रीरागं, समतालं, कान्तार नृत्तं । वायौ ओं अनन्ताय धैवतस्वरं, कामदरागं, जयतालं, कुट्टिम नृत्तं । उत्तरस्य ओं अनिरुद्धाय निषधस्वरं, तक्केशिरागं, भद्रतालं, पृष्ट कुट्टिम नृत्तं । ऐशाने ओं नृसिंहाय धैवतस्वरं, दक्षरागं, ढक्करीतालं, कटिबन्धननृत्तं।अङ्गणे इन्द्रादि पीठिका स्थानेषु,पूर्वे ओं चक्रिणे, षड्जस्वरं, गान्धाररागं, समतालं,विलासनृत्तं।

आग्नेये ओं मुसलिने, ऋषभस्वरं, कोल्लरीरागं, बद्धावतालं, सर्वतोभद्रनृत्तं । याम्यां ओं शंखिणे, गान्धारस्वरं, कौशिकरागं, भृङ्गिणीतालं, खेटकनृत्तं । नैऋते ओं खड्गिने,मध्यमस्वरं, नट्टभषारागं, मल्लतालं, चक्रमण्डलनृत्तं । वारुण्यां ओं गदिने, पञ्चमरस्वरं, श्रीकामदरागं, मङ्गलतालं, कान्तारनृत्तं ।

वायौ- ओं शार्ङ्गिणे, कुट्टिमनृत्तं, धैवतस्वरं, तक्केशि रागम्, जय तालं,

कौबेर्यां-ओं पद्मिने, पृष्टकुट्टिम नृत्तम्, निषदस्वरम् दक्ष रागम्,भद्रतालम् । ऐशाने-ओं वज्रिने, वामजानूर्ध्वनृत्तम्, धैवतस्वरम् । शालापाणि रागम्, ढक्करीतालम् । अन्तर्हारनाम्नि-द्वितीयावरणे सूर्यादीनां पूर्वमेव उक्तानि । अङ्गणे- पूर्वे ओं इन्द्राय सुराधिपतये सदेवीवाहनपरिवाराय नमः । बलिंददामि-समतालं, षड्जस्वरम्, गान्धाररागम्, विलासनृत्तम्, आग्नेये-ओं अग्नये नमः बद्धावतालं, ऋषभस्वरम्, कोल्लिरागम्, सुभद्रकनृत्तम्, नैऋते - ओं नैऋतये मल्लतालं, मध्यमस्वरम्, नट्टभाषारागम्, चक्रमण्डलनृत्तम्, वारुणे-ओं वरुणाय मङ्गलतालं, पञ्चमस्वरम्, कामदरागम्, कान्तारनृत्तम्, वायव्ये ओं वायवे-कुट्टिम नृत्तं, धैवत स्वरं, तक्केशिरागं, जयतालं, सौम्ये - ओं कुबेराय, पृष्टकुट्टिमनृत्तं, निषधस्वरं, दक्षरागं, भद्रतालं। ऐशाने - ओं ईशानाय वामजानूर्ध्वनृत्तं,धैवतस्वरं,शालापाणिरागं, ढक्करीतालम्।

मध्यान्तर्हारनाम्नि-तृतीयावरणे धात्रादि द्वारपालानां, द्वादशादित्यानां च भद्रतालं, धैवतस्वरं, सर्वमङ्गलनृत्तं । अग्नियम मध्ये-वसवः, यमनिर्ऋतिमध्ये पितृगणाः, निर्ऋतिवारुण मध्ये -विश्वेदेवाः, वरुणवायु मध्ये-सप्तमरुतः, वायुकुबेरमध्ये- सप्तऋषयः, कुबेरेशानमध्ये-एकादशरुद्राः, भद्रतालं, धैवतस्वरं, सर्वमङ्गल नृत्तं,

तत्राङ्कणे कुमुदादयः, तेषां तालरागनृत्तानि उक्तानि । मर्यादायां द्वारपालाः दुर्जयादयाः, आवरणदेवतास्तु-पूर्वे साध्या, आग्नेये नवग्रहाः, याम्यायां अङ्गिरसः, नैऋते अश्विनौ, वारुण्यां लक्ष्मीसरस्वतीविघ्नेशाः, वायौ इन्द्रादीशान्ताः, उत्तरस्यां ब्रह्मादिवास्तुदेवगणाः, ऐशान्यां सप्तविंशति नक्षत्राणि । तेषां च भद्रतालं, धैवतस्वरं, सर्वमङ्गलनृत्तानि, अङ्गणे उपेन्द्रादयः, तेषां इन्द्रादिवत् तालादीनि।

महामर्यादा नाम्नि-पञ्चमावरणे द्वारपालाः, कुमुदादयः, तेषां तालादीनि उक्तानि । आवरणदेवतास्तु पूर्वस्यां सिद्धऋषिनागाः, आग्नेये असुराः, याम्यायां राक्षसाः, नैऋते यक्षविद्याधराः, पश्चिमायां सौरभेयी गुह्य गन्धर्वाः, वायव्ये अप्सरसः, सौम्यायां प्राजापतयः मत्र्याश्च, ऐशाने अधिरोहिण्यः, एतेषां बलितालं धैवतस्वरं, सर्वमङ्गलनृत्तं, अङ्गणे इन्द्रादि पीठिकासु विश्वेशादयः । तेषां इन्द्रादिवत् तालराग नृत्तानि।

एवं प्रथमावरणादि सर्वावरणेषु बलिप्रदानमात्रं चेत् बल्यर्थं क्रमात् परिभ्राम्य । पीठं प्रदक्षिणी कृत्य आलयं प्रविश्य । तं च प्रदक्षिणीकृत्य अन्तः प्रविश्य अर्घ्यं दत्वा, मूलमन्त्रेण मूलबेरे समुत्सृज्य । बलिशेषं किञ्चित् विष्वक्सेनस्य शिरसि निक्षिप्य। परिशिष्टं अक्षतादिकं च बलिपीठे निक्षिपेत् ।

नित्योत्सवे तु तद्बिम्बं शिबिकादिषु वा परिचारक शिरसि वा आरोप्य । परिभ्रमणं आचरेत् । तदा तत्र विलास कर्तर्यादि नृत्तभेद संयुतं पुष्प प्रपा छत्र चामर सर्व वादित्र सर्वगेय ब्रह्मघोषबहुदीप संकुलं उत्सवं कुर्यात्।

तस्य बिम्बस्य श्रीवत्साद्यष्टमङ्गलानि दर्शयित्वा । देवस्य सन्निधाने एव सर्वेषां बलिं दत्वा । आवरणेषु पृथुकादि ताम्बूलं च नैवेद्यं आचरेत।शंखनिनदेन केवलं प्राकारद्वारा निर्गत्य बलिपीठस्य पुरतः मन्दिराभिमुखं देवं स्थापयित्वा । पीठस्य सर्वासु दिक्षु वादित्रेषु घोषितेषु क्षालिते पीठिका मूर्ध्नि गुरुः विष्णुपार्षदान् सम्पूज्य । तत्र बलिं निरवशेषं दत्वा । पीठं प्रदक्षिणी कृत्य । धामान्तः प्रविश्य । मुखमण्डपे देवस्य पादुके दत्वा । यानादेः अवरोप्य । देवं विष्टरे प्राङ्मुखं आरोप्य । अर्घ्यादिभिः अभ्यर्च्य । अवसरोचितं उपहारादिकं प्रदाय। गर्भगेहं प्रविश्य । बहिरङ्गण भूमिषु गेयवादित्रनृत्तेषु न्यूनभावं समाधातुं शुद्धताण्डवं दर्शयित्वा । देवं मूलमन्त्रेण मूले समर्प्य । प्रणम्य स्तुत्वा, प्रदक्षिणीकृत्य । स्वगृहं प्रविश्य, स्वार्थं देवं प्रपूजयेत्। स्वार्थार्चनं प्रथममेव इति केचित्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरवचन्द्रिकायां नित्योत्सव विधिःनाम त्रिंशः परिच्छेदः

****

अथ एकत्रिंशः परिच्छेदः

स्नपन विधिः

अथ स्नपनविधिः उच्यते- विषुसंक्रमण,ग्रहणाऽयनद्वय, द्वादशी, श्रवण, कर्तृजन्मदिनत्रय, तिथित्रय, व्यतीपात, रोहिणी, दर्श, पौर्णमासी, पुनर्वसु, पञ्चम्यादि शुभतिथि नक्षत्रवारादिषु कृतं स्नपनं केवलम् । प्रतिष्ठोत्सवादिषुकर्माङ्गं । कर्माङ्गेनाऽङ्कुरावापन निशाचूर्ण स्नपनादिकम् । केवले सर्वं चतुस्थानार्चनयुतं कुर्यात्।

आचार्यःतत्पूर्वेद्युर्देवस्याङ्कुरप्रतिसर पुरस्सरं अधिवासं सद्यो वा कुर्यात् । अधिवासस्तु स्नपनप्रतिमायां तीर्थप्रतिकृतौ वा तदलाभे उत्सवबिंब बलिबिंब कर्मार्चा कूर्चादिषु लेपमृण्मय भित्तिस्थ पटस्थ विषये सकूर्च दर्पणेऽधिवासं कुर्यात्।

स्नपनार्थं प्रासादस्य अग्रतः सर्वासु आवरणभूमिषु सर्वासु दिक्षु यथावकाशं चतुर्द्वार चतुस्तोरणस्तम्भवेष्टन वितान मुक्तादामपूर्णकुम्भदर्भमालादिभिः अलङ्कृतं दशहस्तविस्तृतं द्विगुणेन आयतं मण्डपं कारयित्वा । तस्मिन्पूर्वक्लृप्ते वा मण्डपे तत् त्रेधा विभज्य । तृतीयेंशे पश्चिमे चतुरश्रां चतुर्हस्तविस्तारां शिलादिनिर्मितां उपानादियुतां वेदिकां कल्पयित्वा । तदुपरि चतुरश्रां वृत्तं वा प्रादेशेन विस्तीर्णं अष्टाङ्गुलेन चतुरङ्गुलेन वा उन्नतं वलयं वेदिकोपरि च आधारतुल्यं आश्वभ्रमेदिनीं कुर्यात् ।

मृण्मयादिषुबिम्बेषु बहिर्वेदि प्रकल्पनम्।
एकबेरे तु न बहिः स्नान वेदिप्रकल्पनम्।
तोरणादि न कर्तव्यं गृहार्चा स्नपने तथा।

इति विधाय । तत् गोमयेन अनुलिप्य । सुधाचूर्णाऽक्षत दूर्वाङ्कुर दीप सांकुर पालिकादिभिःअलङ्कृत्य । तस्य रौद्रेकोणे गालितवस्तु सुगन्धिजलपूरितानि जलद्रोण्यादि भाजनानि च। वेदिकायां दक्षिणे

भूतले पवमानादिभिः सूक्तैः अभिमन्त्रितं सापिधानं उपस्नानाम्बुभाजनं च कल्पयित्वा । अर्घ्यादि दीपपर्यन्तानि पूजाद्रव्याणि स्नानोपयुक्तानि च। तदनु वेदिकाग्रे ।

अधमोत्तमस्नपनविधिः(81 कलशाः)

चन्दनार्द्राणिसूत्राणि चतुर्दश प्रागायतानि उदगायतानि च आस्फाल्य तेषु एकोनसप्तत्युत्तरशतकोष्ठेषु धान्यपीठानुरूप्येण षोडशाङ्गुलायामविस्तारेषु ब्रह्मादीशानपर्यन्तं नव नव पदानि एकाधिकाशीति संख्याकानि कलशास्पदानि विसृज्य। शेषाणि अष्टोत्तराशीतिसंख्याकानि वीथ्यर्थं संमार्ज्य । प्रतिपदं व्रीह्याढकेन तदर्धेन वा तण्डुलेन तदर्धेन तिलेन च पीठिकां आरचय्य। तदुपरि द्वौद्वौ दर्भौ प्रत्यस्य । तदुपरिष्टात् सौवर्णान् राजतान् ताम्रान्वा मृण्मयान् पक्वबिम्ब फलोपमान् अच्छिद्रान् स्वनवतः कालमण्डलवर्जितान् अभिन्नान् पाषाणस्फोटवर्जितान् द्रोणेन तदर्धेन वा वारिणा परिपूरणोचितान् सप्तदशकुम्भान् वार्याढकेन पूरणोचितान् चतुष्षष्टिशुद्धोदककुम्भान् च तन्तुना 'इन्द्रं नत्वा"इति परिवेष्टितान् विष्णुगायत्र्या प्रक्षाल्य । कलशास्पदमेदिन्याः पश्चिमे भागे धान्यपीठं विधाय । आचार्यः स्वयं भूतशुद्धिं कृत्वा । पुण्याहं वाचयित्वा । संप्रोक्ष्य । तस्मिन् प्रागग्रान् उदगग्रान् वा दर्भान् संस्तीर्य । तेषु एतान् ओं इति ब्रह्मादीशानन्तं अधोमुखान् संस्थाप्य । तेषां उपरि ओं षौं नमः पराय परमेष्ठ्यात्मने नमः इति त्रीन् त्रीन् दर्भान् विन्यस्य । प्राङ्मुखः सन् अर्घ्यातोयेन ओं यां नमः पराय पुरुषात्मने नमः इति प्रोक्ष्य । ओं रां नमःपराय विश्वात्मने नमः इति अक्षतान् विकीर्य । ओं वां नमः पराय निवृत्यात्मने नमः इति उत्तानीकृत्य । विधिवत् अग्निं संसाध्य । विष्णुगायत्र्या आज्येन स्नपनद्रव्याणि संसिच्य । यथोचितं वस्त्रपूतैः घृतादि स्नपनद्रव्यैः तत्तन्मन्त्रैः कुम्भान् आपूरयेत्।

ओं लां नमः पराय सर्वात्मने नमः इति सप्तदशकलशान् उद्धृत्य । तेषु एकं मध्यमनवक **मध्यमं कुम्भं द्रोणमाणेन घृतेन** ओं वासुदेवाय नमः इति संपूर्य । मध्ये संस्थाप्य । तादृश प्रमाणेन **उष्णोदकेन** आपूर्य । ओं पुरुषाय नमः इति **घृतकुम्भस्य प्राच्यां** च । तस्य **आग्नेयदिक्कुम्भं** माणिक्यपद्मरागनील वज्रपुष्यराग प्रवाल मौक्तिक मरतक वैदूर्यनामभिः **नवरत्नैः** सरत्नोदकं ओं केशवाय नमः इतिसंपूर्य । **तद्याम्यायां** सोदकुम्भं कदलीदाडिम चूतामलकबिल्वनालिकेरपनस मातुलङ्गाभिधैः भिन्नैः फलैः ओं सत्याय नमः इति । घृतस्य **नैऋतकुम्भं लोहोदकेन** सुवर्ण रजतताम्र सीस त्रपुकांस्यायोभिधानैः प्रत्येकं निष्कप्रमाणैः सप्तभिः लोहैः ओं नमो नारायणाय' इति। **तत्पश्चिमे**सजलं कुम्भं रजनीसूर्यवर्तिनीसहदेवी शिरीष सदाभद्र कुशाग्रैः **मार्जनद्रव्यैः** प्रत्येकं मुष्टिमाणैः ओं अच्युताय नमः

इति। तस्य **मारुतं** सजलं कुम्भं चन्दनकुष्ट कुङ्कुमागरु उशीर ह्रीबेर गिरिसंभव मांसीमुराभिधैः पृथक् पलमितैः **गन्धद्रव्यैः** ओं माधवाय नमःइति। तस्य **कौबेरं** सजलं कुम्भं नीवारवेणुशालि प्रियङ्गु यव कङ्गु षाष्टिक गोधूमतण्डुलैः प्रत्येकं मुष्टिमात्रैः ओं अनन्ताय नमः इति। तस्य **ऐशानं** सजलं कुम्भं यव वेणु व्रीहिभिः प्रत्येकं कुडुप प्रमाणैः ओं गोविंदाय नमः इति च संपूर्य । **ब्रह्मस्थान नवकस्य मध्यमं** कुम्भं सोदकं **पाद्याभिधानं** तुलसी पद्म दूर्वाक्षत श्यामाक विष्णुपर्णी बिल्वपत्रैः पलमात्रेण चन्दनेन च ओं विष्णवे नमः इति संपूर्य । **याम्य** नवकस्य मध्यमं **अर्घ्याख्यं** सोदकं कुम्भं सिद्धार्थाक्षत कुशाग्र पूर्वोक्त फलयव तिल चन्दनपुष्पैः प्रत्येकं मुष्टिमात्रैः, चन्दनेन त्रिनिष्कमात्रेण ओं मधुसूदनाय नमः इति । **पश्चिम** कुम्भनवकस्य मध्यमं **उपस्पर्शनाख्यं** सजलं कुम्भं तक्कोल चंपकमुकुलकर्पूर जातीफल एलालवङ्गत्वक्कन्दनपुष्पैः प्रत्येकं पलार्धपरिमाणैः ओं त्रिविक्रमाय नमःइति । **उत्तर** नवकस्य मध्यमं **पञ्चगव्याख्यं** कुम्भं दधिद्विगुणेन आघारेण,तस्मात् त्रिगुणेन पयसा तच्चतुर्गुणेन मूत्रेण तस्मात् चतुर्गुणेन शकृद्वारिणा च.

गोमूत्रं विष्णुगायत्र्या गन्धद्वारेति गोमयं।
आप्यायस्वेति च क्षीरं दधिक्राविण्णेति वै दधि।
घृतं शुक्रमसीत्येवं गव्यानि सहयोजयेत्।

अथवा विष्णुगायत्र्या,यद्वा ''परमेष्टी शकृन्मन्त्रः,गोमूत्रस्य तु पूरुषः। विश्वमन्त्रः भवेत् दध्नः निवृत्तिः सर्पिषा भवेत्।पयसः सर्वमन्त्रः स्यात् यद्वाचाष्टाक्षरेण वा । एवं संयोज्य । देवस्यत्वेति सर्वाणि एकीकृत्य । एवं साधितेन एतेन पञ्चगव्येन द्रोणमानेन । एवं संयोजनप्रकारः स्नपनविधौ, प्रोक्षणे तु एतत्सर्वं पञ्चकं समं।प्राशने तु

गोमयेन समं मूत्रं दधिस्यात् द्विगुणं ततः।
ततः चतुर्गुणं सर्पिः सर्पिषाऽष्टगुणं पयः।
प्राशने पञ्चगव्यस्य प्रमाणमिदमीरितम्।
द्रोणमानं पञ्चगव्यं घृतमानं च तादृशम्।
तादृगेव दधि क्षीरं तावदेव च माक्षिकम्।
अर्धं वास्यादाढकं वा न्यूनंचेदासुरं भवेत्।
गृहार्चास्नपने न्यूनं प्रस्थेनैव प्रकल्पयेत्।
पञ्चगव्यानि गृह्णीयात् मृत्पात्रे नूतने शुभे।

कपिलायाः जरायाः वा पञ्चगव्यं प्रशस्यते।
न आर्तायाः न च गर्भिण्याः न वृद्धायाः कदाचन।
न अवत्सायः उपादद्यात् धेनोमूत्रं शकृद्वयम्।
भूमिष्ठं गोमयं ग्राह्यं सोष्णं कृम्यादि धूषितम्।
निष्पीड्य सम्यक् गृह्णीयात् गोमयस्य रसं पुनः।
सद्यस्तप्तं घृतं शुद्धं अहोरात्रोषितं दधि।
क्षीरं ग्राह्यमतप्तं च दशहाज्जन्मनः परम्।एवं संपाद्य ।

ओं वामनाय नमः इति । **आग्नेय नवकस्य मध्यमं** कुम्भं **दध्ना** ओं श्रीधराय नमः इति **नैऋतकुम्भ** नवकस्य मध्य कुम्भं **पयसा** ओं हृषीकेशाय नमः इति, **वायवीय**कुम्भ नवकुम्भ नवकस्य मध्यमं कुम्भं **मधुना** ओं पद्मनाभाय नमः इति, **ऐशान्यां** कुम्भनवकस्य मध्यमं कुम्भं शमीपलाशखादिर बिल्वाश्वत्थ विकङ्क त औदुम्बर न्यग्रोधत्वक्भिः पलार्धपरिमिताभिः कृतेन **कषायेन** ओं दामोदराय नमः इति च संपूर्य । विष्णुगायत्र्या सप्तदश द्रव्य कुम्भान् संस्थाप्य । मध्यमनवकस्य पूर्वनवकाद्यष्टनवकमध्यद्रव्यकुम्भानां च परितोऽष्टावष्टौ शुद्धोदकलशान् द्वादशाक्षरमन्त्रेण संस्थापयेत् ।

<u>पूर्वोक्तद्रव्याऽलाभे तु-</u>

पाद्यद्रव्यांतरालाभे दूर्वाग्रेपि च सर्षपः।
शस्तमाचमनीये तु तक्कोलं मार्जनांबसि।
सहदेवी गन्धतोये चन्दनक्षोद इष्यते।
कषायतोयेचाश्वत्थं शीतमुष्णोदके सति।
रत्नोदके वज्रमेकं कदळ्ळयेका फलांबसि।
सुवर्णं लोहपानीये शालितण्डुलमक्षते.
यवोदकघटे व्रीहिः शस्यते कमलासन।
अलब्धे दधिनीक्षीरं क्षीरालाभे तु तद्दधि।
मधून्यलब्धे सर्पींषि तदलाभे भवेन् मधु।
अलाभे पञ्चगव्यानां घृतमेवैकमिष्यते।

पञ्चगव्येषु यस्यस्यात् अलाभस्तत्पदे घृतम्।

इति भगवदुक्तैः एवं द्रव्यपूरणं कृत्वा । परिस्तीर्य। सप्तभिः पञ्चभिस्तृभिः वा दर्भैः कृतान् कूर्चान् कुम्भेष्ववागग्रान् महाकुम्भे **चतुर्विंशतिभिर्दर्भैः**कृतं कूर्चं कर्णमानं तथा निक्षिप्य.तां चक्रमन्त्रेन शरावैः पिधाय । 'युवासुवासा इति मन्त्रेण वाससा प्रत्येकमलाभे, प्रतिव्यूहं वा सर्वानावेष्ट्य । आचार्यो मूर्तिपैर्ब्राह्मणैस्सह देवसमीपमासाद्य । 'उत्तिष्ठ ब्रह्मणस्पत इति देवमुत्थाप्य । भद्रंकर्णेभिः इति स्नानसनवेदिकायां विनिवेश्य। वेदविद्ब्राह्मणैरयुग्मैस्सह पुण्याहं वाचयित्वा । तान्यथावित्तानुसारं तोषयित्वा । गुरुः प्राणानायम्य । स्थापितेषु तोरणध्वजकुम्भेषु तत्तद्देवानावाह्य अभ्यर्च्य । मण्टपद्वारेषु **तौर्यत्रिकं** प्रवर्तयित्वा । पूर्वसंसाधिताऽग्नौ यावत्कलशसंख्यया मूलमन्त्रेणाज्याहुतीर्हुत्वा । अन्यस्मिन् संपाताज्यं संगृह्य । चरुणा नृसूक्तेन षोडशाहुतीश्च हुत्वा । देवं गन्धादिभिरभ्यर्च्य । कुम्भेषु संपाताज्यारोपणमारचय्य । घृतादि द्रव्यकुम्भेषु आधारादि पद्मान्तं पीठं संकल्प्याऽभ्यर्च्य । घृतकुम्भे ओं नमो भगवते परमात्मने वासुदेवायागच्छागच्छ इत्यावाह्य । अभ्यर्च्य ।

अर्घ्यादिताम्बूलान्तं संपूज्य । उष्णोदक फलमार्जनाक्षत रत्नलोह गन्धयव पाद्याऽर्घ्य आचमन पञ्चगव्य दधिपयो मधुकषायकुम्भेषु पुरुषसत्य अच्युतानन्त केशव नारायण माधव गोविन्दविष्णु मधुसूदन त्रिविक्रम वामन श्रीधर हृषीकेश पद्मनाभ दामोदरान् क्रमेण आवाह्य अभ्यर्च्य । अर्घ्यादि तांबूलान्तं संपूज्य । सर्वेषु शुद्धोदकुम्भेषु च अष्टाक्षरेण आवाह्य अभ्यर्च्य। तदनु ओं धान्याधि दैवतायै भूम्यै नमः, ओं कूर्चाधि दैवताय अस्त्रायफट्, ओं चक्रिकाधिदैवताय ओं सुदर्शनाय नमः, ओं वासोधिदैवताय विष्णवे नमः । अन्येषां यागद्रव्याणां ओं जनार्दनाय नमः । इति च आवाह्य अभ्यर्च्य । देवस्य विष्णु गायत्र्या अर्घ्यं त्रीणि पदेति पाद्यं, आपःपुनन्तु इति आचमनं, तद्विष्णोः इति दन्तधावनं, विष्णु गायत्र्या जिह्वानिर्लेपनं, वामदेव्यं इति अभ्यङ्गं, विष्णोर्नुकं इति आमलक वारि, नते विष्णुः इति अभिषेकं, अग्निःमूर्धा इति प्लोतवस्त्रं, प्रणवेन वस्त्रं, उत्तरीयं च दत्वा।पुनः अर्घ्यादि दीपान्तं अर्चयित्वा ।

छिन्नकौतुकतन्तुं सपुष्पं समर्चितं पाद्यकुम्भं विष्णुगायत्र्या उद्धृत्य।मूर्तिप दत्तं आचार्यः करे गृहीत्वा । पाद्यकुम्भस्थाऽवागग्रकूर्चाहृतजलेन देवस्य शिरसि प्रणवेन संप्रोक्ष्य । विष्णुगायत्र्या पाद्यवारिणा, प्रविष्णुरस्तु इति अर्घ्याजलेन, न ते विष्णुः इति आचमनाम्बुना, विष्णोः कर्माणि इति पञ्चगव्येन, दधिक्राविण्णेति दध्ना, पयोव्रत साम्ना पयसा, मधुवातेति मधुना ओषध्यः इति कषायेन, त्वं विष्णुः इति उष्णजलेन, याः फलनीः इति फलवारिणा, शन्नोदेवीः इति मार्जनांभसा, सावित्र्या अक्षतोदकेन,

त्रातारमितिरत्नोदकेन,महाव्याहृत्या लोहवारिणा, गन्धद्वारेति गन्धांबुना, शतधारेति यवोदकेन, घृतस्नातेति साम्नाघृतेन च अथवा पुरुषसूक्तस्य ऋग्भिः षोडशभिः इदं विष्णुः इत्यनयार्चया वा, द्वादशाक्षरेण, षडक्षरेण विष्णुगायत्र्या वा स्वैः स्वैः मूर्तिमन्त्रैः वा पाद्यादि घृतान्तैः प्रतिद्रव्यकुम्भस्नपनं उपस्नानोत्तरीयार्घ्यचमनीय गन्धपुष्पधूपदीपान्तं देवं अभ्यर्च्य अभिषिच्य। द्रव्यकुम्भोद्धरणान्तरान्तरा शुद्धोदकुम्भान् द्वादशाक्षरेण उद्धृत्य, अभिषिच्य । तदनु नव सप्त पञ्च त्रीन् वा कुम्भान् एकं वा कुम्भं पुण्याहपुरस्सरं हरिद्रातण्डुलस्य चूर्णैः संपूर्य । धान्य पीठे निधाय । तान् सवस्त्र रत्नलोहकूर्च पल्लवापिधानान् कृत्वा । तत्र श्रियं आवाह्य अभ्यर्च्य । श्रीसूक्तेन तैः अभिषिच्य ।ततः देवं प्रदक्षिणीकृत्य । नत्वा, सहस्रधारया स्नापयित्वा । प्रणवेन अलङ्कारासनं दत्वा. अर्घ्यं आरभ्य नीराजनान्तं इष्ट्वा।खारिद्रोणं तदर्धं वा तण्डुलं दत्वा। चतुर्विधं अन्नं निवेद्य। नित्यहोमं कृत्वा। ततः सुखासीनं देवं नत्वा। स्तुत्वा।मनोरथं प्रार्थयेत्।

यजमानोऽपि गुरवे शतनिष्कपरिमितां दक्षिणां ऋत्विजां तदर्धं पादं वा परिचारक वेदपाठकादीनां दत्वा । पूजार्थं आहृतं शिष्टं सर्वं आचार्याय दद्यात् । एतदधमोत्तमम् । एतेषु एकोत्तराशीतिकुम्भेषु सर्वकोणस्थ द्वात्रिंशच्छुद्धोदकुम्भहीनं (49कलशाः)अधममध्यमम् । सर्वैः चतुष्षष्टि शुद्धोककुम्भैः हीनं (17कलशाः)अधमाधमम् ।

मध्यमोत्तमस्नपनविधिः(277 कुम्भैः)

अथ मध्यमोत्तमस्नपनविधिः उच्यते-

मध्ये पूर्वोक्ताधमोत्तमैकाशीतिकलशस्थापने विहितेनसूत्रवर्त्मनैव तद्बहिः चतुर्दिक्षु तथा सूत्राणि आस्फाल्य । द्वे द्वे पङ्क्ति वीथ्यर्थं तत्परितः संमार्ज्य । शिष्टेषु एकाशीतिपदेषु मध्ये कुम्भानां नवकं इन्द्रादि सोमान्तासु दिक्षु प्रतिदिशं षट्कं, आग्नेयादिषु कोणेषु प्रत्येकं चतुष्कं, एवं एकोनपञ्चाशत्कलशान् संस्थाप्य । शेषाणि द्वात्रिंशत्पदानि वीथ्यर्थं परिमार्ज्य । एवं चतुर्दिक्षु कृत्वा । प्राक्स्थित एकोनपञ्चाशत्कलश **मध्यनवकमध्यमं** ओं वराहाय नमः इति **गुडोदकेन** । **दक्षिणे** एकोनपञ्चाशत्कलश मध्यनवकमध्यमं ओं नारसिंहाय नमः इति **इक्षुरसेन** । **पश्चिम** एकोनपञ्चाशत्कलश मध्यनवकमध्यमं ओं श्रीधराय नमः इति **नालिकेरजलेन** । **उत्तर** एकोनपञ्चाशत्कलश मध्यनवकमध्यमं **शान्तिकुम्भं** तुलसीवेणुनीवारशालिश्वेतसर्षपतिलैः तुलसीं विना प्रत्येकं कुडुब प्रमाणैः मुष्टिमात्रतुलस्या च, शान्तिद्रव्याऽभावे तुलस्या एकया वा ओं हयग्रीवाय नमः इति च।

गुडाभावे च इक्षुरसं तस्य अभावे गुडोदकम्।
गुडमानं पलाशीतिः अर्धं अर्धार्धमेव वा।
नालिकेरजलाभावे तत्स्थाने क्षीरमिष्यते।

आपूर्य । गुडोदके ओं वराहाय नमः, इक्षुरसे ओं नृसिंहाय नमः, नालिकेरोदके ओं श्रीधराय नमः, शान्तिवारिणी ओं हयग्रीवाय नमः इत्यावाह्य अभ्यर्च्य । 'मधुवातेति गुडोदकेन, मधुनक्तं इति इक्षुरसेन, मधुमान्न इति नालिकेरांभसा, वेदाहं इति शान्तिजलेन, जितंते इति शुद्धोदकुम्भैः सम्स्नाप्य । तदनु पाद्यादिघृतान्तैः स्नपनं आचरेत् । स्नपनान्ते निशाचूर्णैः स्नपनं कुर्यात्। इति मध्यमोत्तम स्नपनविधिः।

एकोत्तराशीति कलशस्थ चतुष्षष्टिशुद्धोदकुम्भान् तत्परितः चतसृषु दिक्षु स्थापितैकोन पञ्चाशत्कलशस्थ द्विनवत्युत्तर संख्याकान् शुद्धोद कुम्भान् च क्रोडीकृत्य. षट्पञ्चाशदुत्तरशतशुद्धोदकुम्भेषु अर्धशुद्धोदकुम्भहीनं मध्यममध्यमं, सर्वशुद्धोदकुम्भैः विना मध्यमाऽधमम्।

उत्तमोत्तमस्नपनविधिः(473 कलशस्नपनविधिः)

अथ तावत् उत्तमोत्तमस्नपनविधिः उच्यते ।

पूर्वोक्त एकाशीति कलशास्पदस्य पूर्वाद्याशासु चतसृषु दिक्षु प्रतिदिशं च एकोनपञ्चाशत्कुम्भेषु स्थापितेषुसत्सु, एकाशीति कलशस्थापनस्य आग्नेयादिषु चतुर्षुकोणेषु प्रतिकोणं तत्तत्सूत्रवर्त्मनैव पूर्ववत सूत्राणि आस्फाल्य । तथैव एकोन पञ्चाशत्क लशान् संस्थाप्य । आग्नेय एकोनपञ्चाशत्कलश मध्य नवकमध्यमकुम्भं मङ्गलाख्यं इन्द्रवल्यङ्कुर, अश्वत्थपल्लव, कुशेशय, एकपत्रांबुज, चन्दन, कुष्ट, कुङ्कुम, रोहिणद्रुम, यूथिका, मल्लिका, उत्पलत्रय, जाति, चंपक, केतकीभिः द्वौ-इन्द्रवल्ल्यङ्कुरौ, अश्वत्थपल्लवं मुष्टिमात्रं एकपत्रांबुजमेकं, कुशेशयमेकं, पुष्पाष्टकं मुष्टिमात्रं, चन्दनानि एकैकंपलं-ओं नमो भगवते वासुदेवाय इति-नैऋत एकोनपञ्चाशत्कलशमध्य नवकमध्यमकुम्भं सर्वौषधाख्यं-मांसीकुष्ठ, हरिद्राद्वितय, मुरा, शैलेय, चंपक, मुकुल, मुस्ता, वचा, कर्पूरैः, प्रत्येकं पलमितैः । क्षुण्णैः, ओं नमोभगवते संकर्षणाय नमः, वायव्य एकोनपञ्चाशत्कलशमध्य नवकमध्यमकुम्भं सर्वगन्धाख्यं, कर्पूरकुङ्कुम कुष्ठ मांसी मलयज, मुरा प्रियङ्गु, केसर, मुस्ता तमाल, नागकेसर, मूलद्वितय, कच्चोर, सुरपर्णी, केसर, उशीर, तार, लोध्र, हरिचन्दन, अगरुद्वितय, सितकुष्ठ, कालेय, ग्रन्थिपल्लव,

चम्पकमुकुलचूर्णितैः प्रत्येकं पलसम्मितैः ओं नमोभगवते प्रद्युम्नाय नमःइति । ऐशाने एकोनपञ्चाशत्कलश मध्यनवक मध्यमकुम्भं मूलौषधाख्यं व्याघ्री, सिह्मी, बला, शरपुङ्ख, शतावरी, बिल्वमूल, वचा, शुण्ठी गोरण्डी, शतमूलैः, पृथक्पलमितैः चूर्णितैः ओं नमोभगवते अनिरुद्धाय इति।

(मङ्गलोदकवस्तूनां अलाभे चन्दनं वरं।
सर्वौषधीनां एतासां अलाभे कुष्टमुच्यते।
अलाभे सर्वगन्धानां शस्यते चन्दनं वरं।
मूलौषधीनां सर्वासां अलाभे शस्यते बला।)

आपूर्य । मङ्गलोदके वासुदेवं,सर्वौषधीकुम्भे संकर्षणं, सर्वगन्धकुम्भे प्रद्युम्नं, सर्वमूलौषधीकुम्भे च अनिरुद्धं आवाह्य। संपूज्य। विष्णोर्नुकमिति मङ्गलांबुना, ओषध्य इति सर्वौषधीजलेन, नारायणानुवाकेन सर्वगन्धांबुना, या ओषधीरिति, अष्टाक्षरेण शुद्धजलैश्च संस्नाप्य । अनन्तरं घृतान्तं स्नापयेत् । इत्युत्तमोत्तमम् । सर्वत्र क्रोडीकृत्य । अष्टचत्वारिंशदुत्तर चतुश्शत शुद्धोदकुम्भेषु अर्द्धशुद्धोदकुम्भैः हीनं उत्तममध्यमं । सर्वैः अष्टचत्वारिंशदुत्तर चतुश्शतशुद्धोदकुम्भैः विना पञ्चविंशतिद्रव्यकुम्भैरेव कृतं उत्तमाधमम्। इति स्नपननवकम्।

अथ **अष्टोत्तरशतकलशस्नपन** विधिः उच्यते-

कलशस्थापन प्रागायतेषु षड्ड उदगायतेषु च तथा सूत्रेषु आस्फालितेषु पञ्चविंशतिपदानि भवेयुः। तेषु मानुषेद्वादशपदानि हित्वा । मध्ये ब्रह्म दिव्यस्थपदनवकं एकीकृत्य । सूत्रवर्त्मना कोष्टानां यथाशतंभवति तथा कृत्वा।तत्र प्राच्यां अवाच्यां प्रतीच्यां उदीच्यां द्वे द्वे पङ्क्ती हित्वा तत्परितः द्वे द्वे पङ्क्ती संमार्ज्य । तत्र ब्रह्मादीशान्तासु दिक्षु विदिक्षु च नवपदानि कुम्भास्पदानि, एवं अनयारीत्या अष्टोत्तरशतकलशास्पदानि कल्पयेत् । एवं कलशान् संस्थाप्य । ब्राह्ममध्यकलशचतुष्टयाग्नेय पदकुम्भं पूर्वोक्तप्रमाणेन घृतेन, अवशिष्टान् त्रीन् शुद्धोदकेनापूर्य । तत्परितः पूर्वादीशान्ताऽष्टदिक्स्थिताऽष्ट चतुष्काऽऽग्नेयकुम्भाष्टकं, उष्णोदक,रत्नोदक, फलोदक, लोहतोय, मार्जनोदक, गन्धवारि, अक्षतवारि,यवोदकाणि पूर्वोक्तमानैःआपूर्य । मानुषेभागे प्राच्यादीशानान्त स्थिताऽष्ट नवक कुम्भाष्टकं एवंकृते द्रव्यकलशाः सप्तदश शुद्धोदकुम्भानां एकोत्तराशीतिः । एवं सर्वमपि क्रोडीकृत्य अष्टोत्तरशतं कलशानां भवति। देवमन्त्राभिषेकाश्च पूर्ववत्।

अथ **<u>एकोनपञ्चाशत्कलशस्नपन</u>** विधिः उच्यते-

प्रागायतानि दश तथा उदगायतानि च सूत्राणि आस्फालयेत् । एवं चेत् एकोत्तराशीतिपदानि भवेयुः। कलशास्पदस्य चतसृषु दिक्षु द्वे द्वे पङ्क्ती हित्वा।ततः एकस्यां एकस्यां पङ्क्तौ सम्मार्जितायां मध्ये नवकं दिक्षु प्रतिदिशं षट्कानि विदिक्षु प्रत्येकं चतुष्कानि एवमेकोनपञ्चाशत्कलशास्पदानि भवेयुः। मध्ये नव,दिक्षु चत्वारः,विदिक्षु चत्वारःद्रव्यकुम्भाः भवन्ति।एवं चेत् सप्तदशद्रव्यकुम्भाः द्वात्रिंशत् शुद्धोदकुम्भाः मन्त्रदेवताः स्नपनं च पूर्ववत्।

अथ **पञ्चविंशतिकलशास्नपनविधिः-**

यथा एकोत्तराशीतिपदानि भवेयुः,तथा सूत्राणि आस्फाल्य। चतसृषु दिक्षु एकैकां पङ्क्तीं हित्वा। ततः द्वे द्वे पङ्क्तीं सम्मार्ज्य। मध्ये नव प्रतिदिशं त्रीन् त्रीन् प्रतिकोणमेकैकं कलशानां संस्थाप्य।मध्यस्थ त्रिक चतुष्टय मध्यस्थाश्च कोणचतुष्टयस्थाः चत्वारश्च द्रव्यकुम्भाः सप्तदश अष्टौ कुम्भाः शुद्धोदकपूरिताः। द्रव्य मन्त्रदेवताः स्नपनं पूर्ववत्।यद्वा चन्दनागरु काश्मीर कुष्ठ तगर वीणासिताऽगरु हरिचन्दनह्रीबेरैः गन्धद्रव्यैः मध्य कुम्भनवकं, दिक्षु स्तिथान् चतुरःविदिक्षु चतुरश्च तमालसितकुष्ठ सुरपर्णीरस कर्पूर नागकेसर मुस्ताचम्पकमुकुल प्रियङ्गु पुष्प कालेय ग्रन्थिपल्लव बीज मांसि खर्जूर शैलेय ह्रीबेरद्रुम मुरैः वा सर्वान् कुम्भान् पूरयेत्।

अथ **<u>षोडशकलशास्नपन</u>** विधिः

प्रागायतानि नव तथा उदगायतानि च सूत्राणि तथा सति चतसृषु एकैकां पङ्क्तीं हित्वा। द्वयोः द्वयोः पङ्क्त्योः सम्मार्जितयोः मध्ये चत्वारि दिक्षु द्वे द्वे विदिक्षु च एकैकं, एवं षोडश कलशास्पदानि भवेयुः। मध्य चतुष्कस्य आग्नेयं कुम्भं पूर्वोक्तैः नवभिः रत्नैः नैऋतं तथा सप्तलोहैः,वायव्यं तथागन्धद्रव्यैः ऐशानं तथा आज्येन च आपूर्य। पूर्वादिस्थित द्वादशकुम्भान् पाद्यार्घ्य दध्याचमन पञ्चगव्य क्षीराक्षत मार्जन मधु कषायकुशोदक यवैः पूर्वोक्तमानैः क्रमेण आपूर्य। पुरुषादि दामोदरान्तान् आवाह्य।नृसूक्त षोडशऋग्भिः स्नपनं कुर्यात्।

अथ **<u>द्वादशकलश</u>** स्नपन विधिः-प्रागायतानि सप्त तथा उदगायतानि च सूत्राणि,तथा सति मध्ये चतुष्कं विहाय चतसृष्वपि दिक्षु एकैकां पङ्क्तीं संमृज्य।कोणेषु चतसृषु त्रिषु त्रिषु पदेषु मृष्टेषु, चतुष्कस्य बहिः प्राच्यां अवाच्यां प्रतीच्यां उदीच्यां द्वे द्वे भवतः। एवं सति द्वादश कलशास्पदानि भवेयुः। मध्यचतुष्कस्य आग्नेयं कुम्भं पूर्वोक्तैः नवभिः रत्नैः नैऋतं लोहैः,वायव्यं गन्धद्रव्यैः,ऐशानं सर्पिषा च आपूर्य।तत्पूर्वाद्युत्तरान्त पदस्थितान् अष्टौ कुम्भान् क्रमेण पाद्य दध्यर्घ्य क्षीराचमन मधु पञ्चगव्य फलैः पूर्वोक्तमानैः आपूरयेत्।मन्त्रदेवताःपूर्ववत्।

एतेषां अलाभे तु मध्यचतुष्कं आग्नेयं आरभ्य बहि स्थित सोमकुम्भान्तं कोष्टाऽगरु कालीय ग्रन्थिपल्लवबीज चन्दन काश्मीर मांसी तमाल मुर पर्वतोत्थसुवर्ण रजःकण चंपक मुकुळ खर्जूरद्रवैः प्रादक्षिण्येन आपूरयेत्।

अथ **नवकलशस्नपन** विधिः

प्रागायतानि सूत्राणि चत्वारि तथा उदगायतानि च। तथा सति पदानि नव भवेयुः। मध्यकुम्भं आरभ्य ऐशानन्तं घृत पाद्य दध्यर्घ्य क्षीराचमन मधुपञ्चगव्य फलैः क्रमेण । नवरत्नैः वा पूरयेत्।मन्त्र देवताः पूर्ववत्।

अथ **पञ्चकलशस्नपन** विधिः

एकः मध्ये चतसृषु अपि दिक्षु चत्वारः। मध्यं आरभ्य सौम्य पर्यन्तमणिप्रवाल मौक्तिक वज्र वैदूर्य पञ्चलोहैः। अथवा प्रत्येकशः पञ्चगव्यैः वा पूरयेत्। पञ्चगव्यस्य मन्त्रदेवताः पञ्चोपनिषदः।

अथ **एककलशस्नपन** विधिः एकं कलशं मध्ये संस्थाप्य पञ्चामृतैः पञ्चगव्यैः वा पूरयेत्।गुरवे यथाशक्ति निष्कमाना देया।

इति श्री वराह गुरु विरचितायां क्रियकैरव चन्द्रिकायां उत्तमादि स्नपन विधिः नाम एकत्रिंशः परिच्छेदः

****

अथ द्वात्रिंशः परिच्छेदः

अथ <u>एकोत्तर सहस्रकलशस्नपन</u> विधिः उच्यते

पूर्वेद्युरेव भगवतः पूर्ववत् अङ्कुर प्रतिसराधिवासान् च कृत्वा । द्वात्रिंशद्धस्तविस्तारद्विगुणेन आयतं कलशास्पद भूभाग वैपुल्यानुगुणं महत् अन्यत् मण्डपं कल्पयित्वा । यथापुरं द्वारादीनि च। कलशास्पदभूमिं पञ्चविंशतिधा विभज्य। मध्यमं ब्राह्मंपदं एकोत्तराशीति घटास्पदं यथा भवति तथा विभज्य।ब्रह्मादीशानान्तं नव नव पदानि एकाशीति घटास्पदानि हित्वा । शिष्टानिअष्टोत्तराशीति पदानि संमार्ज्य । प्रतिपदं व्रीहीणां आढकेण तण्डुलानां तदर्धेन तदर्धेन तिलानां पीठिकां कृत्वा । तदुपरि द्वौ द्वौ दर्भौ विन्यस्य। तदनु सुवर्णादि लोहजान् मृण्मयान् पूर्वोक्त लक्षणयुतान् द्रोणेण वा जलानां तदर्धेन वा पूर्यान्। द्रव्यकुम्भान् , जलानां आढकेन पूर्यान् च। कलशान् विष्णुगायत्र्या प्रक्षाल्य । मृण्मयांस्तु वामे करतले विन्यस्य. तदितरेण करेण तन्तुं गृहीत्वा वेष्टिततन्तूनां

अन्तरालंयवमात्रं अर्धाङ्गुलमात्रं वा यथा भवेत् तथा । "इन्द्रं नत्वे'ति मन्त्रेण आवेष्ट्या। कलशास्पदमेदिन्याः पश्चिमे भूतले धान्यपीठं विधाय । पुण्याहं वाचयित्वा । तस्मिन् प्रागग्रान् उदगग्रान् वा दर्भान् संस्तीर्य । तत्र ब्रह्मादीशानपर्यन्तं कुम्भान् अधोमुखान् ओं इति विन्यस्य । तेषां उपरि पूर्ववत् त्रीन् त्रीन् दर्भान् परमेष्ठिमन्त्रेण विन्यस्य। अर्घ्या तोयेन पुरुष मन्त्रेण प्राङ्मुखः प्रोक्ष्य। विश्वमन्त्रेण अक्षतान् विकीर्य। निवृत्तिमन्त्रेण उत्तानिकृत्य । तदनु विधिवत् अग्निं संसाध्य। सर्पिषा विष्णुगायत्र्य अष्टोत्तर शताहुतिः हुत्वा संपातेन स्नपन द्रव्याणि संसिच्य । वस्त्रपूतैः स्नपनद्रव्यैः तत्तत् देवता मन्त्रैः कलशान् संपूर्य। द्रव्य कलशान् उद्धृत्य । विष्णुगायत्र्य यथास्थानं वक्ष्यमाणेन विधिना स्थापयेत्।

मध्ये ब्राह्मेभागे एकोत्तराशीति घटाः। दिव्ये ऐन्द्रे दिव्ये याम्ये वारुणे दिव्ये सौम्ये च प्रतिदिशं एकोत्तराशीतिकलशाः । दिव्यभागाग्नेयादि कोणचतुष्टयेष्वपि प्रतिकोणं एकोनपञ्चाशत् संख्याकाः कलशाः।

तेषां तु प्रागुदगग्राणि दश सूत्राणि आस्फाल्य। पूर्वादि दिक्षु द्वे द्वे पङ्क्ती हित्वा । परितः एकैकां पङ्क्तिं संमार्ज्य । मध्ये नव पूर्वाद्युत्तरान्तं षट् षट् । आग्नेयादीशानान्तं चत्वारि चत्वारि कलशाः स्थाप्याः।

तत्परितश्च मानुषे भागे षोडशस्थानेषु च प्रतिस्थानं पञ्चविंशतिकलशाः स्थाप्याः । तेषां तु प्रागुदगग्राणि दश सूत्राणि आस्फाल्य । चतुसृषु दिक्षु एकैकाम् पङ्क्ती हित्वा । तदनु द्वे द्वे पङ्क्ती सम्मार्ज्य । मध्ये नव दिक्षु त्रीणि त्रीणि विदिक्षु एकैकां । एवं पञ्चविंशति कलशान् स्थापयेत् ।एवं चेत् कलशानां सहस्रं एकोत्तरं भवति ।

(1)ब्राह्मे मध्यनवके नवकमध्यमे सर्वलोहान् ।। सुवर्ण रजत ताम्र सीस त्रपु कांस्याऽयस्सारान् निष्कमात्रान्, माणिक्य पद्मराग नीलवज्र पुष्यक प्रवालमुक्तामरतक वैदूर्याणि । कदली बीजपूरकाऽऽम्राऽऽमलक बिल्व नालिकेर पनस मातुलुङ्गानि मांसि कुष्ठ हरिद्राद्वितय मुराशैलेय चम्पक मुकुल मुस्तावचा कर्पूराणि पृथक् पृथक् पलमात्राणि । कर्पूर कुङ्कुम कुष्ठ मांसि चन्दनमुरप्रियङ्गु केसर मुस्तातमालनागकेसर मूलद्वय, कच्छोर सुरपर्णि केसरोशीर तगर लोध्र हरिचन्दन अगरु द्वय, सितकुष्ठकालेय ग्रन्थिपल्लव चम्पक मुकुलानि प्रत्येकं पलमानानि चूर्णिकृतानि। श्रीवत्स वनमाल शङ्ख चक्र गदांबुज खड्ग शार्ङ्गाणि स्वर्णनिर्मितानि प्रत्येकं निष्कमानानि च सजले कुम्भे ओं नमोभगवतेवासुदेवाय इति विनिवेश्य । तं युवासा इति वासोभ्यां आवेष्ट्य ।

सकूर्चं पिप्पल दलापिधानं कृत्वा। तत्र योगपीठं संकल्प्य । तस्मिन् साङ्गं सपरिवारं वासुदेवं आवाह्य । अर्घ्यादि दीपान्तं अभ्यर्च्य।

(1a) ब्राह्मे तस्य प्राचीनकुम्भनवकमध्यमे कुम्भे सूर्यकान्त पद्मरागौ। तस्य पुरुषो देवता । ब्राह्मे (1b)आग्नेय कुम्भनवकमध्यमे कुम्भे वैदूर्य चन्द्रकान्तौ। तस्य वासुदेवः देवता । ब्राह्मे (1c)याम्यकुम्भनवकमध्यमे कुम्भे इन्द्रनीलायस्यकान्तौ तस्य सत्यो देवता। ब्राह्मे (1d)नैऋतकुम्भनवक मध्यमे कुम्भे प्रवालगरुडौ तस्य सङ्कर्षणो देवता। ब्राह्मे (1e)वारुण कुम्भ नवकमध्यमे कुम्भे पुष्यस्फटिकौ तस्य अच्युतःदेवता । ब्राह्मे (1f)वायव्य कुम्भनवकमध्यमेकुम्भे पद्मरागमरतके तस्य प्रद्युम्नो देवता।

(1g)ब्राह्मे वारुण कुम्भनवकमध्यमेकुम्भे वज्रं,रजतम् तस्य अनन्तः देवता। ब्राह्मे (1h) रौद्रकुम्भनवकमध्यमे कुम्भे ताम्रमौक्तिके तस्य अनिरुद्धः देवता। सर्वेषु शुद्धोदकेषु मौक्तिकानि तेषां देवता नारायणः।

(2) तस्यां प्राच्यां दिव्ये भागे एकाशीतिघटास्पदे मध्यनवक मध्यमे कुम्भे कदलि पनस आम्र मातुलङ्ग भव्य जंबुकेसर बदरि फलानि । तस्य देवता तत्त्वात्मा । तस्य ऐन्द्रे नवक मध्यमे कुम्भे मातुलङ्ग दाडिमफले । तस्य देवता पृथ्वी । तस्य आग्नेय नवकमध्यमे घटे जम्बूनारङ्ग फले । तस्य देवता अपांअधिष्ठात्रि। तस्य याम्य नवकमध्यमे घटे तक्कोलैलाफले । तस्य तेजस्वीपुरुषः देवता । तस्य नैऋत कुम्भ नवकमध्यमे कुम्भे क्षीरिकामलक फले । तस्य वायुर्देवता। तस्य वारुण नवकमध्यमे घटे द्राक्षा खर्जूर फले । तस्य आकाशात्मा देवता । तस्य वायव्य नवकमध्यमे घटे चूतपारावतफले। तस्य देवता मनः। तस्य सौम्य नवकमध्यमे घटे क्षुद्रं पनसफलं। तस्य देवताअहंकारः । तस्य ऐशान्य नवकमध्यमे घटे बिल्वकदलि फले । तस्य देवता बुद्धिः । सर्वेषु शुद्धोदक कुम्भेषु बदरि फलानि देवताः पूर्ववत्। अष्टाक्षरेण पञ्चोपनिषदैः कुम्भानां अभिमन्त्रणम् ।

(3)दिव्ययाम्ये एकाशीतिघटास्पदे मध्यनवक मध्यमे कुम्भे उशीर, कुङकुम, कुष्ठ, मांसी, मलयज, मुर, ह्रीबेर, अगरुपिष्टानि प्रत्येकं पलमात्राणि तस्य देवता त्रैलोक्यमोहनः । तस्य ऐन्द्रे नवक मध्यमे कुम्भे जलदवारेणमूले। तस्य देवता बभ्रुः । तस्य आग्नेय नवकमध्यमे घटे कर्पूरकाश्मीरे । तस्य देवता शौरिः । तस्य याम्य नवकमध्यमे घटे चम्पक मुकुल मांसीपिष्टे । तस्य देवता दाशार्हः। तस्य नैऋत कुम्भ नवकमध्यमे कुम्भे चन्दन रक्तचन्दनक्षोदौ । तस्य देवताअन्नाधिपतिः । तस्य वारुण

नवकमध्यमे कुम्भे सुरपर्णी मौररजसी । तस्य देवतावैकुण्ठः । तस्य वायव्य नवकमध्यमे घटे गिरिजमूल प्रैयङ्गव मूल रजसी । तस्य देवता पुरुषोत्तमः । तस्य सौम्य नवकमध्यमे कुम्भे कुष्ट सितकुष्टपिष्टे । तस्य देवता मुकुन्दः । तस्य ऐशान्य नवकमध्यमे घटे कृष्ण धवलागरुक्षोदौ । तस्य देवता वृषाकपि:। अवशिष्टेषु शुद्धोदक कुम्भेषु तमाल पत्राणि । देवता: पूर्ववत् । पुरुषमन्त्रेण वा पवमानादिभिः सूक्तैः वा कुम्भाभिमन्त्रणम्।

4--दिव्य वारुणे एकोत्तराशीतिघटास्पदे मध्यनवकमध्यमे कुम्भे वापि सरित्कूप ह्रद वृष्टि हिम आपगा समुद्र तटाक पाथांसि नव । तस्य ऐन्द्रे नवक मध्यमे कुम्भे वापीजलं । तस्य आग्नेय नवकमध्यमे घटे सरिज्जलं । तस्य याम्य नवकमध्यमे घटे कूपजलं । तस्य नैऋत कुम्भ नवकमध्यमे कुम्भे ह्रदजलं । तस्य वारुण नवकमध्यमे कुम्भे हिमजलं । तस्य वायव्य नवकमध्यमे वृष्टि। तस्य सौम्य नवकमध्यमे कुम्भे आपगाजलं । तस्य ऐशान्य नवकमध्यमे घटे समुद्रजलं । एतेषां देवतास्तु क्रमेण भार्गवरामरहिताः मत्स्यादयः। शुद्धोदकानां पूर्ववत्।

5--दिव्ये सौम्ये एकाशीतिघटास्पदे मध्यनवक मध्यमे कुम्भे यव गोधूम व्रीहि शालि मुद्ग प्रियङ्गु माष श्यामाक नीवाराणि। तस्य देवता गरुडारूढ: पद्मनाभः। तस्य ऐन्द्रे नवक मध्यमे कुम्भे यवं । तस्य देवता वनमाला । तस्य आग्नेय नवकमध्यमे घटे गोधूमः । तस्य देवता शङ्खः । तस्य याम्य नवकमध्यमे घटे व्रीहिः । तस्य देवता चक्रं। तस्य नैऋत कुम्भ नवकमध्यमे कुम्भे शालिः । तस्य देवताकौस्तुभः । तस्य वारुण नवकमध्यमे मुद्गं । तस्य देवतापद्मं । तस्य वायव्य नवकमध्यमे प्रियङ्गुः। तस्य देवता शार्ङ्ग । तस्य सौम्य नवकमध्यमे कुम्भे माषं । तस्य देवता गदा । तस्य ऐशान्य नवकमध्यमे घटे श्यामाक नीवारः । तस्य देवता खड्गः। शिष्टाः शुद्धोदकाः देवताश्च तथा।

2-1-दिव्ये **आग्नेयेएकोनपञ्चाशत्** घटास्पदे मध्यमनवके घृतं । तस्य **ऐन्द्रषड्के गोमूत्रं**। तस्य **याम्यषड्के क्षीरं**। **वारुण षड्के दधि** । **सौम्य षड्के** गोमयरसः । तस्य आग्नेय कुम्भ **चतुष्टये उष्णोदकं** । नैऋत चतुष्टये पञ्चामृतं । तत्तु क्षीर दधि घृत मधु शर्कराः तस्य ऐशानकुम्भ चतुष्टये सक्तवः । तेषां देवता नारायणः ।

2-2-दिव्ये नैऋते **एकोनपञ्चाशत्** घटास्पदे मध्यनवके तैलं । देवता मत्स्यमूर्तिः । तस्य ऐन्द्रषड्के घनसारद्रव्यं । तस्य याम्याषड्के लाजं। वारुण षड्के मार्जनांभः । सौम्य षड्के च मार्जनद्रव्याणि

तु रजनी, सूर्यवर्तिनी, सहदेवी, शिरिष, सदाभद्र, कुशाग्राणि पृथक् मुष्टिमात्राणि । तस्य आग्नेयादीशानान्तकोणचतुष्टयकुम्भ चतुष्केषु षोडशसु गुडवारि । तेषां देवता वासुदेवः।

2-3-दिव्य **मारुते एकोनपञ्चाशत्** घटास्पदे मध्यमनवके सर्षपतैलं ।(देवता मत्स्य मूर्ति) । तस्य ऐन्द्राषड्के पूर्वोक्त पाद्य द्रव्याणि । तस्य याम्यषड्के अर्घ्यद्रव्याणि पूर्वोक्तानि । वारुण षड्के आचमनीय द्रव्यं। सौम्य षड्के मङ्गलोदकं इन्द्रवल्ल्यादि। आग्नेयादीशानान्तकोण चतुष्टय कुम्भ चतुष्केषु षोडशसु इक्षुरसः। तेषां देवता अनिरुद्धः।

2--4--**दिव्यैशानैकोनपञ्चाशत्** घटास्पदे मध्यमनवके मधु । तस्य ऐन्द्राषड्के सर्वगन्धोदकं कर्पूरकुङ्कुमादि । तस्य याम्यषड्के शान्तिवारि तुलसि,वेणु,नीवारादि। वारुण षड्के सौम्य षड्के च तथा । आग्नेय चतुष्के नैऋत चतुष्केषु वायव्य चतुष्केषु च नालिकेरजलं। तस्य ऐशानचतुष्के क्षीरं । तेषां देवता हरिः।

3---1-मानुषे पदे प्राच्यां कुम्भानां पञ्चविंशतौ मध्यम नवक मध्यमेकुम्भे क्षेत्रतीर्थ, अब्धि, शैल, गज, सूकर, दन्ताग्र, वल्मीक, वृषश्रृङ्गाग्रमृत्तिकाः अष्टौ । तत्परितः स्थिते कुम्भाष्टके प्रच्यादीशानान्तं पूर्वोक्ताः क्रमेण एकैकाः । नवकस्य देवता केशवः। शिष्टषोडश शुद्धोक कुम्भेषु देवता नारायणः।

3-2-तत ऐन्द्राग्नेयान्तराल पञ्चविंशतौ नवकमध्यकुम्भे सहदेवि, वचा, शतमूला, शतावरी, कुमारी,गडूची, सिह्मी, व्याघ्रीत्यष्टौ मूलक्षोदाः। तत्परितः स्थिते कुंभा ष्टके क्रमेण सहदेव्यादिमूलिकाः एकैकाः। नवकस्य देवता नारायणः । शिष्टेषु षोडशशुद्धोद कुम्भेषु च।

3-3-तत्र आग्नेयपञ्चाशतौ नवकमध्यमकुम्भे न्यग्रोध, औदुम्बराऽश्वत्थ, जम्बु, बिल्व, पलाश, मधुक, शिरीषाणां त्वचोष्टौ तद्रसाः । तत्परितः स्थिते कुम्भाष्टके क्रमेण न्यग्रोधादित्वग्रसाः। नवकस्य देवता माधवः । शिष्टशुद्धोदकुम्भानां नारायणः।

3-4-आग्नेययाम्ययोः अन्तराले कुम्भानां नवक मध्यमे कुम्भे पालाश, बिल्व, वकुल, कदंब, आम्र, शिरीष, न्यग्रोधाऽश्वत्थजाः पल्लवाः अष्टौः। तत्परितः स्थितेषु अष्टसु कलशषु पलाश पल्लवाद्यैकैकं पल्लवं क्रमेण। तस्य नवकस्य देवता गोविन्दः। शिष्टषोडशशुद्धोक कुम्भानां नारायणः।

3-5-याम्ये कुम्भानां पञ्चविंशतौ नवकस्य मध्यमे कुम्भे जाती, मल्लिका, प्रियङ्गु, पद्म, वकुल, नन्द्यावर्तक, चम्पक, कुन्दजानि अष्टौ पुष्पाणि । तत्परितः स्तिथकलशेषु अष्टसु जात्यादि पुष्पं एकैकं क्रमेण। तस्य नवकस्य देवता विष्णुः। शिष्टानां पूर्ववत्।

3-6-याम्यनैऋतयोः अन्तराले कुम्भानां पञ्चविंशतौ नवक मध्यमकुम्भे सिद्धार्थ राजसिद्धार्थ वंश,गोरोचनेन्द्रवेणु, षाष्ठ, यव, शमी, चणकानि अष्टौ।तत्परितः स्थितेषु कलशेषु अष्टसु सिद्धार्थाद्येकैकं क्रमेण। तस्य नवकस्य देवता मधुसूदनः। शिष्टानां पूर्ववत्।

3-7-तत्र नैऋते कुम्भानां पञ्चविंशतौ नवकस्य मध्यमे कुम्भे ग्राम्यतिलाऽऽरण्यकतिल, जीरक, कृष्णजीरक, अतसीसंभवच्छिन्न, शतपुष्प, कुठारर्षि बिम्बानि अष्टौ द्रव्याणि। तत्परितः स्थितेषु अष्टसु कलशेषु तिलादिक्रमेण एकैकम्। तस्य नवकस्य देवता त्रिविक्रमः। शिष्टानां नारायणः।

3-8-नैऋत वारुणयोः अन्तराले कुम्भानां पञ्चविंशतौ नवकस्य मध्यमे कुम्भे श्यामाक, षाष्टिक, शालि, नीवार, तण्डुल, दूर्वा'ङ्कुर, कुशाङ्कुर, इन्द्रवल्ल्यङ्कुराऽश्वत्थाङ्कुराणि अष्टौ द्रव्याणि। तत्परितः स्थितकलशेषु अष्टसु श्यामाकाद्येकैकं क्रमर्जी । तस्य नवकस्य देवता वामनः। शुद्धोदकानां पूर्ववत्।

3-9-तत्र वारुणे कुम्भानां पञ्चविंशतौ नवकस्य मध्यमे कुम्भे कुशादिव्येषु काश उशीर, शरपुंख, तगर, अपामार्गमूलानि अष्टौ । तत्परितः स्थितकुम्भाष्टके कुशादिमूलद्रव्यं एकैकं क्रमेण । तस्य नवकस्य देवता श्रीधरः। शुद्धोकानां पूर्ववत्।

3-10-वारुणवायव्ययोः अन्तराले कुम्भानां पञ्चविंशतौ नवक मध्यमे कुम्भे तुलसि, कृष्णतुलसि, वेणु, केसरि, केतक, बिल्व, शमी, जातीपत्राण्यष्टौ । तत्परितः स्थितकलशाष्टके तुलस्याद्येकैकं क्रमेण। तस्य नवकस्य देवता हृषीकेशः। शिष्टाणां पूर्ववत्।

3-11-तत्र वायव्ये कुम्भानां पञ्चविंशतौ नवकस्य मध्यमे कुम्भे मुस्ताद्वय, वचा, कच्चोर, कुमुदोत्पल, कल्हार, शीतलीयक, कुवलय, कन्दान्यष्टौ । तत्परितः स्थितेषु अष्टसु मुस्तादिद्रव्यं एकैकं क्रमेण तस्य नवकस्य देवता पद्मनाभः। शिष्टानां पूर्ववत्।

3-12-वायुसोमयोः अन्तराले कुम्भानां पञ्चविंशतौ नवकस्य मध्यमकुम्भे मुद्ग, माष, यव, निष्पाव, तुवरी, व्रीहि, कुलुत्थाऽऽढकानि अष्टौ । तत्परितः स्थितेषु अष्टसु कुम्भेषु मुद्गादिद्रव्यं एकैकं क्रमेण। तस्य नवकस्य देवता दामोदरः। शिष्टानां पूर्ववत्।

3-13-तत्र सौम्ये कुम्भानां पञ्चविंशतौ नवकमध्यमे कुम्भे शंखपुष्पी,बला, विष्णुक्रान्ता, सदाभद्र, एकपत्राम्बुज, वरसहा, सहदेवीद्वयानि अष्टौ । तत्परितःस्थितेषु अष्टसु कुम्भेषु शङ्खपुष्पाद्येकैकं क्रमेण । तस्य नवकस्य देवता यज्ञनारायणः। शिष्टानां पूर्ववत्।

3-14-तत्र सोमेशानयोः अन्तराले कुम्भानां पञ्चविंशतौ नवकस्य मध्यमे कुम्भे श्वेतार्का, ऽग्निभद्रा,ब्रह्म सुवर्चला, सरसा, सरक्ता, पृश्निपर्णि,स्थिरैः अण्डान् अष्टौ । तत्परितः स्थितेषु अष्टसु श्वेतार्काद्येकैकं क्रमेण। तस्य नवकस्य देवता हरिः । शिष्टानां पूर्ववत्।

3-15-ऐशानैन्द्रयोः अन्तराले कुम्भानां पञ्चविंशतौ नवकमध्यमे कुम्भेसुरभि, पद्म, केसर, पत्र, एला, लवङ्ग त्वङ्, नागकेसर, लता जातीफलान्यष्टौ । तत्परितः स्थितेषु अष्टसु सुरभ्याद्येकैकं क्रमेण । तस्य नवकस्य देवता कृष्णः. शिष्टानाम् पूर्ववत् ।

3-16-ऐशान इन्द्रयोः अन्तराले कुम्भानां पञ्चविंशतौ नवकस्य मध्यमे कुम्भे सुवर्ण, रजत, ताम्राणि प्रत्येकं पञ्चनिष्कप्रमाणानि पद्माकृतीनि च, कांस्यदर्पणं चषकाणि च अयोलवित्रा द्याकाराणि त्रपुसीसक पित्तलानि च प्रतिकृतिरूपेण पृथक् पृथक् एतानि अष्टौ, तत्परितः स्थितेषु ऐन्द्रादीशानान्तेषु कलशेषु अष्टसु सुवर्णाद्येकैकं क्रमेण, तस्य नवकस्य देवता हयग्रीवः। शिष्टानां षोडशशुद्धोदकुम्भानां देवता नारायणः।

एवं द्रव्याणि विन्यस्य तत्तद्देवताश्च आवाह्य अभ्यर्चयेत् । एतस्मिन् एकोत्तरसहस्र कलश स्नपने अष्टौ चत्वारः वा आचार्याः । मूर्तिपाः षोडश । पुण्याहपूर्वकं विधिवत् एवं देवताः अभ्यर्च्य । ‘‘सर्वारिष्टशान्त्यर्थं’’ होमं करिष्ये इति संकल्प्य । पञ्चोपनिषन्मन्त्रेण सर्पिषा आहुतीनां सहस्रं मूलविद्यया, समिद्भिश्च, तथा नृसूक्तेन चरुणा षोडशाहुतीनां च हुत्वा । मानुषेस्थाने पञ्चविंशतिमध्ये मृत्पूरित नवकुम्भान् आरभ्य ब्रह्मपदैकोत्तराशीति घटेषु नवकमध्य सर्वरत्नोदकान्तं एकोत्तरसहस्रकलशैः क्रमेण वक्ष्यमाणमन्त्रैः प्रतिद्रव्य घटं उपस्नान प्लोतवस्त्र उत्तरीय अर्घ्यपाद्याचमन गन्धपुष्प धूपदीपार्चनयुतं स्नापयेत्।

मानुषे ऐन्द्रे पञ्चविंशतिमध्यमृत्पूरित कुम्भनवकस्य सशुद्धोदकस्य ‘विष्णोर्नुकं इति मन्त्रः । तत्समीपस्थित सशुद्धोदकमूलवारि कुम्भानां ‘तद्विष्णोः इति मन्त्रः । तन्मानुषाग्नेये पञ्चविंशतिकुम्भानां प्रतद्विष्णुः इति मन्त्रः । तत्समीपस्थित सशुद्धोदकमूलवारि कुम्भानां ‘तावामिति

मन्त्रः । मानुषे नैऋति पञ्चविंशतिकुम्भानां 'ध्रुवःपातु इति मन्त्रः । तत्समीप स्थितानां'भद्रंकर्णे इति मन्त्रः । मानुषवारुण पञ्चविंशति कुम्भानां 'न ते विष्णुः इति मन्त्रः।

तत्समीपस्थितानां 'इरावति इति मन्त्रः । मानुष वायव्यस्थितानां 'अतोदेवाः इति मन्त्रः । तत्समीपस्थितानां 'इदं विष्णुः इतिमन्त्रः । मानुषसौम्यस्थितानां त्रीणिपदा इति मन्त्रः। तत्स्मीपस्थितानां विष्णोः कर्माणि इति मन्त्रः।

मनुषैशानस्थितानां 'तद्विष्णोःपरमंपद इति मन्त्रः। तत्समीपस्थितानां' तद्विप्रासः इतिमन्त्रः । दिव्यैन्द्रे एकाशीतिघटास्पदे फलांबुपूरित नवकस्य मध्यमस्य 'यज्ञायज्ञिय इतिमन्त्रः । तत्समीपैन्द्राद्यैशानान्तं' इन्द्राविष्णू पदे इति, 'मनीषा इति, 'वषट्नेविष्णू इति,, 'तिस्रोवाच इति 'इषोत्वोर्जेत्वा इति' स्तरीरुत्वद्भवती, ति,'यस्मिन् विश्वानी ति'पर्जन्याय इति च मन्त्राः क्रमेण।दिव्ये याम्ये एकोत्तराशीति घटनवकमध्ये गन्धोदकस्य नारायणानुवाकस्य आदितः आरभ्य अष्टाभिः एकैकया ऋचा। ऐन्द्राद्यैशानान्तं क्रमेण । दिव्ये पश्चिमे एकाशीतिघटास्पदे मध्ये नवकमध्यमे वापी जलादि कुम्भानां-मन्त्राः 'या आपः 'सिन्धुद्वीपः 'एष ते देवं 'इमं मे वरुण 'शन्नोदेवीः.'यासां राजा 'समुद्रज्येष्ठ 'यासांदेवाः वारुणसूक्तेन ऐन्द्रादि ब्रह्म पर्यन्तम्। दिव्ये सौम्ये एकाशीतिघटास्पदे मध्ये कुम्भनवकस्य ऐन्द्रादि ब्राह्मान्तं धान्यादि वस्तुकुम्भानां नवानांमन्त्राः- त्रातारं, आत्वावहन्तु, जितं ते, आपो वहति, तावति, सत्वं नो अग्ने,त्वन्नो अग्ने, महाव्याहृतया, अणोरणीयान्, इतिक्रमेण । दिव्ये अग्निकोणे एकोनपञ्चाशत्घटास्पदे मध्यनवकस्य ऐन्द्रादिब्रह्मान्तं गोमूत्रादि घटेषु गायत्री, पयोव्रतसाम, दधिक्राविण्णो, गन्धद्वारां, विष्णोरराटमसि, मूर्धानं दिवः, हिरण्यगर्भः, आप्यायस्व, घृतस्नाता इतिमन्त्रेण । दिव्ये नैऋते एकोन पञ्चाशत्घटास्पदे मध्ये नवकस्य ऐन्द्रादिब्रह्मपर्यन्तं-रक्षोघ्नं, आद्यं साम, पवित्रं ते, भगवान् वासुदेवः, वेद(देव?)व्रतसाम,वैराजसाम,अपराजिताः इति क्रमेण।दिव्ये वायुकोणे एकोनपञ्चाशत्घटास्पदेमध्ये नवकस्य ऐन्द्रादिब्रह्मान्तं, द्वादशाक्षरः, द्रुपदादिव, अष्टाक्षरः,शन्नोदेवीः, हिरण्यपा, वेदाहं, इत्यादि चतस्रः ऋचः क्रमात्। दिव्ये ऐशाने, एकोनपञ्चाशत्घटास्पदे मध्ये नवकस्य ऐन्द्रादि ब्रह्मान्तं- आनोनुयुद्भिः, श्रीसूक्तम्, मधुमान्नः, मधुनक्तम्, मधुवाता, इति मन्त्रेण । ब्राह्मे पदे इन्द्रादीशानान्त नवकानां मध्यमद्रव्य कुम्भानां अष्टसु पुरुषसूक्तस्य द्वे द्वे ऋचौ आदितः क्रमात् । शिष्टानां चतुष्षष्टि शुद्धोदकुम्भानां मूलमन्त्रेण, मध्यस्थनवक मध्यमकुम्भस्य पुरुषसूक्तेन, शिष्ट शुद्धोदकुम्भानां मूलमन्त्रेण।तदन्ते हरिद्राचूर्ण परिपूरितैः पञ्चविंशतिभिः, सप्तदशभिः, षोडशभिः, द्वादशभिः, वा स रत्न लोह कूर्चाश्वत्थपल्लव

वस्त्रापिधानैः समाराधितश्रीदेवतैः धान्यराशिस्थैः कुम्भैः श्रीसूक्तेन अभिषिच्य । देवं अर्घ्यादिभिः आराध्य । महाहविः निवेद्य । आज्येन समिद्भिः मूलविद्यया अष्टोत्तरसहस्त्रं आहुतीनां हुत्वा । चतुर्विधान्नेन प्रत्येकं षोडशाहुतीश्च पुरुषसूक्तेन जुहुयात् । वस्त्राभरण जीवाजीव धनादिभिः देशिकानां यावत्कलशसंख्यया दक्षिणा । तदर्धं ऋत्विजां, तदर्धंपरिचाराणां अन्येषां च देया ।।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

सहस्त्रकलशस्नपन विधिः नाम द्वात्रिंशः परिच्छेदः

****

अथ त्रयस्त्रिंशः परिच्छेदः

उत्सवविधिः

अथ तावत् उत्सवविधिः उच्यते।पूर्वं गरुडप्रतिष्ठार्थमंकुरार्पण कर्मकर्तव्यं।
स्वविशेषेणविशिष्ट आचार्यो गरुडप्रतिष्ठा कर्मणः पूर्वं सप्ताहे पञ्चाहे तृतीयेह्नि वा सुमुहूर्ते विष्वक्सेनं गरुडं वा संपूज्य।तेन सह प्राचीमुदीचीं वा दिशं गत्वा। अस्यदेवदेवस्य नवदिन महोत्सवकर्मणि अंकुरार्पणकर्मांगभूतं मृत्संग्रहण कर्मकरिष्ये। इति संकल्प्य। पुण्याहं कृत्वा। यथाविधि पूर्ववन् मृदंसंगृह्य। अंकुरार्पणमण्टपं प्रविश्य। तत्र पूर्ववद्विधिनांकुरार्पणं कृत्वा। तदनु गरुडप्रतिष्ठां कुर्यात्।

अथ ध्वजारोहण विधिरुच्यते

पूर्वं ध्वजार्थं तन्तूत्थं निर्दोषं सूक्ष्मं क्षौमं कार्पासं वा दशभिर्हस्तैरायतं तदर्धेन विस्तृतं यद्वा नवभिरष्टभिस्सप्तभिर्वा मूलभेरसमायामं द्वारायामं वा आयामार्धेन विस्तीर्णं तत्पादेन कृतशेखरं शेखरं समपुच्छयुतं तदर्धकर्ण पुच्छकं तथा निर्णेजितं खलियुक्तं शोषितमेवं भूतलक्षण विशिष्टं ध्वजपटमादाय। तस्मिन्

आहृत्यमध्ये वस्त्रस्य गरुडं काञ्चनप्रभम्।
नवताल प्रमाणेन द्विभुजं धृतकञ्चुकम्.
धृतपुष्पाञ्जलिपुटं श्वेतांबरधरम् विभुम्।
दंष्ट्राकराळवदनं भृकुटीकुटिलेक्षणम्।
नीलनासाग्रसंयुक्तं कुञ्चितासव्य पादकम्।
पृष्टे निविष्टसव्याङ्घ्रिं पक्षविक्षेपशोभितम्।

गगने गमनारंभं सुवृत्तं घोरदर्शनम्।
करण्डिकामकुटिनं ललाटे रचिताळकम्।
हारकेयूरवलय नूपुराभरणोज्ज्वलम्।
अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः।
उरसि न्यस्तकार्कोटं कटिसूत्रित तक्षकम्।
बिभ्राणं दक्षिणे कर्णे पद्माह्वय सरीसृपम्.
महापद्मं तथान्यत्र शंखं शिरसि शोभितम्।
गुळिकं चांगदे सर्पं वर्णस्तेषां च कथ्यते।
स्फटिकाभश्शोणिताभः पीताभो धूम्रवर्णकः।
रक्तांबुजनिभश्चैव पिङ्गळस्तुहिन प्रभः।
भ्रमराभः क्रमाच्छत्रमुक्तादाम परिष्कृतम्।
उपरिष्टाच्च कर्तव्यं पार्श्वयोश्चामरद्वयम्।
अधस्तादंबुजं पूर्णकुम्भं मृद्भिश्च पालिकाः।
सांकुरं लिखितव्याःस्युर्दीपौ द्वौ पार्श्वयोर्द्वयोः।
पञ्चवर्णैर्लिखेद्देवं अन्तरं श्यामवर्णकम्।
अन्तराळं न कृष्णेन चित्रयेच्चित्रवित्तमः।

इति गरुडमालिख्य । अधिवासदिने तमिस्रायामाचार्यो मूर्तिपैस्सह कारुशालां प्रविश्य । पटस्थस्य देवस्य शिल्पिनानयनोन्मीलनं कारयित्वा। शिल्पिनि तस्मिन् ईप्सितै र्धनैस्तोषिते विसृष्टे सति, तदा पटं ओं इति गृहीत्वा । सुवर्णपात्रे निधाय । तन्मूर्तिपस्य शिरसि निक्षिप्य। तूर्यघोषैस्सह धामप्रदक्षिणी कृत्य । गर्भमन्दिरं नीत्वा । भगवन्तमर्घ्यादिभिरभ्यर्च्य। पुण्याहजलेनाऽस्त्रमन्त्रेण पटं संप्रोक्ष्य । अस्त्रमन्त्राभिमन्त्रित सिद्धार्थैः पुष्पैश्च सन्ताड्य । दाहानाप्यायने कृत्वा। देवं प्रणम्य।इमां गाथां उदीरयेत् ।

भगवन् पुण्डरीकाक्ष सर्वेश्वर जगन्मय।
त्वया यथा तु कथितं तथाकर्तुं न शक्यते।
अस्वातन्त्र्यादसामर्त्यात् श्रद्धादीनामभावतः।

तस्मान्मानादिसर्वेषां न्यूनाधिक्योपशान्तये।
सर्वदोषापहारिभ्यां वैनतेयं प्रसीदय।

इति भगवन्तं विज्ञाप्य । तूर्यघोषपुरस्सरं प्रादक्षिण्येन यागमण्टपं प्रविश्य। शालिपीठे पटं स्थाप्य विस्तार्य । छायाधिवास प्रतिष्ठान्तानां कर्मणां सिद्ध्यर्थं रक्षाबन्धनकर्मकरिष्ये. इति संकल्प्य । पुण्याहं वाचयित्वा प्रोक्ष्य । पटस्थस्य प्रतिसरं यथाविधि बद्धा । तस्य दक्षिणतः उपविश्य । प्राणायाम पुरस्सरं भूतशुद्धिमष्टाक्षर मन्त्रन्यासं च कृत्वा।

तदनु **अस्यश्री गरुडपञ्चाक्षर मन्त्रस्य।** काश्यपऋषिः। पङ्क्तीश्चन्दः। श्री गरुडोदेवता । क्षीं बीजं । स्वाहा शक्तिः । श्रीगरुडो देवता । श्री गरुड प्रसादसिद्ध्यर्थे विनियोगः । ओं क्षीं अङ्गुष्टाभ्यां नमः । ओं पं तर्जनीभ्यां स्वाहा । ओं ओं मध्यमाभ्यां वषट् । ओं स्वां अनामिकाभ्यां हुं । ओं हां कनिष्टिकाभ्यां फट् । ओं क्षिप ओं स्वाहा नखमुखैर्वौष्ट् ।

ओं ज्वल ज्वल महामते स्वाहा ओं क्षां हृदयाय नमः।

ओं गरुड चूडानने स्वाहा ओं क्षीं शिरसे स्वाहा । ओं गरुड प्रभञ्जय प्रभञ्जय प्रभेदय प्रभेदय वित्रासय वित्रासय विमर्दय विमर्दयस्वाहा ओं क्षैं कवचाय हुं । उग्ररूपधर सर्व सर्प भयंकर सर्वविषं दारय दारय भीषय भीषय दह दह भस्मीकुरु स्वाहा,ओं क्षौं नेत्राभ्यां वौषट्। ओं अप्रतिहत शासनाय ओं नमः सुदर्शनाय हुंफट्वाहा ओं क्षः अस्त्राय फट्'

ध्यानम्।

आजानुत सुवर्णाभं आनाभेः तुहिनप्रभम्।
कुङ्कुमारुणमाकण्ठात् आकेशान्तात् सितेतरम्।
स्वस्तिकं दक्षिणं पादं वामपादं तु कुञ्चितम्।
दीर्घबाहुं बृहत्स्कन्धं नागाभरणभूषितम्।
नीलाग्रनासिकात्मानं माहपक्षं स्मरेत्बुधः।
दंष्ट्राकराळवदनं किरीटमकुटोज्ज्वलम्।
सर्वाभरण संयुक्तं सर्वावयवसुन्दरम्।
अनन्तो वामकटकः यज्ञसूत्रं तु वासुकिः।
तक्षकः कटिसूत्रं तु हारः कार्कोटकः तथा।

पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः।
शंखः शिरःप्रदेशे तु गुळिकस्तु भुजान्तरे।
एवं ध्यायेत् त्रिसन्ध्यायां आत्मानं गरुडाकृतिम्।
विषं नाशयते क्षिप्रं अग्निक्षिप्तमिवांभसि।
ओं नमः पक्षिराजाय वेदपक्षयुगप्रभो।
वैनतेय नमस्तेस्तु श्री गरुडाय नमो नमः।

एवमात्मानं गरुडं ध्यात्वा । हृत्पुण्डरीकाव्यक्तपद्मे गरुडं ध्यात्वा । मानसैः उपचारैः अभ्यर्च्य । तदनु तस्य पुरतः छायाधिवास सिद्ध्यर्थं धान्यराशौ स्वर्णादिलोहजं मृण्मयीं वा जलद्रोणीं तादृशं कटाहं वा संस्थाप्य। गन्धतोयेन संपूर्य । पुण्याहं वाचयित्वाप्रोक्ष्य। शोषणदहनप्लावनानि कृत्वा । तोरणध्वज कुम्भपूजनं च विधाय । पटस्तं कूर्चे समावाह्य । तस्मिन् संहारक्रमेण प्राक्छिरसं शाययित्वा । सुदर्शनमन्त्रेण चक्रमुद्रां प्रदर्श्य । तत्रैव यमस्य दिशि धान्यराशौ रक्षाकुम्भं सकरकं विन्यस्य । तस्मिन् ब्रह्माणं करके सुदर्शन मन्त्रेण चक्रमुद्रां प्रदर्श्य । एवं यामं यामार्धं वा अधिवास्य । सद्यो वा। तदनु कूर्चं जालादुद्धृत्य । पटे समावाह्य। नयनोन्मीलनार्थं सुवर्णरजत पात्रे आढकपूरणयोग्ये तादृशौ शलाकिके च समादाय । पुरतः धान्यपीठे पूर्वे सौवर्णं पश्चिमे राजतं च पात्रं सशलाकं निधाय । तत्परितः पात्रेषु नीवार,शालि,मुद्ग,श्यामाक, प्रियङ्गु, यव, तिल, गोधूमानि अष्टधान्यानि पृथक् पृथक् निधाय । आद्यं मधुना द्वितीयमाज्येन च पात्रं आपूर्य । 'नयनोन्मीलनकर्मकरिष्ये" इति संकल्प्य । पुण्याहं वाचयित्वा । तानि प्रोक्ष्य, परिस्तीर्य । मधुनि सूर्यं, आज्ये चन्द्रमसं च आवाह्य अभ्यर्च्य । सवेद वाद्यघोषं मध्वक्तमुखया सुवर्णशलाकया 'चित्रंदेवानां" इति दक्षिणं घृताक्तया राजत शलाकया'तच्चक्षुः" इति वामलोचनं च उन्मील्य । आच्छादनपटं व्यपोह्य । मधुसर्पिषी च अष्टधान्यानि दर्शयित्वा । अष्टनागानां अपि एवं कृत्वा।' छायास्नपन कर्मकरिष्ये" इति संकल्प्य। पुरतः धान्यपीठे सलक्षणान् षोडशकुम्भान् संस्थाप्य। पूर्वोक्तविधिना, तत्तद् द्रव्यैः आपूर्य। परिस्तीर्य । देवतावाहनं पुण्याहवाचनपूर्वकं कृत्वा । सकूर्चे दर्पणे पटस्थं गरुडं समावाह्य । अर्घ्यादिपूजनपुरस्सरं पुरुषसूक्तस्य षोडश **ऋग्भिः** घृतान्तैः षोडशकुम्भैः संस्नाप्य । गरुडगायत्र्या संपूज्य। पटेपुनः आवाह्य. शालिभारद्वितयेन
तदर्धेन तण्डुलेन तण्डुलार्धेनतिलेन धान्यपीठं कृत्वा । नवैः वासोभिः आच्छाद्य । दर्भान् आस्तीर्य । नववस्त्र व्याघ्रचर्म तूलिकारत्नकम्बल क्षौम चित्रवस्त्राणि च गन्धद्रव्यैः अधिवास्य। दर्भैः परिस्तीर्य ।

पुण्याहजलेन प्रोक्ष्य । तस्यां श्य्यायां शाययित्वा । द्वारतोरणपूजां कृत्वा । ततः शाययित्वा । पटस्यदक्षिणे पार्श्वे धान्यराशौ सकरकं महाकुम्भं उपकुम्भाष्टकं च सलक्षणं संस्थाप्य । गन्धोदकेन आपूर्य । सकूर्चं वस्त्र रत्न तत्तद्देवताङ्ग प्रतिमाऽश्वत्थ पल्लवापिधानान् तान् सर्वान् कृत्वा । परिस्तीर्य । प्रोक्ष्य।महाकुम्भे आधारादि पद्मान्तं इष्ट्वा।तस्मिन्

एहि खेश महाबाहो वैनतेय वयोधिप।
सान्निध्यं कुरु पक्षीन्द्र प्रसीदात्र नमोस्तु ते।

क्षिप ओं स्वाहा आगच्छागच्छेति गरुडं आवाह्य । तद्गायत्र्या अभ्यर्च्य। करके सहस्त्रारहुंफट् आगच्छागच्छेति आवाह्य । अभ्यर्च्य । पूर्वादिषु कलशेषु इन्द्रादीन् च। पटस्थगरुडं शोषणादिभिः संशोध्य । तत्वानि क्रमात् संहृत्य । पुनः उत्पाद्य। कुण्डेषु चतुर्षु स्थण्डिलेषु वा यद्वा एकस्मिन् कुण्डे महानसे नित्याग्निकुण्डे वा अधिवासहोमं कुर्यात्। कुण्ड चतुष्टयेषु प्राच्यां कुण्डे सत्यं आवाह्य । 'बृहत्साम मन्त्रेण" दक्षिणस्यांदिशि कुण्डे सुपर्णं आवाह्य।गारुड मन्त्रेण च । प्रतीच्यांकुण्डे गरुडं आवाह्य। 'रथन्तरसाम्ना"। उदीच्यां कुण्डे तार्क्ष्यमावाह्य ।'गरुडमन्त्रेण च ।

यद्वा सर्वेषु कुण्डेषु तत्तद्देवतामन्त्रैः वा समिद्भिः आज्यैश्च चरुणा पुरुषसूक्तेन च एकस्मिन् कुण्डे तु 'ओं नमो भगवते वैनतेयाय नमः" इति आवाह्य । गरुडमन्त्रेण च हुत्वा ।पूर्वादिषु चतुर्षु कुण्डेषु ओं भूः स्वाहा,ओं भुवः स्वाहा,ओं सुवः स्वाहा,ओं भूर्भुवस्सुवस् स्वाहा इति मन्त्रैः क्रमेण मधु पयो दध्याज्यैः प्रत्येकं शतसंख्यया आहुतीः हुत्वा। अन्यस्मिन् पात्रे संपातं पृथक् पृथक् संगृह्य। पटस्थस्य पाद जठर मूर्धसु हुतमन्त्रैरेव स्वाहारहितैः क्रमेण कूर्चेन सर्वांगं च संस्पृश्य। औत्तरेकुण्डे विष्णुगायत्र्या गुडाज्यमधुभिः हुत्वा। संपातेन मुखं च संस्पृश्य। होमं निर्वर्त्य। पालाशखादिराश्वत्थ बिल्वशाखाभिः चतसृभिः क्रमात् अब्लिङ्गैः मन्त्रैः महादिक् कलशांबुभिःकोणस्थ कलाशांबुभिर्वा एतस्याः शाखया विष्णुगायत्र्या च पटस्थं प्रोक्ष्य। मन्दिराभिमुखं पटं विस्तार्य। तस्मिन् योगपीठं संकल्प्य। गन्धादिभिः अभ्यर्च्य। स्वाञ्जलौ योगपीठं विचिन्त्य। तस्मिन् हृत्पुण्डरीकस्थगरुडं रेचकेन अवतार्य। ध्यात्वा। तस्य गायत्र्या पटस्थस्य ब्रह्मरन्द्रेण प्रविष्टं विचिन्त्य। ब्रह्मरन्द्रं प्रणवेन पिधाय। मुद्रया सन्निरुध्य। ध्यात्वा। सन्निधिं प्रार्थयेत्।

महाबलमहाबाहो वैनतेय वयोधिप।
सन्निधत्स्व पटे तुभ्यं नमः प्रणवमूर्तये।

कर्मणां सिद्धिमाहूतः कुरुष्व विहगेश्वर।
आहूतव्याः त्रयोलोकाः देवस्योत्सवसंपदि।

इति गरुडं प्रार्थ्य । अर्घ्यादिभिः उपचारैः तद्गायत्र्या उपचर्य। चतुर्विधं अन्नं निवेद्य। महाकुम्भाय च तथा कृत्वा। तदनु

ओं वाहनाय महाविष्णोः तार्क्ष्ययामित तेजसे।
गरुडाय नमस्तुभ्यं सर्वसर्पेन्द्रमृत्यवे।
नमो नमस्ते पक्षीन्द्र स्वाध्यायवपुषे नमः।
विहगेन्द्र नमस्तेस्तु समुत्पाटितकल्पक।
आहृतामृतकुम्भाय जननेदास्यमोचिने।
सुरासुरेन्द्रजयिने नागेन्द्राभरणाय ते।
यदाधारमिदं सर्वं तदाधाराय ते नमः।
पक्षौ यस्य बृहत्सामरथन्तरमपि द्वयम्।
अक्षिणी चापि गायत्री त्रिवृत्सामशिरः स्मृतम्।
स्तोम आत्मा नमस्तस्मै वामदेव्यांगसंपदे।
नमः प्राणादि वायूनां ईशानाय गरुत्मते।
दोषान् अपनय अखण्डान् गुणान् आवहसर्वतः।
विघ्नानि जहि सर्वाणि आत्मसात् कुरु मामपि।

एवं स्तुत्वा। गारुडमन्त्रं यथाशक्ति जपित्वा। वेदघोषैः तूर्यघोषैः निशां जागरेण नीत्वा। ततः प्रभाते गुरुः नित्यकर्म समाप्य। गर्भगेहं प्रविश्य। मूलबेरं अर्घ्यादिभिः अभ्यर्च्य। तस्मात् उत्सवबिंबे समावाह्य। उद्वासनरहितैः षोडशोपचारैः आराध्य। तं पटस्थं गरुडं च माल्यादिभिः अलङ्कृत्य।हस्तिपृष्ठे रथे, शिबिकादौ वा यात्राबिम्बं च पृथक् याने च समारोप्य।भेरी मृदङ्ग पटह शंख काहल नृत्त गेयसहितं शिरोभिः साङ्कुर पालिकाशतधारकैः ब्राह्मणैः च ग्रामधान्नोः प्रादक्षिण्येन ध्वजस्तम्भसमीपं नीत्वा।

ध्वजस्तंभस्तु अन्तस्सारः बहिस्सारः निस्सारश्चेति दारुः त्रिविधः।चम्पक, देवदारु, चन्दन, खदिर, साल, बिल्व, ककुभ, आमलकादयःअन्तस्सारः। क्रमुक नालिकेर ताल, हिन्ताल, वेण्वादयः

बहिस्साराः। निस्सारं वर्जयित्वा। अन्तस्सारं बहिस्सारं वा मानेन शततलायतं शुभं। अशीतितालमानं वा प्रासाद उच्छ्रायमानं,यद्वा गोपुरमानं वा स्तम्भं समानीय। चतुर्धा विभज्य। अग्रैकांशेनमस्करं तदाधार भूतानि द्वितालायतानि तदर्धेन विस्तीर्णानि, तदर्धेनघनानि, पीठत्रितयात् मूले स्थूलानि, अग्रे सूक्ष्माणि मूलतच्छिद्रितानि कृत्वा। स्तम्भाग्रे तानि विनिवेश्य। अग्रपीठद्वये छिद्रिते तत्र ध्वजयष्टिमस्करं एवं स्तम्भे विनिवेश्य।

ध्वजयष्ट्यां एकं वेणुकं वा नव सप्त पञ्चवेणुकान् वा निवेश्य। इत्थं भूतं ध्वजस्तम्भं पीठस्य उत्तरेपार्श्वे विनिवेश्य। आचार्यः वेदविद्विप्रैः सह 'अब्लिङ्गमन्त्रैः प्रक्षाल्य।कुशैः दर्भै ऊर्ध्वमुखैः प्रच्छाद्य। दर्भमालाभिः संवेष्ट्य। शोधिते स्तंभावटे लोहबीजादीनि विन्यस्य। तत्र आवटे ध्वजस्तंभं 'विष्णुसूक्तेन" धृढं यथा भवेत्। तथा प्रासादाभिमुखं स्थापयित्वा। स्तंभमूलस्थले सप्तभिः पञ्चभिः त्रिभिः वा हस्तैः आयतां तावद्विस्तीर्णां एकहस्तसमुच्छ्रितां चतुरश्रां वेदिकां कारयित्वा। तां त्रेधा विभज्य। एकांशे मध्ये चतुष्टय अङ्गुलोत्सेध मेखलात्रययुतं पीठं,तस्यापि तृतीयेभागे कर्णिकामध्ये यथारम्भविनिवेशनं भवेत् तथा पद्मं कृत्वा। पीठस्य परितः षोडशस्तम्भयुतां तिरस्करिणीं चित्रदर्भमाला दीपपुष्पमालावितानाद्यलङ्कृतां चतुर्द्वारयुतां प्रपां कारयित्वा। पुण्याहं वाचयित्वा।प्रोक्ष्य। स्तम्भदक्षिणे धान्यपीठं कृत्वा। तस्मिन् सलक्षणं कुम्भनवकं विन्यस्य।मध्ये गरुडं परितः अष्टदिक्षु इन्द्रादीन् आवाह्य अभ्यर्च्य। तत्तन्मन्त्रेण स्तम्भं यथाक्रमं प्रोक्ष्य। तद्वेण्वग्र विवरे तन्तुभिः त्रिगुणीकृतेन अङ्गुष्टानाहेन पाशेन ध्वजपटं पुरुषमन्त्रेण संयोज्य। वक्ष्यमाणेन विधिना ध्वजं आरोपयेत्। यद्वा बद्धध्वजाग्रं स्तम्भं वा स्थापयेत्।

तदनु गुरुः शोभने मुहूर्ते पटस्थं गरुडं प्रासादाभिमुखं संस्थाप्य। सर्वतः दिक्षु वेदतूर्यघोषेषु प्रवर्तितेषु स्वयं गरुडमालामन्त्रादि जपन् गरुडं अर्घ्यादिभिः अभ्यर्च्य। महाकुम्भजलेन तद्गायत्र्या कूर्चेन संप्रोक्ष्य। गारुडमन्त्रेण कुम्भान् पटस्थं अनुचिन्त्य। प्राणप्रतिष्ठां यथाविधि कृत्वा। तन्मूलमन्त्रं विन्यस्य। तद्गायत्र्या तन्मुद्रां प्रदर्श्य। अर्घ्यादिभिः अभ्यर्च्य। अष्टासु दिक्षु इन्द्रादीन् च आवाह्य। गन्धपुष्पादिभिः अभ्यर्च्य। पृथुक, नालिकेर, अपूप, मुद्गान्नादीनि पटस्थस्य निवेद्य। वेदघोषैः सह'सुपर्णोसि इति मन्त्रेण ध्वजं आरोप्य। यावदवभृतं ध्वजोदरे गरुडस्य स्थितिं वक्ष्यमाण गाथया प्रार्थयेत्।

पक्षीन्द्रपक्षविक्षेप तरङ्गानिलसंपदा।
निरस्तासुरसन्नाह समरे शत्रुसूदने।

सन्निधत्स्वपटे यावत् उत्सवावभृतक्षणम्।

इति प्रार्थ्य। उत्सवप्रतिमां ध्वजस्तम्भसमीपं आनीय। खगं दर्शयित्वा।समस्तदेवताह्वानार्थं गरुडं नियुज्य। उत्सवबिम्बसन्निधौ एव पुष्पाञ्जलिं समादाय।

अस्मद्दिनात्समारभ्य यावत्तीर्थ दिनान्तिमम्।
सन्निधिं कुरु पक्षीन्द्र राज्ञोजनपदस्य च।
ग्रामस्य यजमानस्य वैष्णवानां विशेषतः।
तुष्टये पुष्टये चैव सर्वशत्रु क्षयाय च।
अपमृत्यु जयार्थाय वैनतेय प्रसीद ओं।

इति गाथां उदीरयन्। गरुडोपरि पुष्पाञ्जलिं वितीर्य। तदनु भगवन्तं विज्ञापयेत्।

ज्ञानतोऽज्ञानतोवापि यथोक्तं न कृतं मया।
तत्सर्वं पूर्णमेवास्तु सुतृप्तोभव सर्वदा।
ओमच्युत जगन्नाथ मन्त्रमूर्ते जनार्दन।
रक्ष मां पुण्डरीकाक्ष क्षमस्वाज प्रसीद ओं।

इति विज्ञाप्य। भगवन्तं मण्डपान्तरं नीत्वा। यथाविधि संपूजयेत्। ध्वजसमीपे नक्तदिवं अनिर्वाणं दीपं आरोप्य। ध्वजारोहणाऽवरोहणान्तं प्रतिदिनं गरुडं सम्पूजयेत्।

अथ भेरीताडनम्।

अथ भेरीताडन विधिः उच्यते।आचार्यः तद्रात्रौ देवं प्राणायामान्तर्याग पुरस्सरं पूजयित्वा।निवेद्य।होमं च कृत्वा। ध्वजपीठस्य पुरतः क्षितिं गोमयवारिणा चतुरश्रां आलिप्य। सुधाचूर्णैः अलङ्कृत्य। द्रोणपञ्चक शालिना धान्येन पीठं चतुरश्रं विधाय। तत्र कालचक्रं लिखित्वा। तन्मध्ये मूलबेरात् आवाहितशक्तिं बलिबिम्बं ध्वजसंमुखं निवेश्य पूजयित्वा। तस्य पुरतः आलिप्ते भूतले धान्यपीठके नववाससा वेष्टितं महाभेरीं संस्थाप्य। तस्याः दक्षिणे कोणं च निधाय। भेर्याः पूर्वभागे शङ्खनिकरं,वह्नौ काहळसञ्चयं,याम्ये मद्धळ,नैऋते मुखतन्त्री वंशानि, वारुणे उडुक मृदङ्ग ह्रस्वसंमर्दनि, वायव्ये करटीं कांस्यतालं च, सौम्ये पटह ह्रस्वपटहौ, ऐशान्यां डुडुकान्, वल्ली,हस्तघण्टान् च,एतेषां अलाभे संभवानुगुणं संस्थाप्य। तेषां बाह्ये दक्षिणे गणिकाजनं, गायकान् च अग्रतः नर्तकान् उत्तरे वन्दीवृन्दकान् स्वेस्वे स्थाने च अन्यान् वाद्यवादकान् संस्थाप्य। भेर्याः

पश्चिमे देशे सलक्षणं कुम्भं धान्यराशौ संस्थाप्य। पुण्याहं वाचयित्वा।भेर्यादिवाद्यानि स्नातं शुचिं अलङ्कृतं दर्भपाणिं सोपवीतोत्तरीयं पारशवं च प्रोक्ष्य। भेरीमध्ये ओं त्रिगुणात्मिकायै प्रकृत्यै नमः। दक्षिणे ओं विष्णवे नमः।ओं श्रीं श्रियै नमः,मध्ये ओं ब्रह्मणे नमः,दक्षिणे ओं विष्णवे नमः,वामे ओं रुद्राय नमः,

दक्षिणमुखे ओं सूर्याय नमः। वाममुखे ओं चन्द्रमसे नमः। चर्मसूत्रे ओं वासुकये नमः।**दक्षिणपार्श्वे नवरन्ध्रेषु** ओं वागीश्वर्यै नमः, ओं क्रियायै नमः,ओं कीर्त्यै नमः,ओं लक्ष्म्यै नमः,ओं सृष्ट्यै नमः,ओं विद्यायै नमः,ओं कान्त्यै नमः,ओं दुर्गायै नमः,ओं गणपतये नमः, इति वामपार्श्व रन्द्रेषु,ओं अत्रये नमः, ओं भृगवे नमः,ओं वसिष्टाय नमः,ओं भार्गवाय नमः, ओं नारदाय नमः,ओं गौतमाय नमः,ओं भरद्वाजाय नमः,ओं विश्वामित्राय नमः, ओं मरीचये नमः, इति अष्टसु दिक्षु ओं रंभायैनमः,ओं मेनकायै नमः,ओं ऊर्वश्यै नमः,ओं तिलोत्तमायै नमः, ओं सुमुख्यै नमः,ओं सुन्दर्यै नमः,ओं रमण्यै नमः,ओं यामवर्धिन्यै नमः,इति।कोणाधि दैवताय ओं वायवे नमः, शंखाधि दैवताय ओं विष्णवे नमः, काहलाधि दैवतायै ओं वागीश्वर्यै नमः,मद्धलाधि दैवतेभ्यः त्रिमूर्तिभ्यः नमः,ओं मुखाधि दैवताय ब्रह्मणे नमः,ओं मृदङ्गाधि दैवताय रुद्राय नमः,ओं झल्लर्याधि दैवताय विष्णवे नमः,ओं पटहाधि दैवतायै श्रियै नमः, ओं डमरुकाधि दैवताय ईशानाय नमः। ओं उडुक्काधि दैवताय षण्मुखाय नमः।ओं करट्याधि दैवताय धर्मराजाय नमः।ओं तिमिलाधि दैवताय वायवे नमः।ओं डक्कर्याधि दैवताय चन्द्रशेखराय नमः।ओं तालाधि दैवताय ब्रह्मणे नमः।ओं वामहस्त खण्डाधि दैवताय श्रियै नमः।ओं दक्षिणहस्त खण्डाधि दैवताय पार्वत्यैनमः।इति गन्धादिभिः अभ्यर्च्य। कुम्भे 'यज्ञाश्च इति आवाह्य। अभ्यर्च्य। पूर्वादिदिक्षु इन्द्रादीन् आवाह्य अभ्यर्च्य, निवेद्य। शोभने मुहूर्ते ओं नं नमः पराय शब्द तन्मात्रात्मने नमः, इति मन्त्रेण यज्ञाश्च इति उक्त्वा। कोणेन भेर्याः ताडनं कुर्यात्। तदनु तां भेरीं पारशवः गृहीत्वा। वहन् गुरुणा इन्द्रादौ मरुद्गणे ह्यमाने घोषयेत्।

दिव्यायुधानां आह्वानां तथा वैकुण्ठ वासिनाम्।
विष्णुपारिषदाः सर्वे विष्वक्सेनाभि रक्षिताः।
आहूतव्याः मखे तस्मिन् कुमुदाद्याः सनायकाः।
ऋषिभिश्च मरीच्याद्यैः ब्रह्मलोकनिवासिभिः।
समाह्वानां विरिञ्चस्य रुद्रलोकनिवासिभिः।
सार्धं प्रथमसंघैश्च रुद्रश्च वृषवाहनः।

आहूतव्याः तथा चान्ये तत्तल्लोकनिवासिनः।
वाहनैः परिवारैः च साकं तस्मिन् महोत्सवे।
विद्याश्च मूर्तिधारिण्यः त्रयीचाङ्गैश्च पुष्टिदा।
आहूतव्याः समाह्वानं सर्वेषां च स्वनामभिः।

इति सर्वेदेवानां आह्वानं कृत्वा। ततः दिग्देवता बल्यर्थं परितः आवरणेषु नित्योत्सवार्चां परितः वीथिकासु सुदर्शनं अन्नमूर्तिं वा प्रतिदिशं भेरीताडनपूर्वकं ग्रामं गमयित्वा। प्रदक्षिणी कृत्य। ग्राममध्यं समासाद्य। तत्र ब्रह्माणं आवाह्य। अर्चयित्वा। प्रतिदिशं इन्द्रादीन् च बल्यर्थं आवाह्य। अभ्यर्च्य। सन्निधिं प्रार्थ्य । तेषां स्वस्वतालादि सहितं एवं कृत्वा। अन्यत्र अन्तरालेषु गारुडं तालं घोषयित्वा। मन्दिरं प्रविश्य। यथापुरं निवेशयेत्। यद्वा उत्सवबिम्बेन वा केवलं सुदर्शनं अन्नमूर्तिना वा, यद्वा केवलं भेरीं वा आदाय। रथ्यासु तत्र तत्र यथाविधि देवताह्वानं कुर्यात्।

देवताह्वान वेलायां भेरीं श्रुण्वन्ति ये जनाः।
तैः नदीतरणं नैव यानं वा योजनात्परम्।
अनाधृत्योत्सवं मोहात् दूरं यायात् जनो यदि।
स याति निरयं स्थानं प्रेत्यदुःखमिहापि च।
तस्मादवभृथं यावत् वसेत्तत्रैव नो व्रजेत्।
ध्वजार्थं अङ्कुराः येन न्यस्ताः स यदि कारणात्।
कुतश्चिदसमर्थो वा मृते वा देशिकोत्तमः।
शेषं समापयेत् अन्यः पुत्रो वा तदनुज्ञया।
शिष्यो वा यदि वा भ्राता ऋत्विग्वा गुणवत्तरः

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

ध्वजारोहण विधिः नाम त्रयत्रिंशः परिच्छेदः

****

चतुत्रिंशः परिच्छेदः

अथ उत्सव विधिः उच्यते

उत्सवारंभ दिवसात् अर्वाक् सप्तमे पञ्चमे अहनि वा गुरुः

व्रतेषु स्नपने सर्वप्रायश्चित्तेषु कर्मसु।
वेदव्रतेषु चतुर्षु प्रारंभे यागकर्मणाम्।
वसुधासंग्रहे काले शिलासंग्रहकर्मणि।
शङ्कुस्थापन काले च ध्वजारोहण कर्मणि।
विविधासु प्रतिष्ठासु बाह्याभ्यन्तर कर्मसु।
आचार्यत्वे कृते कर्ता वपनं स्नानमाचरेत्।
वपनेन विनाकर्म यदि तन्निष्फलं भवेत्।

इति वचनात् पूर्वं तथा कृत्वा।तदनुशुभे मुहूर्ते पालिकादिपात्रवर्गत्रयाष्टोत्तरशते त्रिवर्गपात्र षट्त्रिंशतौ वा विधिवत् उत्सवाङ्कुरार्पणं अधिवासानन्तरं कारयेत्।

गेहमण्डपप्रासाद गोपुरवीथिकाः तोरण ध्वज वितान कदलीक्रमुक पूर्णकुम्भ साङ्कुरपालिका शतदीपागरुधूपादिभिः अलङ्कारैः अलङ्कृत्य। प्रथमावरणे द्वितीयावरणे दिशां अन्तरालेषु सर्वासु दिक्षु अवकाशानुगुणं सप्तहस्तायतं पञ्चहस्तायतं वा विस्तारायामसदृशं चतुर्द्वार समन्वितं यागमण्डपं कल्पयित्वा। तस्यपरितः प्रपां कल्पयित्वा। त्र्यंशे तस्य मध्ये हस्त समुच्छ्रितां द्विहस्तेन त्रिहस्तेन वा विस्तीर्णां वेदिं कारयित्वा। तस्याः प्राच्यां आहवनीयस्य अग्नेः चतुरश्रं कुण्डं, दक्षिणस्यां दक्षिणाग्नेः चाप समाकृतिं, प्रतीच्यां गार्हपत्यस्य वृत्तं, कौबेर्यां दिशि सभ्यस्य त्रिकोणं, आवसक्थ्यस्य चतुरश्रं, कुण्डं- यद्वाऽऽवसक्थ्यरहितं यद्वा एकमाहवनीयं वा कुण्डं कल्पयित्वा। पूर्ववत् तोरण स्रुक्स्रुव अष्टमङ्गल विविध होमपात्रासनादीनि अन्यानि यागोपकरणानि कारयित्वा। यागमण्डपं वितानदर्भमाला तोरण पुष्पमाला दूपदीपाक्षत रंभास्तम्भादि परिष्कारैः भूषयित्वा। पूर्वं चतुर्णां आचार्याणां वरणं, ततः षोडशानां ऋत्विजां,तदनुपरिचारकाणां च कृत्वा।यजमानः तान् कटक कर्णिकाङ्गुलीयक क्षौम वस्त्रोत्तरीय उष्णीष गन्धानुलेपनादिभिः अलङ्कारैः भूषयेत्।उत्सवारम्भे तदन्ते च तयोदितं स्नपनं कुर्यात्।उत्सवदिनात्पूर्वेद्युः गुरुः उत्सवाधिवासार्थं मूर्तिपैः सह गर्भमन्दिरं प्रविश्य। मूलबेरं अर्घ्यादिभिः अभ्यर्च्य। मूलात् उत्सवबिम्बे समावाह्य। अभ्यर्च्य। अधिवासार्थं 'रक्षाबन्धनकर्मकरिष्ये"इति संकल्प्य। पुण्याहपूर्वकं देवस्य देव्याश्च यथाविधि रक्षाबन्धनं कृत्वा। अर्घ्यादिभिःअभ्यर्च्य। महापूपादि निवेद्य। अन्यत्रस्थाने त्रिभिः भागवतैः विनिवेश्य।यथाविधि स्नपनकर्म कृत्वा। क्षौमवसनादिभिः अलङ्कृत्य। परमान्नं निवेद्य। प्रतिष्ठायामिव यथाविधिशय्यां

कल्पयित्वा। तस्यां देवीभ्यां सह देवं शाययित्वा। कोणेषु दीपान् साङ्कुरपालिकाश्च स्थापयित्वा। अग्निं संस्कृत्य। समिदाज्य चरुभिः मूलेन पुरुषसूक्तेनच यथाविधि अधिवासहोमं कृत्वा। तूर्यघोषैः वेदघोषैः सह देवं स्तोत्रैः स्तुत्वा। गुरुः समाहितचित्तः सन् जागरेण निशां नीत्वा। ततः प्रभाते सुमुहूर्ते गुरुः 'उत्तिष्ठ" इति मन्त्रेण देवं उत्थाप्य। संपूज्य। इमां गाथां विज्ञापयेत्।

प्रसीददेवदेवेश उत्सवः क्रियते मया।
अस्मात्कालालवाद्यावत् पुष्पयागदिनातिमम्।
त्वत्प्रीतये जगन्नाथ यद्यत्कर्म करोम्यहम्।
तत्सर्वमात्मसात्कृत्वा कृपया मे प्रसीद ओं।

इति विज्ञाप्य। दिक्षुब्राह्मणेषु शाकुनसूक्तं पठत्सु देवं'' इदं विष्णुः" इति मन्त्रेण शिबिकादिकं यानं आरोप्य। यानं वहत्सु भूसुरेषुगरुडं आवाह्य। सर्वालङ्कार सर्वोपचार सहितं देवं सर्वावरणभूमिकाः प्रदक्षिणं नीत्वा। यानात् अवरोप्य। मण्डपे सौवर्णं भद्रासने विनिवेश्य। सर्वमुत्सवार्थं आहृतं प्राभृतद्रव्यं जनसंसदि ''इतोयातं इदं सर्वं इतोयातं "इति दर्शयित्वा।मन्त्रासनपुरस्सरं पूर्वोदितक्रमात् स्नपनकर्मकृत्वा। आचार्यः यजमानश्च विभवोदयं समीक्ष्य। महाहविः निवेद्य।यथाविधि हुत्वा. देवं मन्दिरान्तर्भुवं नीत्वा। ततः अपराह्णेप्राप्ते गरुडेन विष्वक्सेनेन वा साकं बहिः निर्गत्य। यथाविधि पूर्ववत् मृत्संग्रहणं कृत्वा। यागमण्डपं प्रविश्य। त्रिवर्गेषुपालिकादिपात्रेषु उत्सवाङ्कुरार्पणं कृत्वा। सुदर्शन, स्नपन, नित्योत्सव, बलिबिम्बानां कल्याणकौतुकस्य इव कौतुकबन्धनाधिवास स्नपन कर्मणि पृथक् कृत्वा। यागमण्डपं प्रवेश्य. तत्रासने विनिवेश्य। ततः गुरुःयजमानेन सदनं प्रविश्य। देवं दण्डवत् प्रणम्य।

भगवन् पुण्डरीकाक्ष करिष्ये कौतुकक्रियाम्।
महोत्सवार्थं देवेश तदर्थं त्वं प्रसीद मे।

इति विज्ञाप्य। मूलोत्सव स्नान बलिबिम्ब चक्राणां यथाविधि उत्सवप्रतिसरं बध्वा। तदनु वेदिकायां शालीनां पञ्चभारेण तदर्धेन तिलेन च धान्यपीठं कृत्वा। अन्तरान्तरयोगेन वस्त्रैः आच्छाद्य।तत्र प्रक्षालितान् ससूत्रान् सगन्धोदकान् न्यस्त नवरत्नान् सौगन्धिक रजोयुतान् सकरकान् प्रत्येकं न्यस्तनिष्कमात्रसुवर्णान् साश्वत्थपल्लव कूर्चापिधानान् नवकुम्भान्, मध्यमं वस्त्रयुग्मेन शिष्टान् एकेन वाससा सप्तभिः षड्भिः पञ्चभिः वा हस्तैःआयतेन तदर्धेन विस्तृतेन आच्छाद्य। वेदिकाभूमौ

धान्यराशिषु संस्थाप्य। वैष्णवैः सह पुण्याहं वाचयित्वा। प्रोक्ष्य। द्वारतोरण ध्वजकुम्भान् अभ्यर्च्य. करके सुदर्शनम् च पूर्वाद्याशागतेषु कुम्भेषु वासुदेवादीन् आग्नेयादिकोणगतेषु पूर्ववत् पुरुषादीन् च आवाह्य। अभ्यर्च्य। सुदर्शन बलिबिम्बयोश्च अष्टमङ्गलानि पृथक् वासोभिः आवेष्ट्य। वेदेः अधस्तात् धान्यराशिषु विन्यस्य अभ्यर्च्य। वेदिकायां यथाविधि पूर्वोक्तवर्त्मना चक्राब्जं वर्तयित्वा। तस्मिन् सांगं सपरिवारं वासुदेवं यथाविधि पूर्ववत् अभ्यर्च्य। संपूज्य। चतसृषुदिक्षु वेदघोषे च प्रवृत्ते गुरुः आहवनीयाग्नौ वासुदेवं दक्षिणाग्नौ संकर्षणं, गार्हपत्ये प्रद्युम्नं,सभ्याग्नौ अनिरुद्धं, आवसक्थ्ये मूलमूर्तिं च तत्तत्कुण्डाग्नि मध्यगत भद्रासनपद्मेषु आवाह्य।अभ्यर्च्य। तीर्थावसानिकं सन्निधिं प्रार्थ्य। कुण्डेषु घृत प्रसून धूपद्रव्य समित्पयोदधि तिलव्रीहि यवैः तत्तद्देवतामन्त्रेण पृथक् अष्टोत्तरशतं आहुतीनां अष्टाविंशतिं वा हुत्वा। आहवनीयाद्यनुक्रमेण पायस,कृसर,गुड , हरिद्रान्न,मुद्गान्नैः पुरुषसूक्तस्य षोडश ऋग्भिः प्रत्येकं हुत्वा। पञ्चमाग्नौ ब्रह्मादिदेवान् उद्दिश्य पायसेन तत्तन्नाम चतुर्थ्यन्तं स्वाहान्तं उच्चार्य परिवारपदान्वितं वक्ष्यमाणेन **विधिना हुनेत्**।

ओं ब्रह्मणे सपरिवाराय स्वाहा। ओं प्रजापतये सपरिवाराय स्वाहा।

ओं रुद्राय सपरिवाराय स्वाहा। ओं सर्वेभ्यः देवेभ्यः सपरिवारेभ्यः स्वाहा।

ओं छन्दोभ्यः सपरिवारेभ्यः स्वाहा।

ओं वेदेभ्यः सपरिवारेभ्यः स्वाहा।ओं ऋषिभ्यः सपरिवारेभ्यः स्वाहा।ओं गन्धर्वेभ्यः सपरिवारेभ्यः स्वाहा।ओं सरीसृपेभ्यः सपरिवारेभ्यः स्वाहा। ओं यक्षेभ्यः सपरिवारेभ्यः स्वाहा।ओं अप्सरेभ्यः सपरिवारेभ्यः स्वाहा। ओं मासादिभ्यः सपरिवारेभ्यः स्वाहा। ओं ऋतुभ्यः सपरिवारेभ्यः स्वाहा। ओं अयनेभ्यः सपरिवारेभ्यः स्वाहा। ओं वत्सरेभ्यः सपरिवारेभ्यः स्वाहा। ओं सर्वेभ्यो देवीभ्यः सपरिवारेभ्यः स्वाहा। ओं द्वीपेभ्यः सपरिवारेभ्यः स्वाहा। ओं समुद्रेभ्यः सपरिवारेभ्यः स्वाहा। ओं पर्वतेभ्यः सपरिवारेभ्यः स्वाहा। ओं आपगाभ्यः सपरिवारेभ्यः स्वाहा। ओं भूतेभ्यः सपरिवारेभ्यः स्वाहा। ओं पशुभ्यः सपरिवारेभ्यः स्वाहा। ओं वृक्षेभ्यः सपरिवारेभ्यः स्वाहा। ओं ओषदीभ्यः सपरिवारेभ्यः स्वाहा। ओं वनस्पतीभ्यः सपरिवारेभ्यः स्वाहा। ओं उद्भीजेभ्यः सपरिवारेभ्यः स्वाहा।ओं स्वेदजेभ्यः सपरिवारेभ्यः स्वाहा। ओं अण्डजेभ्यः सपरिवारेभ्यः स्वाहा। ओं जरायुजेभ्यः सपरिवारेभ्यः स्वाहा। ओं भूरादि सप्तलोकेभ्यः सपरिवारेभ्यः स्वाहा। ओं अतलादि सप्तपातालेभ्यः सपरिवारेभ्यःस्वाहा।ओं चण्डादि द्वारपालेभ्यः सपरिवारेभ्यः स्वाहा। इति हुत्वा।

प्रायश्चित्तार्थं पञ्चोपनिषन्मन्त्रैः व्याहृतिभिश्च,पूर्णाहुतिं 'इदं विष्णुरिति हुनेत्।एवं तद्दिनविहित बलिद्रव्यैः उपरिष्टात् तत्र तत्र तत्तद्देवतोद्वासनरहितं प्रत्यहं यावत्तीर्थदिनावधि सायं प्रातः हुनेत्। एकाग्नौ वा होमद्रव्यं त्रये चतुष्टये वा अग्नौ हुनेत्। तावता च अग्निं सम्यक् रक्षेत्।

बलिदानं तु प्रथमं यागमण्टपे कर्तव्यम्। तत्प्रकारस्तु चक्र बलिबिम्बाऽन्नमूर्ति सहितं यागमण्डपात् निष्क्रम्य। तद्वारेषु पुरतः कुमुदादीनां शुचौ भूमौ आवाह्य अभ्यर्च्य। बलिं दत्वा। बलिद्रव्यपात्र घण्टा पुष्पबाजन तोय करक धूप दीपपात्र दीपिकाधारकेषु अग्रे गच्छत्सु तदनु अन्नमूर्तिः, ततः चक्रं, तदनु नित्योत्सवार्चां च इत्येवं कृत्वा। वितानछत्रादि समन्वितं द्वारेषु चण्डादीनां आवरणेषु तत्तद्देवतानां तोयपूर्वोत्तरं बलिं निक्षिप्य। बलिमुद्रां मङ्गलाष्टकं च दर्शयित्वा। ग्राममध्यमारभ्य ब्रह्मदीशानपर्यन्तं क्रमात् तत्तद्देशेषु तौर्यत्रिकसहितं तत्तद्देवताः अभ्यर्च्य बलिं दत्वा। महाबलिपीठे तु अशेषतः अवशिष्टं बलिद्रव्यं सर्वान् पार्षदान् उद्दिश्य बलिं दत्वा। बलिं प्रदक्षिणीकृत्य आलयं प्रविशेत्। एवं ध्वजारोहणादितीर्थान्तं सायं प्रातः बलिं दद्यात्। आरंभदिवसे रात्रौ समाप्तिदिवसे अहनि बलिमेकमेकां मध्यदिवसेषु अह्नि रात्रौ च बलिद्वयं कुर्यत्। तीर्थदिवसे ग्रहणायन विषुवादिषु प्राप्तेषु तस्मिन् बलिद्वयं कुर्यात्। ग्रामादि रहिते स्थानमध्ये महापीठस्य पुरतः ब्रह्मणे बलिं वितरेत्। बलिद्रव्याणि तु प्रथमेहनि फललरजनीचूर्ण करंभ लाजान् चरुणा सम्योज्य। द्वितीये अहनि चरुणा तिलतण्डुलेन संयोज्य। तृतीये तु लाज धान्यापूपिकाः चरुणा संयोज्य। चतुर्थे चरुणा सक्तुशालिपिष्ट नालिकेर जलानि संयोज्य। पञ्चमे पद्मबीज पायस शालितण्डुलं चरुणा संयोज्य। षष्टे तु अपूपं चरुणा संयोज्य। सप्तमादिषु त्रिषु दिवसेषु चतुर्विधमन्नं अपूपैः सक्तुभिः संयोज्य। क्रमात् बलिं दद्यात्। तदनु सुमुहूर्ते प्राप्ते गुरुः शयनस्थं उत्सवकौतुकं 'उत्तिष्ठे"ति मन्त्रेण उत्थाप्य।स्वस्तिसूक्तं पठद्भिः ब्राह्मणैः सह सप्तभिः ब्राह्मणैः सह तस्मात्मन्दिरात् निर्गम्य। रथन्तरसाम उच्चार्य। स्यन्दनेन गजेन वा अन्येन वा यानेन मण्डपान्तरं नीत्वा।'भद्रं कर्णे"ति तद्दिनविहितं यानमारोप्य। तत्र देवम् न्यासपूर्वकं अभ्यर्च्य। पृथुकादिकं निवेद्य। क्षौमाभरणमाल्यादिभिः अलङ्कृत्य।देवस्य चरणयोः निशाचूर्णं निक्षिप्य। घृतादि परिषिक्तैः दीपैः सर्वतः वीथिकाश्च अलङ्कृत्य। वालव्यजन तालवृन्त बर्हिबर्हमुक्तातपत्रासि धूप दीप धारिभिः स्वलङ्कृतैः ब्राह्मणैश्च पुरतः यानारूढेन साञ्जलिना ध्वजारूढेन तार्क्ष्येण पृष्ठतश्च कनकशिबिकां आरूढेन वेत्रहस्तेन विरिञ्चादीन् समुत्सारयता प्रणमता विष्वक्सेनेन च कनकपात्रे पादुके समारोप्य। पुरतः धारयद्भिः विप्रैश्च राजचिह्नै अन्यैः सकलवेदशास्त्रागमज्ञैः परस्परजिगीषुभिः वादनिपुणैः विप्रैः गद्यपद्य मिश्राणि स्तोत्रानि पठद्भिः वन्दिभिश्च नृत्यता

गायतागाणिक्येन च अन्यैः तत्तद्विद्याविशारदैश्च साकं आनद्ध, तत, सुषिर, घनादि चतुर्विध वाद्यघोषैः च आवरणं सर्वं परिक्रम्य। बहिः तथा वीथिकाश्च प्रदक्षिणं परिक्रम्य। प्रवेशसमयेपि प्राकारवलयं प्रादक्षिण्येन गत्वा। मण्डपालयं अन्तः प्रवेश्य। तत्र यानात् आसने देवं अवरोप्य। बलिबेरंमन्दिरे चक्रं यागसदने बहिस्थिते बलिपीठे च अन्नमूर्तिं निवेश्य।ध्रुवबेरं नित्यैः द्विगुणैः वस्तुभिः अर्चयेत्. प्रत्यहं देवस्य वीथिकापर्यटनानन्तरं यथाविधि स्नपनकर्म कुर्यात्।

एकबेर विधाने तु मूलबिंबे, बहुबेरे तु उत्सवकौतुकं वा स्नपनकौतुकं वा यथाशक्ति यथावस्तु स्नपनं कुर्यात्। मण्डपे सिंहविष्टरे देवं निवेश्य। देहशुद्धिपुरस्सरं अर्चयित्वा। स्नपनकर्मसमाप्य। महाहविः निवेद्य। मण्डनालयं आसाद्य। देवं भूषणादिभिः अलङ्कृत्य। बिम्बे तत्र स्थिते देशिकः यागमण्डपं प्राप्य। द्वारतोरण कुम्भमहाकुभ उपकुम्भ मण्डलाराधनं कृत्वा। यथोदितं निवेद्य। पूर्ववत् हुत्वा। यथाविधिपूर्ववत् बल्यर्चादि बिम्बयुतं बलिकर्मकृत्वा। तदनु उत्सवार्चां अलङ्कृत्य, यानं आरोप्य। पूर्ववत् सर्वालङ्कारसहितं ग्रामधामादि प्रादक्षिण्येन नीत्वा। तत्र स्थाने स्थाने समाहृत तांबूल,वीटिकाः, पृथुकादीनि, भक्ष्याणि, नालिकेरफलानि, पानीयाचमनादीनि यथाविधि अखिलं नैवेद्यं च अस्त्रमन्त्रेण अद्भिःप्रोक्ष्य निवेदयेत्। पक्वं फलं तूष्णीं प्रदर्शयेत्. पुष्पाभरणादिकं पथि समागतं सर्वमन्त्रेण प्रोक्ष्य देवाङ्गे नियोजयेत्। एवं ग्रामं धामं च प्रदक्षिणं नीत्वा। धामंप्रवेश्य। देवं यानात् शिबिकां आरोप्य। मण्डपं प्रवेश्य,तत्र पूर्ववत् सर्वोपचारसहितं अर्चयेत्। एवं अपूर्वाभरण,मालाम्बर,यानोद्यानाद्यैः तीर्थदिनावधि प्रतिदिनं यथाकौतूहलं तथा देवं तोषयेत्। ग्रामादौ नित्यं देवस्य श्रीभूमिभ्यां सह विना वा महोत्सवं कुर्यात्।

षष्टे अहनि स्नानबिम्बसहितं यात्राकौतुकं भद्रासनं आरोप्य। तस्य पुरतः धान्यराशौ कुम्भान् संस्थाप्य, संपूज्य। देवं मन्त्रासनादि स्नानासनान्तैः उपचारैः उपचर्य। कलशैः संस्नाप्य। वस्त्रादिदीपान्तैः उपचारैः संपूज्य। एकबेरविषये मूलबेरे सर्वमेवं कृत्वा। तदनु क्षालितं उलूखलं वस्त्रादिभिः अलङ्कृत्य। तण्डुलपीठे संस्थप्य। श्रीसूक्तेन लक्ष्मीं ध्यायन् मन्त्रितं अर्चितं कृत्वा। मूलमन्त्रेण मुसलं प्रक्षाल्य। अभिमन्त्र्य। मूर्तिपैः सार्धं गुरुः उलूखले निशाचूर्णं निक्षिप्य। मुसलं आदाय. देवदासीषु मङ्गळं पठत्सु निशाचूर्णं यथासूक्ष्मतरं भवेत्तथा मुसलेन कृत्वा। तदादाय। वेष्टितवाससि कुम्भे निक्षिप्य। सकूर्चमल्लक वस्त्रं कुम्भं स्थण्डिलपीठे संस्थाप्य। मूलमन्त्रेण गन्धादिभिःअभ्यर्च्य। कुम्भं उद्धृत्य। तैः चूर्णैः श्रीसूक्तेन देवमभिषिच्य। मूर्तिपैः सह गुरुः देवं प्रदक्षिणं कृत्वा। अष्टाङ्ग प्रणिपातेन प्रणिपत्य। पुष्पाञ्जलिं विकीर्य। स्तोत्रैः स्तुत्वा। सर्वालङ्कारयुतं उत्सवं कुर्यात्।

सप्तमे दिवसे रथं पुण्याहजलेन प्रोक्ष्य। शिखरे ब्रह्माणं, अयने हंसं, द्वितीयतले अनन्तं, उपकंण्ठे वासुदेवं,प्रथमतले तक्षकं, महापीठे गरुडं, मध्यपीठे इन्द्रादीन् च,चक्रेषु वायुं, रथे वैनतेयं च आवाह्य अभ्यर्च्य। हविः निवेद्य। इन्द्रादिकुमुदादिभ्यः बलिं दत्वा। देवं रथं आरोप्य। **पूर्ववत् उत्सवं कुर्यात्।** तदनु देवस्य प्रातः उत्सवं कृत्वा। अपराह्ने देवस्य जलद्रोण्यां अवगाहनं कुर्यात्।जलद्रोणीं कटाहं वा सरसि सोपानदेशे सौवर्णं धान्यराशौ निधाय। गन्धोदकेन आपूर्य। परितः अक्षतानि विकीर्य। पुण्याहं वाचयित्वा।

परिस्तीर्य, तज्जलं शोषणादीनि कृत्वा। तत्रगङ्गाद्याः सरितः आवाह्य अभ्यर्च्य। जलं अब्लिङ्गैः मन्त्रैः अभिमन्त्र्य। देवं प्रार्थयेत्।

भगवन् पुण्डरीकाक्ष शरणागतवत्सल।
अस्मिन्नहनि कर्तव्या जलक्रीडा त्वया विभो।
शुद्धये सर्वलोकानां देवानां प्रीतये विभो।
यात्रा तदर्थं कर्तव्या मदनुग्रहकाम्यया।

इति विज्ञाप्य। देवं प्रणम्य। मन्त्रासनादिस्नानांतैः उपचारैः उपचर्य। वाद्यघोषेषु प्रवर्तितेषु वारुणसूक्ताद्यब्लिङ्गैः मन्त्रैः तत्र देवं अवगाह्य। तदनु यानं आरोप्य. अन्यं मण्टपं आनीय। तत्रापि देवं हविरन्तं अभ्यर्चयेत्।

यद्वा अष्टमे अहनि वा प्रातरुत्सवं कृत्वा। तदनु मृगयाकर्म,तदनु जलद्रोण्यवगाहनं वा कुर्यात्। तस्मिन् दिने देवं मृगयानुगुणायुधालङ्कार सन्नाहैः सह गजे वा कृत्रिमाश्वे वा आरोप्य। देवीभ्यां सह विना वा हस्त्यादिभिः सैन्यैः सह ग्रामसीमादीन् प्रादक्षिण्येन नीत्वा। देवं उद्यानमण्डपं प्रापय्य। तत्र मध्ये सौवर्णविष्टरे विनिवेश्य। स्नानपूर्वं अभ्यर्च्य। अन्यस्मिन् आसने विनिवेश्य। महाहविः निवेद्य।यानं आरोप्य। तद्रात्रौ मन्दिरान्तर्भुवं नीत्वा। तदनु नित्योत्सवं कृत्वा। अपररात्रिभागे तीर्थार्थं अङ्कुरार्पणं करिष्ये, इति सङ्कल्प्य। अरावापनं यथा विधि कृत्वा।देवं संपूज्य। इमां गाथां उदीरयेत्।

तीर्थयात्रा त्वया देव श्वः कर्तव्या सुरेश्वर।
तत्र प्रतिसरारंभं त्वमनुज्ञातुमर्हसि।

इति विज्ञाप्य। मूलात् तीर्थबिम्बे समावाह्य। तीर्थबिम्बे प्रतिसरं तदभावे नित्योत्सवबिम्बे तस्यापि अभावे स्नानार्चायां, तदभावे च उत्सवबिम्बे वा बद्ध्वा। धान्यराशौ पूर्ववत् यथाविधि अधिवास्य। ततः

प्रातः उत्सवं कृत्वा। तदनु शायितं बिंबमुत्थाप्य,स्नानमण्डपे स्नानपीठिकायां तं निवेश्य। यागमण्डप भूमिषु स्थापितान् कुम्भान् आदाय। धामप्रादक्षिण्येन वेदघोषैः सह नीत्वा। तीर्थबिम्बस्य सन्निधौ धान्यराशौ संस्थाप्य। देवं मन्त्रासनपूर्वकं पूर्वं संस्नाप्य। तदनु सुमुहूर्ते गुरुः स्थापितैः कुम्भैः मूलमन्त्रेण पूर्वादि मध्यकुम्भान्तैः वेदघोषेषु प्रवर्तितेषु अभिषिच्य। वस्त्रादि दीपान्तैः उपचारैः उपचर्य। एकबेरविधाने तु सर्वं एतत् मूलबिंबे कृत्वा। तदनु पूर्ववत् देवस्य चूर्णस्नानं यथाविधि कृत्वा। देवं स्तुत्वा। प्रदक्षिणीकृत्य। अष्टाङ्ग प्रणिपातेन प्रणिपत्य पुष्पाञ्जलिं विकीर्य। तदनु कल्याणकौतुकं यानं आरोप्य। तीर्थबिंबपुरस्सरं चक्रेण सह छत्रध्वजचामर दीपवाद्यघोष सहितं समुद्रं नदीं तटाकं वा प्रापय्य। तत्र तीरे प्रपायां विष्टरे विनिवेश्य। अग्रतः पञ्चविंशतिः, सप्तदश, यद्वा कलशान् नव यथाविधि तत्तद्द्रव्ययुतान् संस्थाप्य। संपूज्य।नद्यादिजलानां शोषणादिकृत्वा। पुण्याहं वाचयित्वा।प्रोक्ष्य। तत्र गङ्गाद्याः सरितः आवाह्य अभ्यर्च्य निवेद्य। तीर्थबिम्बं मन्त्रासनपूर्वकं संपूज्य।कलशः यथाविधि संस्नाप्य। चक्रं शिष्टवारिणा च, तीर्थबिंबं समानीतं कल्याणकौतुकं कूर्चेन नद्यादिजलेन प्रोक्ष्य। कल्याणकौतुकसन्निधौ तद्बिंबं गुरुः शिरसि कृत्वा। चक्रं वा तदभावे कूर्चं वा तथा कृत्वा। चक्रमन्त्रं उच्चरन् जले निमज्जेत्। ततः गुरुः तदानीमेव बिंबानां स्वस्य च रक्षासूत्राणि विसृज्य। जले क्षिप्त्वा। तदनु मण्डपे देवं आनीय यथापुरं पूजयित्वा यानं आरोप्य, आलयाभ्यन्तरं प्रापयेत्। तद्रात्रौ देवं मण्डपे नीत्वा यथाविधि अभ्यर्च्य, प्रभूतं निवेद्य।

भगवन् पुण्डरीकाक्ष शरणागत वत्सल।
ध्वजार्थाङ्कुरमारभ्य उत्सवाऽवभृतान्तिमम्।
यन्मयानुष्टितं कर्म तव सुप्रीतये विभो।
तथान्यैः मदनुज्ञातैः देशिकैश्चापि यत्कृतम्।
साधकैश्च तथान्यैश्च विविधैः परिचारकैः।
तत्तत्संपूरणार्थं च न्यूनाधिक्योपशान्तये।
त्वामद्यवासरे यष्टुं चतुस्थान स्थितं विभो।
प्रवृत्तमनुजानीहि मदनुग्रहकांयया।

इति देवेशं विज्ञाप्य। तदनुज्ञां अवाप्य. ततः प्रभाते भक्तैः भागवतैः सेविते मण्डपान्तरे केचिद्भूतले चक्राब्जं आवरणान्वितं उक्तवर्त्मना संकल्प्य। तुलस्यादिभिः नानावर्णैः प्रसूनैः यथाविधि चित्रयित्वा।

तत्र मध्यतः सप्रभं भद्रपीठे निधाय। तस्मिन् कल्याणकौतुकं आरोप्य। अर्घ्यादिभिःअभ्यर्च्य, सर्वतःदिक्षु वेदघोषेषुवाद्यघोषेषु च प्रवर्तितेषु द्वादशाक्षरेण **भगवन्तं अर्चयेत्।**

ओं द्वादशाक्षर मन्त्रस्य। परमेष्ठि, सनन्त, सनक, प्रजापति, भृगु, सनत्कुमार, पुलस्त्य, पुलह, क्रतु, मरीचि, अत्रि, आङ्गीरसऋषयः।

गायत्री, बस्तक्षेत्र, प्रजापति, त्रिष्टुप्, पङ्क्ति, बृहति, विराड्, बष्ठ, त्रिवत्सक, उष्णिक्, श्रियश्चंदाँसि। विष्ण्वादि गोविन्दान्ता द्वादश देवताः। चित्,जीव, प्रकृति, बुद्धि, मन,स्सात्विक, राजस, तामस, व्योमा, ऽग्नि, मरुता,ऽऽपस्तत्वानि। परमव्योम, वाय्व,ऽग्नि,जल, सत्य, तपो, जन, मह,स्स्वर्ग, भुव,र्भूमि,पातालानि क्षेत्राणि।सित, कृष्ण, धूम्र,श्याम,ताम्र, स्फटिक, शंख, रक्त, शुक्ल, लोहित, तमः, पीतवर्णाः।द्वादशसु अक्षरेषु एकैकं,हरिं ध्यात्वा। अर्घ्यादि भूषान्तैः नवभिः उपचारैः कल्याणकौतुकं अभ्यर्च्य।पुष्पैरपि हृदयाद्यङ्गानि उद्दिश्य च पुष्पैः'फलं भवतु मे पुष्पैः नमः"इति अवसानकं च, ततः श्रीवत्स कौस्तुभादि भूषणानि उद्दिश्य दिव्यायुधानि चक्रादीनि च यथाक्रमम् आवरणस्थानां देवतानां च, विष्ण्वादिमूर्ति दशकं, केशवादि मूर्तीश्च उद्दिश्य तत्तन्मन्त्रैश्च, पुरुषसूक्त, नारायणानुवाकैः,विष्णुसूक्तैश्च, पञ्चोपनिषन्मन्त्रैश्च, पादयोःपुष्पसमर्पणं कृत्वा।

सितादिभिः पुष्पैः एवं देवं तोषयित्वा। चतुर्विधमन्नं निवेद्य। मण्डपे तत्र आग्नेये अग्निं उपसमिध्य। समिदाज्यचरुभिः पायसादि चतुर्विधान्नैश्च, मूलमन्त्रेण पृथक् अष्टोत्तरशतवारान् हुत्वा। ततः देवं प्रदक्षिणी कृत्य। स्तुत्वा,भूतले दण्डवत् प्रणम्य। कल्याणकौतुकं यानं आरोप्य। प्रथमावरणं प्रापय्य। तत्र स्थित्वा,सेवार्थं आगतान् ब्रह्मादिदेवान्, भक्तान्, भागवतान् अन्यान् वैष्णवान् च स्वं स्वं आलयं गन्तुं नियुज्य। तदावरणं प्रदक्षिणं परिक्रम्य। मन्दिराभ्यन्तरं नीत्वा। तस्य दिवसस्य निशि प्रथमयामे मण्डपे स्नानासने देवं निवेश्य। उत्सवान्तोचितं स्नपनं यथाविधि कृत्वा। मण्डपान्तरं नीत्वा। गुरुः यागमण्डपं आसाद्य। तत्र यथाविधि होमं कृत्वा। शान्तिहोमं च पूर्वोक्त विधानेन प्रायश्चित्तार्थं पञ्चोपनिषण्मन्त्रेण आज्येन सहस्रं,शतं वा आहुतीनां हुत्वा। ततः पूर्णाहुतिं च अग्निं विसृज्य। तत्र तोरणादिषु देवान् मण्डलस्थं च उद्वास्य। ध्वजस्तम्भं आसाद्य। खगाधिपं पूजयित्वा। प्रदक्षिणं कृत्वा। संहारक्रमेण कुम्भे समावाह्य। तन्मूलभेरे नियोज्य। कल्याणकौतुकस्य सन्निधावेव महानिशि ध्वजं अवरोप्य। स्तम्भं ध्वजं च गुरुः स्वयं गृहीत्वा। तदनु तत्र तत्र आवाहितान् देवान् अपि स्थाने स्थाने सकृत् सकृत् तूर्यघोषैः सह मूकैः परिकरैः सार्धं बलिं दत्वा। स्वस्व नाममन्त्रैः उद्वास्य।गुरुः अष्टाक्षरं जपन् देवस्य धामप्रविश्य। देवं विज्ञाप्य। शकटादिकं यानं आरोप्य। मखकौतुकं धामान्तः

प्रापय्य संपूज्य।तच्छक्तिं मूलबिंबे नियोज्य। मूलबिंबं संपूज्य।स्तुत्वा प्रणिपत्य, प्रार्थ्य प्रदक्षिणं कृत्वा । स्वगृहं प्रविशेत्। यजमनोपि गुरुं जीवजीवात्मकैः धनैः यथामनस्तुष्टिं तथा तोषयित्वा। तथैव अन्यान् मूर्तिपान् परिचारकान् च , गुरुं प्रणम्य। तं यानं आरोप्य। सर्वालङ्कारैः सह ग्रामप्रदक्षिणं कृत्वा।तद्गृहं प्रापयेत्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां
महोत्सवविधिः नाम चतुस्त्रिंशः परिच्छेदः

अथ पञ्चत्रिंशः परिच्छेदः

जीर्णोद्धार विधिः

अथ जीर्णोद्धार विधिः उच्यते।

स्वायंभुवार्षदिव्यमानुषेषु चतुर्ष्वपि रत्नजेषु अङ्गहानिः यदि तत्तदङ्गं पुनस्तपनीयैः समाधातव्यमेव। न त्यागो युज्यते। शैलजेष्वपि तद्वदेव। दार्वादिषु पञ्चसु हीनाङ्गेषु तानि सन्त्यज्य पुनस्सृजेत्।सर्वात्मना सृष्टौ अङ्गमात्रसमाधाने च तच्छक्तिं कुम्भे समावाह्य। यथापुरं निर्माय जलाधिवासादिकं सर्वं प्रतिष्ठायामिव कारयेत्।

स्थित्यासनशयनारूढेषु बिंबेषु समाधिः शक्यते यदि तेषां त्यागः न युज्यते। लोहजं बिंबंत्यक्तं द्रावयित्वा पुनः सृजेत्। देवी जीर्णे पुनस्सृष्टौ देव्यो यथावत् स्थिताश्चेत् देवस्ताभिरेव योज्यः। न अन्याः पुनः सृजेत्।तासु पूजने सन्तते पुनः उद्वाहश्च न कार्यः। प्रभापद्मासन आयुधादीनां वैकल्ये चलने वापि असमाहित प्रतिमाशक्तिं मूलबिंबे घटे वा उद्वास्य, तानि यथापुरं समाधाय यथाविधि संप्रोक्ष्य तां शक्तिं पुनः बिम्बे समावाह्य पुनः पूजयेत्।बालगेहं निर्माय तत्र शैलादिषु जीर्णेभ्यः शक्तिं आवाह्य पूजयेत्। समाधानाऽनन्तरं ततः पुनः आवाह्य पूजयेत्। तत्रापि सन्धान योग्यं सन्धेयं, अयोग्यं तु क्षितौ अंभसि वा निक्षिपेत्। प्रासाधे शिथिले स्वैः परिवारैः उपेतं देवं बालवेश्मनि यथापुरं पूजयेत्। अजीर्णे ध्रुवबिम्बे धामनि जीर्णे सति तत्स्थितान् देवान् देवपरिवारान् मूलबिम्बे निवेशयेत्। अजीर्णे धामनि जीर्णेध्रुवबिम्बे तन्निष्ठदेवतानां उद्वासः न अन्यत्र कर्तव्यः। अजीर्णे वा अङ्ग भङ्गादि रहिते धामादौ सति न पुनः कल्पनं कार्यम्। यदि कल्पयेत् आत्महानिः भवति। पुरा प्रासादात् प्रमाणरहित कल्पितं प्रासादादि पुनः कल्पने लक्षणान्वितं कुर्यात्। बहुबेरैकबेरेषु यथापुरमेव

कल्पयेत्.विपरीतकरणे महान् दोषो भवति। बहुबेरं पूर्वं देवीभ्यां रहितं यदि, भूयः कल्पने ताभ्यां सह विना वा कुर्यात्।

अमानुषे तु बिंबादिकं पूर्वं लक्षण वर्जितं यदि जीर्णोद्धारेपि तथैव, न तदन्यथा। अमानुषे तु बिम्बानां आसन शयन यानानि पुनः उद्धारे यथापुरमेव।मानुषे तु तेषां पुनः सृष्टौ यथेच्छाकरणं न दोषाय।

दिव्यं विमानं पुरा यद्वस्तु यन्मानं यादृशं पुनः सृष्टौ तादृगेव, न अन्यथा। आर्षं मानुषं सदनं ऐष्टक्रं मृण्मयं वा जीर्णं पुनः कल्पने शैलेन इष्टकया वा कार्यं। क्षुत्तानां उपपीठादीनां रक्षार्थं बहिः वर्धने न दोषः। सालगोपुरपीठादौ चलिते जीर्णेपि शिलाभिः दृढं विस्तीर्णं अन्यथा वा कुर्यात्।नद्यादि जलवेगेन प्रासादादि निर्बाधेअन्यत्र स्थाने पुनः कल्पयेत्। प्रथमकल्पने मूर्तिमन्त्राधिकारिणः यादृग्विधाः तथैव द्वितीय कल्पने च। न अन्यथा। धामादीनां पूर्वकल्पने जीर्णोद्धारे च फलं तुल्यमेव। तत्र मूर्तिव्यत्ययं न कुर्यात्। बहुबेरावयवमात्रजीर्णोद्धारे तु प्रतिष्ठायामिव कर्मार्चां वेद्यां संस्थाप्य शय्यायां शाययित्वा। जलाधिवास नयनोन्मीलन तत्वसंहारोत्पादनानि विना सर्वकर्माणि कुर्यात्।

अथ बालालय प्रतिष्ठाविधिः उच्यते-

आचार्यः यजमानेन सह वैष्णवान् सकलशास्त्रवेदागम पुराणज्ञान् ब्राह्मणानपि स्वयं आहूय, प्रणिपत्य, प्रार्थयन् एतान् भोजयित्वा। स्वर्णाभरणवस्त्रगन्धतांबूलाद्यैः उपचर्य। तान् प्रदक्षिणीकृत्य। प्रणम्य, कृताञ्जलिःसन् वासुदेवं ध्यात्वा च इत्थं विज्ञापयेत्।

पूजाबिंबमिदं विष्णोः स्थापितं पूर्व सूरिभिः।
पूज्यमानेऽङ्ग वैकल्य दूषणं चेहवर्तते।
अस्य जीर्णस्य बिम्बस्य चोद्धारं कर्तुमुद्यमे।
आगमस्यवशात् कर्तुं व्यवसायमुपास्महे।
यथैव देवपूजायां विनियुक्तं अनिन्दितम्।
गन्धपुष्पादिकं पश्चात् निर्माल्यं इति निन्द्यते.
तथैव जीर्णितं बिंबं पूजायामुपयुज्यते।
पश्चात्तज्जीर्णितं बिम्बं निर्माल्यमितिनिन्द्यते।

अस्य बिंबस्यचोद्धारं कर्तुमिच्छामि संप्रति।
भवन्तो नः अनुजानन्तु भवदाज्ञां करोम्यहम्।

इति विज्ञाप्य। तैः अनुज्ञातः सन् प्रासादाग्रे दूर्वाभिः मधुयुक्ताभिः आहुतीनां लक्षं सहस्रं अष्टोत्तरशतं वा व्याहृतीभिः(ओं भूः,ओं भुवः, ओं सुवःस्वाहा)हुत्वा। पञ्चोपनिषन्मन्त्रैः शान्तिहोमं विधाय। ब्राह्मणैः सह पुण्याहं वाचयित्वा. शार्न्ति च, आत्मसमर्पणपूर्वकं गुरुं नमस्कृत्य। दक्षिणां दत्वा। लोहजं दारुजं वा बिंबं पूर्वलक्षणोपेतं कल्पयित्वा। जलाधिवासादीनि कर्माणिमण्डपे कृत्वा। पूर्वोक्तप्रदेशे इष्टकया दारुणा मृदा वा विमानानुगुण्येन एकहस्त समुच्छ्रायवतीं कर्णिकादलयुतां वेदिकां आपाद्य। तदुपरि बालबिम्बं संस्थाप्य. अपरेऽहनि प्रतिष्ठाप्य। तत्परेऽहनि रात्रौ मूलगेहं प्रविश्य। स्नपनादिभिः यथाक्रमं संपूज्य। रक्षाबन्धनं कृत्वा। प्रासादस्य चतसृषु दिक्षु पूर्ववत् शान्तिहोमं च विधाय. कर्मार्चायाः पुरतः स्थण्डिलं कृत्वा। लोहजं मृण्मयं वा महाकुम्भं, तत्परितः कलशाष्टकं च विन्यस्य। तान् ससूत्रवस्त्रापिधानकूर्चान् सनिष्कप्रमाण दलाष्टकयुत स्वर्णपद्मान् कृत्वा। महाकुंभे मूलमन्त्रेण मूलमूर्तिं कलशेष्वपि इन्द्रादीन् आवाह्य अभ्यर्च्य। कुम्भस्योत्तरेदेशे गुरुः शयीत। तदनु प्रभाते स्नात्वा आचार्यः बालगेहं समासाद्य, पूजयित्वा। प्रलयोदयमार्गेण शोधयित्वा। योगपीठं संकल्प्य च। इमां गाथां उदीरयेत्.

कियन्तं कालमेतस्मिन् कल्पगेहे जनार्दन।
निवासं कुरु देवेश कल्पिते बालमन्दिरे।
अद्यप्रभृति देवेश द्वादशाब्दावधि प्रभो।
त्वदन्यान् केशवादीन् च वासुदेवोनुमन्यते।

इति प्रहृष्टेन मनसा देवं प्रणम्य।बद्धाञ्जलिपुटः भूत्वा इमां उदीरयेत्।

भगवन् देवदेवेश शङ्खचक्र गदाधर।
नीचालयमहंकर्तुं बिम्बं चापिमनोहरम्।
वाञ्छामि तव देवेश तदनुज्ञातुमर्हसि।

एवं सयजमानः आचार्यः प्रार्थयन् मनसा शनैः काले विज्ञाप्य। महाकुम्भे पञ्चमन्त्रेण आवाह्य। प्रणवेन विनिष्क्रम्य। प्रासादं प्रदक्षिणी कृत्य।बालगेहं च। तस्य अग्रतः महाकुम्भं निधाय। ब्राह्मणानां अनुज्ञया कालं विज्ञाप्य। पञ्चोपनिषन्मन्त्रेण महाकुम्भजलेन बिम्बं संसिच्य। ततः देवं प्रणम्य।

संपूज्य। प्रासादकोणेषु बलिं दत्वा,बिम्बं अलंकृत्य,पुण्याहं वाचयित्वा। सृष्टि संहारन्यासं कृत्वा. गन्धपुष्पादिभिः संपूज्य। ब्राह्मणेषु वैदिकतान्त्रिकान् मन्त्रान् जपत्सु, सोष्णीषः अलङ्कृतः गुरुः हैमं लाङ्गलं आदाय। मूलमन्त्रेण पीठबन्धनं मोचयित्वा। विष्वक्सेनं ध्यायन् बिम्बं गेहं वा निर्माल्यवत् स्मृत्वा। वस्त्रैः आच्छाद्य, व्याहृत्या रज्ज्वा बद्ध्वा समुद्धृत्य वाद्यघोषैः सह आचार्यः क्षितौ अंभसि वा निक्षिप्य। विधिवत् स्नात्वा प्रासादं प्रविश्य। पुण्याहं वाचयित्वा। समन्ततः बलिं च दत्वा। गेहस्थान् देवान् उद्वास्य,तत्र गाः वासयित्वा। खात्वा, उद्धृत्य वालुकाभिः सम्पूर्य। प्रासादाग्रे रक्षाहोमं कृत्वा। ऋचं पश्चिमायां उत्तरस्यां साम प्राच्यां च यजुरथर्वणं,दक्षिणस्यां दिशि ब्राह्मणान् पाठयित्वाच। एवं शान्तिहोमं कृत्वा। चतुर्थेऽहनि बालबिम्बस्य प्रासादादेः वा स्नपनं कृत्वा, तदन्ते पुष्पयागावसानिकं उत्सवं कुर्यात्। यजमानः गुरवे यथाविधि दक्षिणां दत्वा। मूलगेहं बिम्बं वा यथाविधि समाप्य। प्रतिष्ठां च यथा विधि कुर्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

जीर्णोद्धारविधिः नाम पञ्चत्रिंशः परिच्छेदः

****

षट्त्रिंशः परिच्छेदः

संप्रोक्षण विधिः

संप्रोक्षण विधिः उच्यते

प्रासादं चाङ्गभङ्गादि सन्धाने नूतने शुभे।
प्रतिमायां च पीठे च प्रभायां चायुधेषु च।
आराधने च विच्छिन्ने भूगुप्ते कमलासन।
रोदने स्वेदने चैव कंपने पतनेपि च।
वल्मीकादिसमुत्पत्तौ वर्षवातादि दूषिते
कुण्डगोळक संस्पर्शे वेदविक्रयकारकैः।
स्पर्शने प्रतिलोमाद्यैः नित्याशौच विगर्हितैः।
प्रतिलोमाऽनुलोमाद्यैः सूतैश्च रथकारकैः।
वैखानसैश्च संस्पृष्टे भार्गवागमपूजकैः।
शैवादिभिश्च पाषण्डैःब्रह्महत्यादि दूषितैः।

क्षय्यपस्मारिकुष्टाद्यैः कृच्छ्रिभिः मूलरोगिभिः।
उदक्यादिभिरन्यैश्च शिल्पिभिः स्पर्शदूषिते।
विण्मूत्ररुधिरोपेयस्पर्श दुष्टे च मन्दिरे.
जनने मरणे चैव श्वसृगालखरादिभिः।
स्पृष्टे च बिम्बे तन्त्राणां सङ्करे समुपस्थिते
एवमादिषु चान्येषु संप्रोक्षण विधिः भवेत्।
धामादिकमसंप्रोक्ष्य प्रतिमादिकमाप्यथ।
अर्चने राष्ट्रमधिपः प्रजाश्च सदनं हरेः।
शून्यं स्यादिरिणप्रायं उपद्रवसमाकुलम्।
दुर्भिक्षव्याधिकलहमृतिप्रायास्स्यु रीतयः।
तस्मात् संप्रोक्षणं कार्यं धामादीनां यथाविधि।

आचार्यः तदर्थं मृत्संग्रहणपूर्वकं अङ्कुरार्पणं कृत्वा।परेह्नि बिम्ब प्रासाद पीठानि स्वच्छोदकैः शोधयित्वा। पुण्याहं वाचयित्वा । 'विष्णोर्नुकं 'इदं विष्णुः इति द्वाभ्यां अब्लिङ्गैः मन्त्रैश्च संक्षाल्य। उत्तमादिषु स्नपनेषु यथाविधि एकतरेण पुण्याहपूर्वकं संस्नाप्य। यागमण्डपं अलङ्कृत्य। पुण्याहं वाचयित्वा द्वारतोरण कुम्भादीन् अभ्यर्च्य। मण्डपमध्ये वेदिकां कृत्वा। विंशतिभारैः व्रीहिभिःतदर्धेन तण्डुलेन तदर्धेन तिलेन अन्तरान्तरा वस्त्राच्छादनसहितं पीठं कृत्वा । तन्मध्ये पद्मं आलिख्य। पुण्याहं वाचयित्वा।तत्र महाकुम्भं संस्थाप्य। सूत्रवस्त्रादियुतं कृत्वा। प्रतिमां एकनिष्क प्रमाणस्वर्णेन च नवरत्नानि च निक्षिप्य। अस्त्रमन्त्रेण पिधाय। तद्दक्षिणतः करकं च तथासंस्थाप्य।तत्परितः कुम्भाष्टकं च तदुत्तरे यथाविधि मण्डलं कृत्वा। तस्मिन् मण्डले व्याघ्रचर्मादि उपकरणादिभिः पूर्ववत् शय्यां कृत्वा. वितानाद्यैरलङ्कृत्य।पुण्याहं वाचयित्वा। तत्र देवेशं शाययित्वा।कुम्भे परमात्मानं, करके सुदर्शनं च, उपकुम्भाष्टके विष्ण्वादीन् च आवाह्य। अभ्यर्च्य। नैवेद्यान्तं संपूज्य। कुण्डे स्थण्डिले वा अग्निं उपसमिध्य । यथाविधि समिदाज्य चरुभिः मूलेन च तत्तन्मन्त्रैः मूर्तिहोमं च कृत्वा । पुण्याहपूर्वकं रक्षाबन्धनं च विधाय ।ततः प्रभाते शायितं बिम्बं उत्थाप्य । स्थापितकुम्भान् आदाय।मूर्तिपैः साकं सवेदवाद्यघोषं धाम प्रदक्षिणीकृत्य। देवस्यपुरतः धान्यराशौ संस्थाप्य। पुण्याहं वाचयित्वा। कूर्चेन कुम्भतोयं आदाय। मूलमन्त्रेण, पञ्चोपनिषदा, अब्लिङ्गैः,इतरैःशांतिमन्त्रैश्च देवं

संप्रोक्ष्य।अर्घ्यादिमहाहविः नैवेद्यान्तं यथाविधि पूजयेत्। यजमानः आचार्यमूर्तिप परिचारकाणां यथार्ह दक्षिणां दत्वा,ब्राह्मणान् भोजयित्वा,तेभ्येपि दक्षिणां दद्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां
संप्रोक्षण विधिःनाम षट् त्रिंशः परिच्छेदः

****

अथ सप्तत्रिंशः परिच्छेदः

पवित्रारोहणविधिः

अथ तावत् पवित्रारोहणविधिः उच्यते

नित्यनैमित्तिक काम्यानां सर्वेषां कर्मणां न्यूनातिरेकदोष शान्त्यर्थं पूर्णाहुतिवत् पवित्रोत्सवः कार्यः । श्रावणाषाढभाद्रपदाश्वयुजेषु मासेषु सिते पक्षे द्वादशीशमी प्रतिपत्पौर्णमासी पञ्चम्येकादशी त्रयोदशी द्वितीयासु तिथिषु पुष्य रोहिणी रेवती भरणी स्वाती हस्त पुनर्वस्वादिषु ऋक्षेषु पवित्रोत्सवं कुर्यात्। तन्तून् ब्राह्मणकन्याभिः निर्मितान् दोषरहितान् कार्पासान् वा कौशेयान् वा क्रीतान् वा समानीय। मौद्गादिचूर्णैः शुद्धवारिभिः संक्षाल्य।आतपे शोषयित्वा।तान् त्रिगुणीकृत्य। तादृशान् पुनः तथा कृत्वा। तावतोपि चतुर्गुणान्,यद्वा त्रिगुणान् वा चातुर्गुण्यं नीत्वा। त्रिगुणान् त्रिगुणीकृत्य।तादृशान् पुनः तथाकृत्वा। तावतोपि चतुर्गुणान्, यद्वा त्रिगुणान् वा चातुर्गुण्यं नीत्वा। त्रिगुणान् त्रिगुणीकृत्य वा, अथवा तान् एकतां नीत्वा। भूमिं गोमयेन अनुलिप्य। तत्र यज्ञवृक्षसंभूतं शङ्कुद्वयं यथोक्तमानानुसारेण संस्थाप्य। आचार्यानुज्ञया,भगवद्भक्ताः स्नाताः तन्निर्माणनिपुणाः प्राङ्मुखाः तत्र तन्तून् आरोप्य। यथा भूषणार्हाणि तथा पवित्राणि कुर्युः।

मूलबेरादि बेराणां आद्यं अधिवासार्थंपवित्रं नाभ्यवधिमानं अष्टोत्तरशतैः सूत्रैः द्वात्रिंशत्ग्रन्थभिः युतं च, मण्डलकुम्भकुण्डानां पद्मगलमेखलामानानि तादृशानि च निर्माय। चक्राब्जस्य पद्मनाभ्यरनेमिबाह्य पवित्राणि चतुश्शतत्रय द्विशतैकशत चतुश्शतैःतन्तुभिः क्रमेण सप्तविंशतिद्विगुण चतुर्गुण पञ्चगुणैः ग्रन्थिभिश्च। महाकुम्भस्य अष्टोत्तरशत तन्तुयुतं, सप्तविंशति ग्रन्थियुतं, करकस्य च एकाशीति तन्तुभिः विंशतिग्रन्थिभिश्च युतं पवित्रं निर्माय। बेराणां तु श्रीवत्सकौस्तुभवनमाला

किरीटाह्वयानि नाभिहृदय जङ्घा किरीटमानानि क्रमेण अष्टोत्तरशताशीत्यष्टोत्तर चतुश्शत तन्तुभिःद्वात्रिंशत्पञ्चविंशत् तावद्भिः ग्रन्थिभिश्च युतानि पवित्राणि च।

उत्तमादि पवित्राणि तु जानूरुनाभि मर्यादानि चतुश्शत त्रिशत शतद्वयतन्तुभिःअष्टोत्तर शता शीति षष्टिग्रन्थियुतानि च, हारार्थं त्रिशततन्तुभिः सप्तविंशतिग्रन्थियुतं च,शतद्वय तन्तुभिः द्वात्रिंशत्ग्रन्थियुतं नाभिमर्यादं पवित्रं च अष्टोत्तरसहस्र तन्तुभिः अनेकग्रन्थियुतं चरणमर्यादं पवित्रं च सहजपीठस्य तन्मर्यादं अष्टोत्तरशततन्तुभिः पञ्चविंशतिग्रन्थिभिश्च युतं, प्रभापवित्रं तत्तुल्यतन्तुमर्यादं अनेकग्रन्थियुतं च पवित्रं एवं सर्वेषां स्वतन्त्र बिम्बानां परतन्त्रेषु बिम्बेषु तु उत्तमादित्रयमेव।श्रियादीनां देवीनां च एवमेव अष्टोत्तरशतसूत्रैः बहुग्रन्थिभिश्च युतानि च,अग्निकुण्डस्य प्रतिमेखलं सप्तविंशति पञ्चविंशद्वाविंशकैः सूत्रैः तन्मानग्रन्थिभिश्च मेखलामर्यादानि पवित्राणि च, स्रुक्स्रुवादिपात्राणां पञ्चविंशति सूत्रैः बहुभिः ग्रन्थिभिः तन्मर्यादानि च, अर्घ्यपाद्यादिपात्र धूपपात्र घण्टाक्षमालादिषु सर्वत्र अष्टोत्तरशत तन्तुभिः यथेप्सित ग्रन्थिभिः द्वादशाङ्गुलमानेन युतानि च, सेनेश गरुड दिग्देवताद्वहिण दुर्गा विनायक रुद्रादि परिवारेषु अष्टोत्तरशत तन्तुभिः द्वात्रिंशत्ग्रन्थिभिश्च युतानि हस्तमानानि च, चण्डादीनां सप्तविंशतिसूत्रैः तावद्भिः ग्रन्थिभिःतन्मानेन च। कुम्भतोरणादिषु च तथा, बलिपीठस्य कर्णिकामानं तादृशं च,आचार्याणां यतीनां च अष्टोत्तरशत तन्तुभिश्च मूर्तिपानां पूजकानां ब्राह्मणानां च एकाशीतिसूत्रैः नाभिमर्यादानि च, राज्ञः तु अष्टोत्तरशतसूत्रैः बहुग्रन्थिभिः तन्मानेन च, तदुपजीविनां एकाशीतिसूत्रैः वैश्यादीनां चतुर्विंशतितन्तुभिश्च तेषां उपवीतवदेव पवित्राणि निर्माय। मणिमुक्ताप्रवाळादिरत्नैः स्वर्णादिलोहैश्च पूरयित्वा। ग्रन्थीन् शङ्खाकारान् धात्रीफलसदृशान् वा मुक्तफलसमान् वा, बध्वा। तदन्तरालानि कस्तूरिकाकुङ्कुम कर्पूरचन्दनावश्याय कर्दमैः आलिप्य। यद्वा ग्रन्थीनां पूरणंमल्लिकाद्यैः पुष्पैः वा कृत्वा। निशाचर्चाभिः अनुरञ्ज्य च।एवं पवित्राणि निर्माय।पूर्ववत् मण्डपं स मध्यवेदिका कुण्डं कल्पयित्वा। तोरणवितान दर्भमालाद्यैः अलङ्कृत्य। तत्र यागोपकरणानिसर्वाणि संपाद्य। तस्मिन् सप्ताहे पञ्चाहे तृतीये अहनि सद्यः वा सङ्कल्पपूर्वकं विधिवत् अङ्कुरावापनं कृत्वा। तदनु आचार्यः कृतकृत्यः उपोषितः दशम्यां निशामुखे मूर्तिपैः यजमानेन च सह गर्भगेहं प्रविश्य। देवं अर्घ्यादिभिः यथाविधि पूजयित्वा। तैः साकं देवं प्रणम्य।प्राञ्जलिःसन् इमां गाथां उदीरयेत्।

न्यूनातिरेकशान्त्यर्थं पवित्रारोपणं परम्।

अर्चनं भगवन् सर्वदुरितोत्सारणक्षमम्।
संपदां चापि सर्वासां उत्पादनमनुत्तमम्।
क्रियते तदविघ्नेन यथा स्यात् कर्मचोदितम्।
तथा अनुज्ञापयामि त्वां अनुजानी हि कर्म तत्।

इति देवं विज्ञाप्य।मन्दिरात् मण्डपं प्रविश्य। तत्र दर्भान् प्रागग्रान् आस्तीर्य। तेषु प्रागाननः उपोषितः उपविश्य। समाहितमनाः जपध्यानपरः रात्रिं जागरेण नीत्वा। अपरेद्युः निशीथिन्यां अधिवासनकर्म वक्ष्यमाणेन विधिना कुर्यात्। एकबेरे तु मूलबिम्बे स्नपनानन्तरं कौतुकं, बहुबेरे तु कल्याणकौतुकं बद्धा। ततः निर्गत्यमण्डपे पुण्याहपूर्वकं द्वारतोरण पूजनं विधाय। दिग्विदिक्षु चतुर्वेदविदः विप्रान् अन्यान् च स्थापयित्वा। तूर्यघोषेषु मङ्गलेषु च सर्वत्र प्रवर्तितेषु तदनु आचार्यःपवित्रपात्राणि आदाय। मण्डपे धान्यराशौ प्रागुदग्भुवि संस्थाप्य। पुण्याहं वाचयित्वा। शोषणादिभिः पवित्राणि संशोध्य। गन्धद्रव्यैः धूपयित्वा। कस्तूरिकादि कर्दमैःआलिप्य। पुष्पाणि विकीर्य। तानि पवित्रपाणिः नववाससा संवेष्ट्य। चक्रमुद्रां प्रदर्श्य। अस्त्रमन्त्रेण संपूज्य। मण्डपे ऐशानीदिशं आरभ्य सूत्रैः अस्त्रमन्त्रेण संवेष्ट्य। मण्डपस्य उपरि चक्रं च भूमौ पद्मं द्वारेषु गदां च ध्यात्वा। तत्र दिग्विदिक्षु माषोदनेन बलिं दत्वा। बहुबेरे तु कल्याणकौतुकं बहिः स्नानासने स्थापयित्वा। विधिवत् संस्नाप्य। उपवीतान्तं उपचर्य. वेदिकायां चक्राब्जं वर्तयित्वा।समभ्यर्च्य. कल्यणकौतुकं चक्राब्जे संस्थाप्य। हविः निवेद्य। मण्डपे धान्यराशौ सकरकं सोपकुम्भाष्टकं महाकुम्भं सलक्षणं संस्थाप्य। तेषु मध्यम कुम्भे मूलमूर्तिं, करके सुदर्शनं, पूर्वाद्याशागतेषु वासुदेवादीन् कोणस्थेषु पुरुषादीन् च पीठं संकल्प्य। आवाह्य अभ्यर्च्य। संपूज्य। कुण्डे अग्निं उपसमिध्य। यथाविधि समिदाज्य चरुभिः अधिवास होमं कृत्वा। संपातं संगृह्य। पवित्रपात्रेषु स्पर्शमन्त्रेण सेचयित्वा। एकबेरे तु कल्याणकौतुकं विना मूलर्बिबे स्नपनादिकं कृत्वा। पूर्वं पवित्राणि आरोप्य। बहुबेरे तु पूर्वं कल्याणकौतुकं कुम्भकरकाग्नि चक्राब्जमण्डलेषु 'इदं विष्णुः" इति पवित्राणि आरोप्य। सर्वमङ्गलैः सह मूलमन्दिरं प्रविश्य। मूलबिम्बं अर्घ्यादिभिः अभ्यर्च्य। पूर्वोक्तमन्त्रेण पवित्राणि आरोप्य। सर्वार्चासु च तथा कृत्वा। प्रासादं च वेष्टयित्वा। वेदघोषैः वाद्यघोषैःसह तत्रैव तां रात्रिं जागरेण नीत्वा। अपरेद्युः मण्डलस्थं देवं स्नानासने समारोप्य। संस्नाप्य। अलङ्कृत्य। शोधिते मण्डपे पूर्ववत् चक्राब्जं वर्तयित्वा। द्वारादियजनं कृत्वा। चक्रपङ्कजं अभ्यर्च्य। तस्मिन् कल्याणबिम्बं पूर्ववत् संस्थाप्य। अर्घ्यादिभिः अभ्यर्च्य। कुम्भादिकं च

संपूज्य।चतुर्विधमन्नं निवेद्य। अग्नौ पायसादिचतुर्विधैः अन्नैः पुरुषसूक्तेन च व्रीहि वेणु तिल लाज पुष्प अगरु घृतसमिद्भिः मूलमन्त्रेण पृथक् अष्टोत्तर शतं आहुतीनां हुत्वा। आचार्यः सुमुहूर्ते पवित्राणि आदाय चक्राब्जं साङ्गं पृथक् 'इदं विष्णुः"इति भूषयित्वा.तदनु कुम्भकरक कुण्डाग्नितोरण द्वारकुम्भादीनां पात्राणां च पवित्राणि आरोप्य।ततः मण्डलस्थं देवं च तदनु प्रदक्षिणी कृत्य। सर्वमङ्गल संवृतं मन्दिरं अन्तः प्रविश्य। मूलबिम्बे स्नपनादिना पूजिते हविः निवेद्य। तत्रस्थ देवानां श्रियादीनां च तथा कृत्वा। मूलबेरं समारभ्य पूर्वोक्तमन्त्रेण पवित्रैः भूषयित्वा। स्वतन्त्राणां अस्वतन्त्राणां च बिम्बानां एवं कृत्वा।तदनु चण्डादि बलिपीठान्तं च,ब्रह्मादि देवतानां तार्क्ष्यसेनेशयोः अन्येषां विष्णुभक्तानां विष्णुगायत्र्या 'इदं विष्णुः" इति वा अष्टाक्षरेण द्वादशार्णेन वा पवित्रारोपणं कृत्वा। तदनु आचार्यः मूर्तिपैः यजमानेन च सह मन्दिरं अन्तः प्रविश्य। स्याञ्जलिं रत्नैः हेमपुष्पैः केवलैः वा प्रसूनैः आपूर्य। देवं स्तोत्रैः स्तुत्वा। अञ्जलिस्थानि देवपादमूले विकीर्य। मनुष्यार्थं कृतानि पवित्राणि क्षौमादीनि पुष्पवत् देवपादयोः विन्यस्य। देवं विज्ञाप्य। स्वयं आत्मनः कृतं क्षौमादिपवित्रं च पूर्वं गृहीत्वा।तदनु पूजकमुख्यानां ऋत्विजां सहकारिणां अन्येषां राज्ञां तदुपजीविनां वैश्यादीनां च पवित्राणि वितीर्य। देवस्य आननं अवलोक्य। पादौ स्पृष्ट्वा।जनान्तिके न्यूनातिरेक शान्त्यर्थं इमां गाथां उदीरयेत्।

भगवन् देवदेवेश शङ्ख चक्र गदाधर।
संवत्सरापचाराणां पूरणार्थं कृतं मया।
आराधनं गृहाण त्वं भक्तानां हितकाम्यया।
नाहं स्वतन्त्रः किञ्चिच्च करोमि विहितं हितं।
किन्तु त्वत्प्रेरितः सर्वं करोमि न वशः स्वयम्।
तत् क्षन्तव्यं अशेषेण क्रियालोपादि अनुष्टितम्।

इति विज्ञाप्य।

अपराह्ने देवं यानादिकं आरोप्य।अलङ्कृत्य।ग्राम प्रदक्षिण पूर्वकं सर्वोपचारैः सह महोत्सवं कुर्यात्।प्रत्यहं पवित्राणि पूजाकाले प्रोक्ष्य आरोपयेत्।एवं दिवसान् चतुर्दश वा एकविंशतिः सप्त वा त्रिरात्रं एकरात्रं वा नित्यमेव द्वारयजनादि सहितं महोत्सवं कृत्वा। समाप्तिदिवसे तत्तद्देवताश्च उद्वास्य। पौरुषेण सूक्तेन रथन्तरेण वा त्रिसुपर्णेन मूलमन्त्रेण वा पवित्राणि अवरोप्य।देवस्यस्नपन कर्म कृत्वा। संपूज्य।पूर्वं गुरवे तदनु भक्तानां पवित्राणि दापयेत्। यजमानोऽपि गुरुं जीवाजीवत्मकैः धनैः तोषयित्वा। प्रणम्य। तं यानं आरोप्य।सर्वमङ्गल सहितं तन्मन्दिरं नयेत्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां पवित्रारोपण महोत्सव विधिः नाम सप्तत्रिंशः परिच्छेदः

समाप्तोयं क्रियाकैरव चन्द्रिका

22 September 2015

****